3 2044 010 158 996

IndL 2006.2

Rajasekhara. The viddhasâlabhan-
jika. 1886

THE

VIDDHASÂLABHANJIKÂ

OF

RÂJASEKHARA

With the Commentary of Narayana Dixit

EDITED

with Explanatory and Critical Notes, various readings and a Glossary

BY

BHÂSKAR RÂMCHANDRA ÂRTE B. A.

TO WHICH IS ADDED

THE

RITUSAMHÂRA OF KÂLIDÂSA

WITH A CLOSE

English Translation and various readings

BY

KESHAVA RÂOJI GODBOLE.

(REGISTERED UNDER ACT. XXV. OF 1867).

POONA.

1886.

Price Rupee one and Annas six.

Digitized by Google

IndL 2006.2

HARVARD
UNIVERSITY
LIBRARY

POONA :
Printed at the "Arya-Bhushana" Press.

Digitized by Google

PREFACE.

The MSS. Collated for this edition of Viddhasàla—bhanjikà are the following :—

A.—Belongs to the Government Collection deposited in the Deccan College. Very clearly written and correct but incomplete.

B.—Belongs to Mr. Ràvade ; procured from Násik. Complete but very badly written.

C.—Belongs to Ganesh Shastri Lele Tryambackkar. This differs in many points from the other two and appears to have been recently copied.

D.—Printed at Calcutta by Pandit Jibànanda Vidyâságara. This and the one printed in the Pandit are word for word the same.

Two MSS. of the commentary were procured ; one from the celebrated Laxmana Shastri of Saugor and the other from Mr. Ranade of Nàsik. This latter is wanting in the 4th page. Both these MSS. abruptly end in the same word at the beginning of the 4th Act.

As regards the Ritusamhàra, all the extant editions together with some MSS. have been very carefully collated. An attempt is made to make the translation as close as possible. The collation of the MSS. and the printing were done in very great haste, and we are fully aware that several mistakes have remained uncorrected. Errata is given of such mistakes only as are most obvious.

We are under great obligations to Dr. R. G. Bhandarkar who kindly explained to us many knotty points.

Poona,
25th January, 1886.

B. R. Arte.
K. R Godbole.

Digitized by Google

अथ

विद्धशालभञ्जिका

नाम नाटिका ।



प्रथमोऽङ्कः ।

कुलगुरुरबलानां केलिदीक्षाप्रदाने
परमसुहृदनङ्गो रोहिणीवल्लभस्य ।

॥ श्रीगणेशाय नमः ॥ श्रीमहालक्ष्म्यै नमः ॥ रङ्गनाथदीक्षितेभ्यो नमः ॥

पितृवचनमवश्यमेव पाल्यं जगति जनानिति शासितुं वनान्तं ।
गतमतिकरुणारसार्द्रचित्तं मनसि महो मम सन्निधिं विधत्ताम् ॥ १ ॥

श्रीरङ्गनाथदीक्षिततातं नारायणो वन्दे ।
नौमि सदा दामोदरमादरतः सद्गुरुं चैव ॥ २ ॥

संप्रदायमविजानता मया शब्दशासनविचारभीरुणा ।
प्राकृतं प्रचुरपुस्तकेक्षिणा राजशेखरकृतेर्विविच्यते ॥ ३ ॥

तत्प्रसंगवशतः क्वचित् क्वचित् संस्कृतेऽपि रसनापवर्त्यते ॥
तत्र यत्स्खलितमर्थकोविदास्तत्समादधत शोधनाध्वना ॥ ४ ॥

बालरामायणे स्वस्य महाराष्ट्रत्ववर्णनात् ।
महाराष्ट्रः कविः सोऽयं देशीं प्रायः स्वदेशजां ॥
प्रयुक्तवानतोऽस्माकं सुबोधा बहुधास्ति सा ॥ ५ ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नन् देवदेवजेतृत्वोपवर्णनेनानङ्गस्य सकलविघ्नोपशामकत्वं सूचयन्नुपात्तविशेषणैश्चास्य ग्रन्थस्य शृङ्गाररसप्रधानत्वं च द्योतयन्नन्यार्थानीषमानोदकुम्भस्येव सूत्रधारपाठ्याया आपि नान्द्या मङ्गलत्वमभिसंदधन्नान्दीमवतारयति ॥ कुलगुरुरिति ॥ स्वयमनङ्गोऽङ्गरहितोऽपि कुसुमपूषत्कैः

Digitized by Google

अपि कुसुमपृषत्कैर्देवदेवस्य जेता
जयति सुरतलीलानाटिकासूत्रधारः ॥ १ ॥

पुष्पमयैर्बाणैर्नेतु शरादिमयैः । सर्वं वाक्यं सावधारणं भवतीति न्यायात्। ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र हि ब्राह्मणातिरिक्तेभ्यो दध्यदानस्य कौण्डिन्याय तक्रातिरिक्तादानस्य कौण्डिन्यातिरिक्तब्राह्मणेभ्यश्चे तक्रादानस्येत्यादिप्रतीतेः सर्वसहृदयहृदयसिद्धत्वात् । एवमन्यत्रापि द्रष्टव्यम् । देवदेवस्य देवानां विजिगीषादिधात्वर्थोपेतानां प्रसिद्धदैत्यादिसकलरिपुजेतृणामपि देवस्य राज्ञः । राजा भट्टारको देव इत्यमरः । महेन्द्रस्य जेता जयकर्ता कर्तृत्वं च फलोपधानरूपं विवक्षितं [शरी ?] रम्भोर्वश्यादिनायकस्य संकल्पमात्रोदितसिद्धेर्बृहस्पतिशिष्यस्य वेदवेदार्थविचारपारगस्येत्यादिनाविशेषणविशिष्टस्यापि महेन्द्रस्य साक्षात्कृतब्रह्मणो महादेवावतारस्याक्षिचरणत्वेन तत्स्पर्धिनो वा बहुकालिकतपस्यादीक्षितस्य गौतमस्य धर्मपत्न्यामहल्यायां तत्पूर्वमविप्लुतब्रह्मचर्यायां स्वयमनिच्छन्त्यां प्रलोभनादिनाभ्यवशायां तद्धर्तृरूपाविष्करणेनाकार्यकरणात् । अथवा देवस्य महादेवस्याधकाभ्रिपुरादिदैत्यदलनेन प्रसिद्धानुभावस्य जेताऽतो जयति सर्वोत्कर्षेण वर्तते । जयस्य विधेयतया साध्यत्वेन देवदेवजेतृत्वस्योद्देश्यविशेषणत्वेन सिद्धतया सिद्धसाध्यसममिव्याहारव्युत्पत्त्या हेतुहेतुमद्भावलाभात् सर्वत्वस्यानेकाशेषधरत्वेन स्वस्यापि सर्वमध्यपातात् स्वावधिकोत्कर्षाश्रयत्वे तस्य पारावारन्यायेन तदवधिकापकर्षाश्रयत्वे च स्वस्यायं मत्त उत्कृष्टोऽहमेतस्मादपकृष्ट इति ज्ञानविशेषस्य विद्यमानत्वेन मानसनमस्कारो जयत्यर्थेनाक्षिप्यते ॥ कीदृशोऽनङ्गः । अबलानां ' पुमान्स्त्रिया ' इत्यनुशासनात् कामशरसहने बलरहितानां युवतीनां यूनां च केलिः क्रीडा सुरतनखकटाक्षादिरूपा तस्या दीक्षा तदधिकरसिद्धयर्थं पूर्वेतिकर्तव्यतारूपा तस्याः प्रकर्षेण गुरुजनवेदादिव्यतिक्रमभयस्य मनस्यप्यकरणमेवात्र प्रकर्षस्तेन दाने सुरतादेर्यथेष्टविनियोगार्हतारूपस्वत्वापादके मनोवृत्तिविशेषे कुलगुरुर्वीममार्गोपदेशकर्ता रण्डाचण्डादिक्खिदा धम्मदारा मज्जं मंसं पिज्जए खज्जए अ । भिक्खाभोज्जं चम्मखंडं अ सेज्जा कौलो धम्मो भादि णो कस्स रम्मो । इत्यादिनानेनैव कविना निर्दिष्टस्वरूपस्य कुलमार्गस्य प्रवर्तकाचार्य इत्यर्थः । अथवासंसारं सुरतशिक्षोपदेशकर्ता । रोहिणी वल्लभा यस्य तस्या वा वल्लभः प्रियश्चन्द्रस्तस्य परमसुहृत् सप्तविंशतिकल-

Digitized by Google

अपि च ।

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ॥
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥ २ ॥

स्तवत्वेऽपि दक्षशापेन क्षीणतनोरप्येकस्यां रोहिण्यामासक्तिरूपस्यायशसः प्रमार्जनस्यानङ्गवशत एतेनेदमनुष्ठीयत इति कामिजनप्रवादेन करणात् सौहार्दे परमत्वम् । सुरतलीला नाटिकेव तस्याः सूत्रधारः सूचनात्सूत्रमुच्यत इति निरुक्त्याल्पविलासेच्छया प्रारम्भेऽप्यगणितानंतविलाससमर्पकं चेष्टादिकं तद्धारयति तादृशः । सुरतलीलैव वा नाटिका । एकस्यापि पात्रस्य नानाभूमिकापरिग्रहेणानेकत्वप्रदर्शनवद् वैपरीत्यादिभिः कामशास्त्रप्रदर्शितैर्भेदैः सुरतलीलयाप्यनेकत्वज्ञानात् । दृश्यत्वे सति रसाभिव्यञ्जकत्वेन नाटिकातुल्यत्वात् । तस्याः सूत्रधारो नान्दीपाठकः । मदनेन हि नान्दीमात्रपाठेऽप्रेतनेतिकर्तव्यतायाः सकलरसाधायिकाया नायकनायिकाभ्यामेव संपादनात् ॥ देवद्विजनृपादीनामाशीर्वचनपूर्विका । नन्दन्त्यस्यां सुरा यस्मात्तस्मान्नान्दीति कीर्त्यते ॥ तस्याश्च श्रव्यैर्द्वादशभिः पदैरथ समैर्यैर्द्वाष्टभिर्निर्मितेत्यभिधानात् । श्लोकपादं पदं केचित्सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यं च पदमाहुर्विशारदा इति विवरणात् । श्लोकपादपदाभिप्रायेण पूर्वश्लोकेन पदचतुष्टयस्य निष्पन्नत्वेन द्वादशपदनान्दीमभिप्रेत्य श्लोकद्वयमवतारयति ॥ १ ॥

दृशेति ॥ विरूपाक्षस्य विरूपे विषमे अक्षिणी यस्य तादृशोऽथवा विगतानि रूपमक्षाणीन्द्रियाणि च यस्य स तादृशः । अशब्दमस्पर्शमरूपमव्ययमिति श्रुत्या तस्य नीरूपत्वप्रतिपादनात् । पश्यत्यचक्षुःसशृणोत्यकर्ण इत्यादिश्रुत्या च तस्येन्द्रियराहित्यबोधनात् । महादेवस्तस्य दृशा दग्धं भस्मीभूतं मनसिजं मदनं दृशैव या जीवयन्ति प्राणवन्तं कुर्वन्ति । अत एव विरूपाक्षस्य जयिनीः सर्वदा जयशीलाः । विरूपाक्षस्येति काकाक्षिन्यायेनोभयत्र सम्बध्यते । वामलोचनाः सुन्दरलोचनाः स्तुवे गुणपुरस्कारेण वर्णयामि । मनसिजस्य स्वप्रभवस्य येन दृङ्मात्रेण दाहः कृतः किं तस्य हृदयशून्यत्वमात्रमपि तु निरिन्द्रियत्वमिति विरूपाक्षपदेन ध्वन्यते । अथवा दृशादग्धमनोजं वामलोचनाः स्त्रियो नतु पुरुषा दृशैव नतु करणान्तरेण जीवयन्त्यतस्तदक्षणः पराजितत्वेन विरूपत्वं तल्लोचनानां च सर्वदा जयशालित्वेन वामत्वमित्यादि सुधीभिरनुसंधेयम् । महादेवस्य जयिनीरित्याभिरात ?) धानतश्चान्यत् किं वा स्तुतिपदं भविष्यति ॥ २ ॥

Digitized by Google

(समाधाय *

गोनासाय नियोजितागदरजाः सर्पाय बद्धौषधिः
कण्ठस्थाय विषाय वीर्यमहतः पाणौ मणीन् बिभ्रती ।
भर्तुर्मूतमणाय गोत्रजरतीनिर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च वः ॥ २ ॥

---

* समाधाय स्वयं समाहितमना [०मनसा ?] भूत्वा सामाजिकान् वा समाहितमनसो विधाय ॥

गोनासायेति ॥ अत्र व्यवहितमपि भर्तुरिति पदं गोनासायेत्यादिषु सर्वत्रानुषज्यते । तथा च भर्तुर्गोनासाय गोनासेव नासा यस्य सोऽजगरादिजातीयः सर्पविशेषः । यद्यप्यमरे गोनस इत्येव पठितं तथापि क्षीरस्वामिनामुमेव श्लोकमुदाहृत्य गोनास इत्यपि समाहितं । तथाच तदर्थं तद्धीतिनिरासार्थमिति सर्वत्र व्याख्येयम् । नियोजितमगदं गदो रोगो नास्ति यस्मात्तादृशं रजो यस्याः सा । सर्पाय गोनासातिरिक्तभुजङ्गसामान्याय बद्धौषधिर्यस्याः सा । वीर्यमहतो वीर्येण विषपीडानिवर्तनसामर्थ्येन महतो गौरवयुक्तान्मणीन् पाणौ बिभ्रती । गोत्रजरत्या गोत्रवृद्धया निर्दिष्टानि मन्त्राक्षराणि यस्याः सा । अग्निहोत्रं जुहोति यवागूं पचतीत्यत्रेवार्थक्रमानुरोधेन प्रथमतो भीता भयहेतुनिरासकरजःप्रभृतीनां च लाभेन प्रीता ॥ २ ॥

आशीर्यत्र नमस्क्रिया च वस्तिनः सङ्कीर्तनं वस्तुनो निर्देशो गुरुसंस्तुतिर्मधुलिहां मोदाय पुष्पाञ्जलिः । श्रव्यैर्द्वादशभिः पदैरथ समैर्द्वाष्टभिर्निर्मिता सद्वृत्तेन सुसन्धिना च कथिता नान्दीति सर्वागम इत्यादिना नान्दीलक्षणानि पत्रावल्यादिभेदेन तस्या नानात्वम् । सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः ।नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृतामित्यादिना तदङ्गबाहुल्यं च नाट्यशेखरादिग्रन्थेषु सुविस्तरमिति ग्रन्थगौरवभयाच्च नास्माभिरुपवर्ण्यते । क्वचित्पुस्तके कुलगुरुरित्यादिप्रथमश्लोकान्त एव नान्द्यन्ते सूत्रधार इति पठित्वा दृशेत्यादिश्लोकद्वयं पठितमास्ति तत्र नान्द्याः पूर्वोक्तलक्षणाया अन्ते सूत्रधारः सूत्रधारसमाकृतिः स्थापकनामा नटः प्रविश्य वदतीति शेषः। अत्र यत्र किंचिन्नतौ पादौ स्यातां

---

१ A. B. नियोजितांगदज्वरस्य०

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) न जाने कः पुनरत्र श्रीयुवराजपरिषदादेशः।

मूलप्रसारितौ। वैष्णवं तत्तु निर्दिष्टं स्थानकं विष्णुदैवतामित्युक्तवैष्णवस्थानकेन प्रथमप्रविष्टसूत्रधारे विनिर्गते सति प्रविश्य तद्वदपरः काव्यमास्थापयेन्नट इत्यादिना निर्दिष्टकाव्य (र्यं?) स्यास्थापनात्स्थापकनामा नटः। स च। दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः। सूचयेद्वस्तुबीजं वा मुखं पात्रमथापि वा। रङ्गं प्रस्थाय मधुरैः श्लोकैः काव्यार्थसूचकैः। ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेदित्यभिधाय। भारतीसंस्कृतप्रायो वाग्व्यापारो नराश्रयः। भदैः प्रगेचनायुक्तैर्वीथीप्रहसनामुखैरित्यभिहितं तेनायमत्र तात्पर्यार्थः। श्लोकपादपदाभिप्रायेण प्रथमश्लोकश्चतुष्पदा नान्दी सुप्तिङन्तपदाभिप्रायेण स एव द्वादशपदा नान्दी तस्या अन्ते स्थापकनामा नटः प्रविश्य दृशेत्यादिश्लोकद्वयं मधुरश्लोकत्वेनोपन्यस्य नेपथ्याभिमुखमवलोक्य च का पुनरत्र श्रीयुवराजदेवस्येत्यत्र किमः प्रश्नवाचकत्वेन कापुनरित्यादिना वर्णनीयेतिवृत्तापरपर्यायं वस्तु सूचयति। तत्प्रश्नोत्तरत्वेन च नेपथ्ये 'कुंदलदाए' इत्यादिचतुष्पदीगीतिविशेषः पठितः। तत्रापीदमवसेयम्। इतिवृत्तं हि वस्त्वित्युच्यते तच्च सूच्यमेव भवेत् किञ्चिद्दृश्यं श्रव्यमथापरमितिद्विविधमुपन्यस्य। अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्। विष्कम्भचूलिकाङ्कास्यांकावतारप्रवेशकैरित्यादिनातिपादितं तत्र प्रकृते नेपथ्य इत्यादिना यत्रयत्र यत् प्रस्तूयते सा चूलिका। अन्तर्जवनिकासस्यैश्चूलिकार्थस्य सूचनेति तल्लक्षणात्। यथा प्रन्थमुख एव नेपथ्य इत्यादिना चूलिकया वस्तूपक्षेपसूचनम्। वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥इत्युक्तलक्षणविष्कंभकेन हरदासेन मध्ये मध्ये चूलिकया च राजविदूषकयोःप्रवेशसूचनम्।द्वितीयाङ्कतृतीयाङ्कयोस्तु तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः। प्रवेशोऽङ्कद्वयस्यान्तःशेषार्थस्योपसूचक इत्युक्तलक्षणेन प्रवेशकेनैवार्थसूचनम्। चतुर्थाङ्के तु चूलिकया प्रभातसूचनं विधाय प्रवेशकेनैवार्थस्य सूचनम्। भारतीसंस्कृतप्रायो वाग्व्यापारो नराश्रय इत्यत्र च संस्कृतप्राय इत्यभिधानेन प्राकृतप्रसङ्गोऽप्यनुमुख एव। तत्र च प्रस्तावनापर्यन्तं वाग्व्यापारस्य भारतीत्वेन भारत्वं च प्ररोचनावीथीप्रहसनामुखानामङ्कत्वाभिधानेनोन्मुखीकरणं तत्र प्रशंसातःप्ररोचनेत्युक्तलक्षणप्ररोचनारूपत्वेन। किं ब्रवीष्येवमित्यादि विमा पात्रं ब्रवी-

---

१ D. का पुनरत्र श्रीयुवराजदेवस्य परिषदाज्ञा।

(नेपथ्ये श्रूयते)

(क) कुन्दलदाऐ विमुक्कमअरन्दरसाए वि चञ्चरीअओ ।
पणअप्परूढपेम्मभरभञ्जणकाअरभावभीअओ ॥ ४ ॥

(क) कुन्दलताया विमुक्तमकरन्दरसाया अपि चञ्चरीकः ।
प्रणयप्ररूढप्रेमभरभञ्जनकातरभावभीतः ॥ ४॥

ति यत् । श्रुत्वेवानुक्तमप्येतत्तत्स्यादाकाशभाषितमित्युक्तलक्षणाकाशभाषितेन किमपरमित्यादि पातुं श्रोत्रसायनं इतिच श्लोकद्वयमुपन्यस्तम् । सूत्रधारो नटीं ब्रूते मार्ष वाथ विदूषकम्। स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखं । प्रस्तावनावेत्युक्तलक्षणप्रस्तावनारूपमामुखमपि भारत्यङ्गमेव । तदेवं दिशा तदहमपीत्यादि भूमिकां संपादयामीत्यन्तमामुखं नाम भारत्यङ्गमुपन्यस्तम् । तथा । तत्र स्युः कथोद्घातः प्रवृत्तकम् । प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश । उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम्। वाक्केल्यधिबले गण्डमवस्यंदितनालिके । असत्प्रलापव्याहारमृदवानि त्रयोदश इति दिशा कथोद्घातादीनि त्रीण्युद्घात्यकादीनिच त्रयोदश वीथ्यङ्गान्येवं लक्ष्यलक्षणनिर्देशेन मूलग्रन्थेषु प्रपञ्चयित्वा क्वचित् कानिचिदेव लक्ष्ये निर्दिष्टानीति न सर्वत्र सर्वेषां नियमः ।

कुंदलदाए इति । कुंदलताया विमुक्तमकरन्दरसाया अपि चञ्चरीकः । प्रणयप्ररूढप्रेमभरभञ्जनकातरभावभीतः । तरुणीं तरङ्गितां प्रगल्भां निजप्रियामिव चारुप्रसूनदृष्टिं । रक्षति नयाति धुनोति परिरंभते चुंबति चूतयष्टिं । चञ्चरीको भ्रमरश्चूतयष्टिं चूतलतां रक्षति काकाद्युपघातकेभ्याऽनुपद्यमानपीडां करोति । भ्रमरो मधुकृद्भृङ्गश्चञ्चरीकः शिलमिुख इति हैमः । नयति स्वात्मानं प्रापयति । धुनोतीषत्कम्पयति नत्वान्दोलयति । परिरम्भते सर्वाङ्गीणस्पर्शवतीं करोति । चुम्बत्यास्वादयत्यधरादौ कामुक इव कामिनीं । कीदृशः । विमुक्तः परित्यक्तोऽस्वीकृत एव वा मकरन्दः पुष्परसो रसो गन्धश्च यया । मकरन्दः पुष्परस इत्यमरः । रसो गन्धे रसो हर्षे रसः स्वादे प्रकीर्तित इति विश्वः । नीरसनिर्गन्धकुसुमाया अपीत्यर्थः । तादृश्या अपि कुन्दलतायाः प्रणयेन सौहार्देन प्ररूढमतिवृद्धिं गतं यत्प्रेमानुरागातिशयस्तस्य यो भरः समूहस्तस्य यद्भञ्जनं भङ्गस्तत्र कातरः शङ्काकुलो यो भावोऽभिप्रायस्तस्माद्भीतः । कीदृशीं । चारूणि यानि प्रसूनानि तानि दृष्टिरिव यस्याः सा तां । कामिव । तरुणीं तारुण्यवतीं तरङ्गितिप्रगल्भां निज-

Digitized by Google

(क) तरुणतरट्ठिअं णिअपिअं विअ चारुपसूणदिट्ठिं ।
रक्खइ णअइ धूणइ परिरम्भइ चुम्बइ चूदलअं ॥९॥

सूत्रधारः—(आकर्ण्य) अये यायावरेण दौहित्रकिना कविराजशेखरेण विरचिताया विद्धशालभञ्जिकानाम्न्याः नाटिकायाः वस्तूपक्षेपो गीयते ।[2] (विभाव्य)[3] तन्मन्ये तदभिनये श्रीयुवराजदेवस्य परिषदादेशः[4] । तदहमपि महामन्त्रिणो भागुरायणस्य प्रतीकवृत्त्या शिष्यौ विहितनाम्नोऽन्तेवासिनो हरदासस्य भूमिकां सम्पादयामि[7] ।*

(क) तरुणप्रगल्भां निजप्रियामिव चारुप्रसूनदृष्टिम् ।
रक्षति नयति धुनोति परिरभते चुम्बति चूतलताम् ॥ ९ ॥

प्रियामिव । तदेव चञ्चरीकस्य कुन्दसहकारसम्बन्धप्रदर्शनेन ऋतुं काञ्चिदुपादायेत्यादिनिर्दिष्टो भारत्या वसन्तसम्बन्धोऽपि दर्शितः प्रस्तुताक्षेपित्वं चात्र तथा । कुन्दलताया इत्यादिना परिभुक्तयौवना मदनवती पूर्वनायिका व्यज्यते । चञ्चरीकपदेन मदनवतीं विहाय तयैव निर्दिष्टबहुविवाहोऽपि कुवलयमालायामुत्पन्नानुरागोऽपि मृगाङ्कावल्यामत्यन्तासक्तो राजा विद्याधरमल्ल उच्यते । तरुणतरट्ठीमित्यनेनच कुवलयमालोच्यते । निजप्रियामित्यनेन च मृगाङ्कावली निर्दिश्यते । प्रणयेत्यादिना निर्वहणसंधौ मदनवत्यामप्यनुरागप्रदर्शनेन च धीरललितत्वनिर्वाहप्रपञ्चसूचनमिति कथञ्चिदुन्नेयम् ॥ ४–५ ॥

* यायावरेण । द्विविधो गृहस्थो यायावरः शालीनश्चेति तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरिक्थवर्जनात् षट्कर्माधिष्ठितः प्रेष्यचतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्ती शालीन इत्यादिना देवलोक्तो वृत्तिविशेषशाली गृहस्थविशेषस्तेन । दौहित्रकिना तत्संज्ञककुलोत्पन्नेन कविराजशेखरेण तन्नामककविना विद्धा स्तम्भ उत्कीर्णो या शालभञ्जिका पुत्तलिका । स्तम्भे शालभञ्जिकामवलोक्य 'इअं पि सा ज्जेव' इत्यादिना प्रथमेऽङ्के 'विद्धसंचारिदसालभञ्जिअत्तणेण परिणदा' इत्यादिना द्वितीयाङ्कशेषे निर्दिष्टा पुत्तलिका तयैव प्रवृत्तिनिमित्तेन तन्नाम्नी चासौ नाटिका च सा विद्धशालभञ्जिका नाटिका तस्या वस्तु वर्णनीयमितिवृत्तं तदुपक्षिप्यते यथाकथञ्चित्सूच्यतेऽनेन स पूर्वोक्तश्चतुष्पदीरूपः प्रबन्धो गीयत इ-

---

१ B. C. तरुणतरट्ठिअं. D. तरुणीं. २ D. चूदलट्ठिअं. ३ D. नाम. ४ D. परिषदाज्ञा. ५ D. मन्त्रिणो. ६ D. चारुनाम्नो. ७ A. हरदत्तस्य.

Digitized by Google

(आकाशे)*

सखे सोमदत्त[1] । किमात्य तदकालजलदस्य† प्रणप्तुस्तस्य गुणगणाः किमिति न वर्ण्यन्ते ।[2]

(तत्रैव)‡ शृणु ।

किमपरमपरैः परोपकार व्यसननिधेर्गणितैर्गुणैरमुष्य ।
रघुकुलतिलको महेन्द्रपालः सकलकलानिलयः स यस्य शिष्यः ॥ ६ ॥

त्यर्थः । नाटिकालक्षणं तु । नाटिका कृत्तवृत्ता स्यात्स्त्रीप्राया चतुरङ्किका प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः । शृङ्गारोऽङ्गी तु मुग्धात्र नायिका नृपवंशजा । अन्तःपुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः । अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् । नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः । देवीपुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा । पदेपदे मानवती तद्वशः सङ्गमस्तयोः । वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः । धीरललितलक्षणं तु । निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुरिति । प्रथमं चक्षूरागश्चित्तासङ्गस्तथैव संकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा (पो ?) मृतिरित्येता दशावस्थाः । इत्येतासु मृतिरूपदशमावस्थाराहित्येन नवावस्थोऽनुरागो वर्णनीय इत्यर्थः । कैशिकीसात्वत्यारभटीतित्रिविधास्वर्थवृत्तिषु मध्ये कैशिकी चारुविलासयुक्ता । एवंलक्षणवती नाटिका । प्रतीकवृत्त्या । अङ्गं प्रतीकोऽवयव इत्यमरः । तेषां वृत्त्या विभूतिधारणादिनान्तेवासिनः शिष्यस्य । छात्रान्तेवासिनौ शिष्यावित्यमरः । भूमिकां मूर्त्यन्तरपरिग्रहम् । भूमिका रचनायां स्यान्मूर्त्यन्तरपरिग्रह इति विश्वः ।

* आकाश इति । किंब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येतत्तत्स्यादाकाशभाषितमिति लक्षणात् ' सखे किमात्थ ' इत्यादिः ' सुधास्कन्दिनी :' इत्यन्तः प्रबन्ध आकाशभाषितं तत्रेत्यर्थः ।

† अकालजलदस्य तन्नामकस्य । प्रणप्तुः पौत्रपुत्रस्य ।

‡ तत्रैवाकाश एव ।

किमपरमिति । तस्यामुष्य परोपकार एव व्यसनं तस्य निधेरपरैरन्यैर्गणितैर्गुणैः किम् । यस्य रघुकुलतिलको महेन्द्रपालस्तन्नामको महेन्द्रं कुलपर्वतविशेषं पालयति स तादृशो वा सकलानां कलानां चतुष्षष्टिकलानां निलयो यस्य शिष्यः । अपरमन्यत् किमेतदपेक्षयान्यत् किंवा स्तुतिपदं भविष्यतीति भावः ॥ ६ ॥

---

१ B. D. गणः । २ B. D. वर्ण्यते.

Digitized by Google

आकर्णय[1] च गोष्ठीगरिष्ठस्य कृष्णशङ्करशर्मणो[2] वाचः ।*

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः[3] ।
भोक्तुं स्वादुफलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद् भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः[4] ॥७॥

(इति निष्क्रान्तः[5])

॥ इति प्रस्तावना ॥†

---

*आकर्णय चेति । चकारस्तत्रैव शृण्वति पूर्वोक्तेन समुच्चयार्थः । गोष्ठ्यां सभायां गरिष्ठस्य श्रेष्ठस्य । परिषद्गोष्ठीसभासमितिसंसद इत्यमरः ।

पातुमिति । श्रोत्ररसायनं श्रोत्रयो रसस्य हर्षस्यायनं स्थानम् । रसो गन्धे रसो हर्षे रसः स्वादे प्रकीर्तित इति विश्वः । यज्जराव्याधिशमनमौषधं तद्रसायनमिति वैद्यकाभिहितमौषधविशेषो वा । तत्पातुं सादरं श्रोतुमित्यर्थः सतां साहित्याभिज्ञानां सम्मता अभिप्रेता व्युत्पत्तिमप्रसिद्धपदार्थज्ञानजन्यसंस्कारविशेषं । रसाः शृङ्गारादयोऽङ्गत्वेनाङ्गित्वेन च स्थलेषु निबद्धास्तत्स्रोतसः प्रवाहस्यावधिं मर्यादां लब्धुं प्राप्तुं सुधाममृतमास्कन्दयन्त्यवधारयन्ति तच्छीलाः ॥ ७ ॥

† प्रस्तावनेति । नेपथ्य इत्यारभ्येतिनिष्क्रान्त इत्यन्तग्रन्थस्य प्रस्तावनेति संज्ञा । नटी विदूषको वापि पारिपार्श्वक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । आमुखं नाम तत्स्यैव सातु प्रस्तावना मतेति लक्षणात् ।

---

१ A. B. C. आकर्ण्य च. २ A. शङ्करवर्मणो. C. शंकरशर्मणो. ३ A. B. रसस्रोतसां. ४ D. notices सुधास्कन्दिनीः which is also the text of the commentary. ५ D. drops इति.

Digitized by Google

(ततः प्रविशति हरदासः)

हरदासः। (साशिरःकम्पम्) अहह। प्रज्ञाप्रकर्षः सर्वेषामुपरि प्रतिवसति। तदुक्तम्।

श्रियः प्रसूते विपदो रुणद्धि
यशांसि दुग्धे मलिनं प्रमार्ष्टि।
संस्कारशौचेन परं पुनीते
शुद्धाहि बुद्धिः किल कामधेनुः ॥ ८ ॥

एतदिदं चास्मद्गुरोश्चरितेषु परमुपलभ्यते। तथाहि।

लाटेन्द्रश्चन्द्रवर्मा नरपतितिलकः कल्पिता तेन पुत्री
निष्पुत्रेणैव पुत्रः कथितमपि तथा मन्त्रिणस्तस्य चारैः।
कामं पुत्रावकल्पच्छलत इह महाराजसंदर्शनार्थं
तेनाप्यानायितासौ निरुपधि दधता साधु धाङ्गण्यचक्षुः ॥ ९ ॥

श्रिय इति ॥ शुद्धा बुद्धिः किलेति निश्चये कामधेनुरितिरूपकं। मलिनं भावप्रधाननिर्देशेन मालिन्यं कर्म प्रमार्ष्टि दूरीकरोति ॥ ८ ॥

लाटेन्द्र इति। लाटनामको देशस्तस्येन्द्रः। चन्द्रवर्मेति संज्ञा। तेन तन्नामकेन राज्ञा। निःपुत्रेण पुत्ररहितेन सता। पुत्री कन्या। एकपुत्रो मुख्यः पुत्रो न तु प्रेमास्पदत्वेन पुत्रवत्। कल्पिता लोकमध्ये प्रकाशिता। तस्य मन्त्रिणो भागुरायणस्य कर्मणि षष्ठी। चारैः प्रणिधिभिः। तथा पूर्वोक्तप्रकारेण कथितमपि। अपिरनुक्तसमुच्चये। स्वयं बुद्ध्या कथितं चेत्यर्थः। तेन मन्त्रिणासौ तत्कन्या महाराजसन्दर्शनार्थमिह राजनगरेऽद्य दिवसे पुत्रेऽवकल्पते सम्भवति तत्पुत्रावकल्पं तादृशं च तच्छलं च तस्मात्। ल्यब्लोपे पञ्चमी। तत्कृत्वेत्यर्थः। आनायिता दूतद्वारेति शेषः। यावदस्मदीयं वार्षिकं करादिकं न दीयते तावद्भवत्पुत्रोऽस्मत्सेवायां तिष्ठतु प्रस्थापिते च करे सोऽस्माभिः प्रस्थापनीय इति छलं पुत्रावकल्पं। अस्य च व्यवहारस्य महाराष्ट्रभाषायां 'ओल' इत्येव व्यपदेशः। अत एवाग्र स्थले ओल्लागदस्सेत्यादिना मृगाङ्कवर्मत्वेन व्यवह्रियमाणाया मृगाङ्कावल्या निर्देशः। सन्धि-

---

१ D वसति. २ D प्रदुग्धे ३ D सूते. ४ अविनयम् C. (mar. note.) ५ A. C. D. °णैक. ६ A. B. C. मथ. ७ A. छलित इव. ८ D. °नाया.

Digitized by Google

(आकाशे*)—आर्ये चारायण । किमार्य । अन्तेउरिआसहस्सपरिवारस्स महाराअस्स किं तीए विणा विसूरादिसि † । (क) (तं प्रति) मा मैवम् । अत्रास्ति किंचन बीजं तच्च कार्यसिद्धावाविर्भविष्यति ।

(नेपथ्ये ‡)पच्चूसमुहपडिबुद्धस्स सुप्पभादं देवस्स । संपदं खु ।
माणो जाण ण खण्डिदो ससिअरुक्केरेण वित्थारिणा
झंकारा ण अ पंचमस्स वि चिरं जासु ट्ठिदा कुंठिदाः ।
पच्चूसाणिललोलणेण ललणा मोत्तूण माणग्गहं
चूलाचुंबिदवल्लहग्गचलणा वट्टन्ति ता संपदम् ॥ १० ॥ (ख)

(क) अन्तःपुरिका सहस्रपरिवारस्य महाराजस्य किं तया विना खिद्यत इति ।

(ख) प्रत्यूषमुखप्रतिबुद्धस्य सुप्रभातं देवस्य । साम्प्रतं खलु ।
मानो यासां न खण्डितः शशिकरोत्करेण विस्तारिणा
झङ्कारा न च पञ्चमस्यापि चिरं यासु स्थिताः कुण्ठिताः ।
प्रत्यूषानिललोलनेन ललना मुक्त्वा मानग्रहम्
चूडाचुम्बितवल्लभाग्रचरणा वर्तन्ते ताः साम्प्रतम् ॥ १० ॥

विग्रहयानासनद्वैधीभावसंश्रयरूपं यत्षाड्गुण्यं तदेव साधु समीचीनं चक्षुस्तन्निरुपधि निःकपटं यथास्यादेवं दधतीति मन्त्रिविशेषणम् ॥९॥

* आकाश इति ॥ आर्यचारायणेत्यारभ्य कार्यसिद्धावाविर्भविष्यतीत्यन्तमाकाशभाषितं तत्रेत्यर्थः ।

†अन्तेउरिओति ॥ अन्तःपुरिकासहस्रपरिवारस्य महाराजस्य किं तया विना खिद्यत इति । अन्तःपुरे विहरंति ता अन्तःपुरिकानायिकाः ।

‡नेपथ्य इति ॥ पच्चूसेत्यारभ्य शृङ्खलासिक्तेनेत्यन्तं चूलिकयार्थसूचनम् । अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचनेति तल्लक्षणात् । प्रत्यूषसुखप्रतिबुद्धस्य सुप्रभातं देवस्य । साम्प्रतं खलु । मानो यासां न खण्डितः शशिकरोत्करेण विस्तारिणा । संकारा न च पञ्चमस्यापि चिरं यासु स्थिताः कुण्ठिताः । प्रत्यूषानिललोलनेन ललना मुक्त्वा मानग्रहं । चूडाचुम्बितवल्लभाग्रचरणा वर्तन्ते ताः साम्प्रतम् ॥१०॥

---

१ C. विष्फुरदित्ति. २. D. °मुह. ३. A. झंकारेण. D. हुंकाराण. ४ D. आसु ट्ठिदा.

Digitized by Google

(पुनस्तत्रैव) भोभो बंदिविंदारआ। मंतिविणिम्मिदमहाराअ-वासहरमेरंतणिवासी महल्लअलोओ तुह्मे भणादि। को विअ कालो विउद्धस्स विज्जाहरमल्लदेवस्स। ता किंसे पभादभोआवलिं ण[२] गायध त्ति×(क)(तत्रैव) जयजयोज्जायिनीभुजङ्ग। सुप्रभातं भवतः। संप्रतिहि।

द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकै
र्ज्योत्स्नापानमदालसेन वपुषा मुग्धाश्वकोराङ्गनाः।
यातोऽस्ताचलमूलमुद्गसमधुच्छत्रच्छविश्चन्द्रमाः
प्राची बालबिडाललोचनरुचां जाता च पात्रं ककुप्॥ ११॥

अपि च।

भिन्दानः सुंदरीणां पतिषु रुषमयं, हर्म्यपारावतेभ्यो

(क) भो भो बन्दिवृन्दारकाः। मन्त्रिविनिर्मितमहाराजवासगृहपर्यन्तनिवासी अन्तःपुरलोको युष्मान् भणति। क इव कालो विबुद्धस्य विद्याधरमल्लदेवस्य तत् किं प्रभातभोगावलीन गायथेति।

× भो भो बंदिवृन्दारका मन्त्रिविनिर्मितमहाराजवासगृहपर्यन्तनिवासी अन्तःपुरलोको युष्मान्भणति कोपि च कालो विबुद्धस्य विद्याधरमल्लदेवस्य तत्किमिति प्रभातभोगावलिं न गायतेति। महल्लेत्यन्तःपुरे देशी। प्रभातभोगावली प्रातःकाले बन्दिपाठ्या राजाविरुदावलिरूपा राजस्तुतिः।

तारकैरिति। नक्षत्रे चाक्षिमध्ये च तारकं तारकापि वेति शाश्वतः। उद्गसं गतमधु माक्षिकं यन्मधुनो माक्षिकस्य छत्रं पटलं तस्य छविरिवच्छवियस्य स तथा। प्राची ककुभ्? दिग्। बालो यो बिडालो मार्जारः। ओतुर्बिडालो मार्जार इत्यमरः। तस्य लोचनरुचां नेत्रदीप्तीनां पात्रं स्थानं जाता॥ ११॥

अयं प्रातरत्यः प्रातःकालभवः। तूर्याणां वादित्राणां। नादः शब्दः।

---

१ C. किंण D. कीत्ति २ A. गणअंदित्ति. B. गायंतिति C. drops ण and has गायन्तीत्ति. ३ D. perhaps wrongly मरालसेवनपुषा. ४ A. C. D. मत्ताः. ५. D. चूल.

Digitized by Google

वाचालत्वं ददानः, कवयितृषु गुणं प्रातिभं संदधानः ।
प्रातस्त्यस्तूर्यनादः स्थगयति गगनं मांसलः पांसुतल्पा-
दाविगादुत्थितानां नरवरकरिणां शृङ्खलासिञ्जितेन ॥ १२ ॥

हरदासः । महत्येव प्रभाते विबुद्धो देव इति मन्ये मन्त्रिमन्त्र-प्रभाव एवैषः । यतः ।

कारुभिः कारितं तेन कृत्रिमं स्वमहेतवे ।
सुषिरस्तंभसंचारं नृपतेर्वासमन्दिरम् ॥ १३ ॥

× तदहमपि सुषिरस्तम्भसंचारं वासगृहं निर्मितवतां तथाविधां रत्नवतीं चतुष्किकां च करिष्यतां शिल्पवतां मन्त्रिसमादिष्टां कनकरत्नादिसामग्रीं दापयितुं महाराजभाण्डागारं यास्यामि । (इति निष्क्रांतः)

इति विष्कम्भकः * ।

गगनमाकाशं स्थगयति आच्छादयति व्याप्नोतीति यावत् । पतिष्विति विषये सप्तमी तथा च पतिविषयिणीं रुषं क्रोधं भिन्ते विदारयति तादृशोऽस्वल्पादतिमहतः पांसुतल्पाद्धूलिशयनात् । रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्नान द्वयो रज इत्यमरः । तल्पं शय्याट्टदोरेष्विति कोषः । उत्थितानां कृतोत्थानानां नरवरकरिणां राजगजानां शृङ्खला पादबन्धना तच्छब्देन मांसलोऽतिपुष्टः । भिन्दान इत्यादीनि प्रथमैकवचनान्तानि तूर्यनादविशेषणानि ।

× सुषिरं बिलं तस्य स्तम्भैस्तद्युक्तैः स्तम्भैः सञ्चारो यत्र तादृशम् । तथाविधां सुषिरस्तम्भसञ्चाराम ।

*विष्कम्भक इति । तल्लक्षणं तु । वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजित इति ।

---

१ A. B. D. दस्वल्पा. २ A. B. D. समादिष्टं दापयितुम्. ३ D प्रति यास्यामि.

Digitized by Google

(ततः प्रविशति सोत्कण्ठो राजा द्वारावस्थितो विदूषकश्च)

राजा । (साङ्गभङ्गमुत्थाय पठति) ।

तद्वक्त्रं यदि मुद्रिता शशिकथा हा हेम सा चेद् द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्मितं का सुधा ।
धिक्कन्दर्पधनुर्भुवौ च यदि ते किं वा बहु ब्रूमहे
यत् सत्यं पुनरुक्तवस्तुविमुखैः सर्गक्रमो वेधसः ॥ १४ ॥

विदूषकः । (उपसृत्य) सोत्थि[1] वड्ढदु भवं । *(क)

राजा । (तदेव पठति)

विदूषकः । हीही भोः । अपुव्वो विअ पाभादिओ पढणविही पिअवअस्सस्स । † (ख)

राजा । (तथैव ‡)

विदूषकः । अहो से हिअअविअप्पेवो ता किं णु खु एदं । (विचिन्त्य) भोदु अणुबन्धिस्सं । ण हु अपीडिओ सहआरवेंटगे-

---

(क) स्वस्ति वर्धतां भवान् ।

(ख) हीही भोः । अपूर्व इव प्राभातिकः पठनविधिः प्रियवयस्यस्य ।

कन्दर्पधनुरिति विग्योगे द्वितीया । यद्यस्मात् कारणाद् वेधसो ब्रह्मणः सर्गक्रमः सृष्टिक्रमः पुनरुक्ते वस्तुनि विमुखः पराङ्मुख इति सत्यम् । ब्रह्मा हि पुनरुक्तं वस्तु न निर्मातीत्यस्य सत्यत्वेन तद्वक्त्रादीनामेव शशिहेमादिस्थानाभिषिक्तत्वात् शशिकथा मुद्रिता मुद्रणमवाच्यतां प्राप्ता इत्यादि सर्वत्र व्याख्येयमिति तात्पर्यार्थः ॥ १४ ॥

* विदू० । स्वस्ति वर्धतां भवान् ।

† विदू । हीहीति विस्मये । भो अपूर्व इव प्राभातिकः पठनविधिः प्रियवयस्यस्य ।

‡ तथैवेति । विदूषकवचनमनाकर्ण्यैव तद्वक्त्रमित्याद्येव पठतीत्यर्थः ।

---

१ D. विरसः. २ C. सोत्थि महाराजस्स.

Digitized by Google

ठी वि रससव्वस्सं मुंचदि । (पुरतः स्थित्वा) परिणामुप्पीडिदं विअ दाडिमफलं फुट्टणभूइट्ठं वट्टदि मे हिअअं कोदूहलेण । ता जधावुत्तमाचक्खंतो कज्जरहस्सेण संभावेदु मं पिअवअस्सो। *(क)

राजा । (तदभिमुखमवलोक्य) अये चारायण रहस्य ! कथं न कथयामि । सुहृत्संचारितरहस्यं हि चेतः संविभक्तभारमिव लघूभवति ।

विदूषकः । अवहिदोह्मि †। (ख)

राजा ।

जाने स्वप्नविधौ ममाद्य चुलकोत्सेक्यं[1] पुरस्तादभूत्
प्रत्यूषे परिवेषमण्डलमिव ज्योत्स्नासपत्नं महः ।

(क) अहो अस्य हृदयविक्षेपस्तत् किं नु खल्विदम् । भवतु अनुभन्त्स्यामि । न खलु अपीडितः सहकारवृन्तग्रन्थिरपि रससर्वस्वं मुञ्चति । परिणामोत्पीडितमिव दाडिमफलं स्फुटनभूयिष्ठं वर्तते मे हृदयं कौतूहलेन । तद्यथावृत्तमाचक्षाणः कार्यरहस्येन सम्भावयतु मां प्रियवयस्यः ।

(ख) अवहितोऽस्मि ।

---

* विदू०। अहो अस्य हृदयविक्षेपः। तत्किं नु खल्वेतत् । भवत्वनुबन्धिष्ये निर्बन्धेन प्रश्नं करिष्य इत्यर्थः । न खल्वपीडितः सहकारवृन्तग्रन्थिरपि रससर्वस्वं मुञ्चति । परिणामोत्पीडितमिव दाडिमफलं स्फुटनभूयिष्ठं वर्तते मे हृदय कौतूहलेन । तद्यथावृत्तमाचक्षाणः कार्यरहस्येन सम्भावयतु मां प्रियवयस्यः।

† विदू० । अवहितोऽस्म ।

जान इति । प्रत्यूषेऽहमुखे । स्वप्नविधौ स्वप्ननिर्माणे चुलकेन संहतपाणिना । उत्सेकार्हं महस्तेजो मम पुरस्तादभूदित्यहं जानेऽवबुध्यामि । प्रत्यूष इति प्रातःकालीनस्वप्नस्य सत्यत्वख्यापनाय । अथवा यच्चुलकोत्सेक्यं महः प्रत्यूष मम पुरस्तादभूत् तत्स्वप्नविधा इत्यहं जाने । तादृशवासगृहमध्येऽन्यस्य प्रवेशो यतो न सम्भावित इति भावः । तस्य महसोऽन्तः स्था

---

१ A. B. C. चुबुकोत्सेकं.

* die gelöste Hand ... gurt ...

कथय किमिह बाले का त्वमित्युल्लपंस्तां
झटिति किल दुकूलस्याञ्चले धारयामि ।
अगमदथ निकेतात् काप्यसौ सारयन्ती ।
नवकुवलयमालां मांसलैर्दृष्टिपातैः ॥ १८ ॥

विदूषकः । अध एक्कपलंकगदाए देवीए किं पडिवण्णं*।(क)

राजा । अत्रान्तरे तरलहारलतानितम्बै-
संवाहनस्खलनवेगतरङ्गिताङ्गी ।
देवी व्यपास्य शयनं धृतमानतन्तु-
रन्तःपुरं गतवती सह सौविदल्लैः ॥ १९ ॥

विदूषकः । अहो दे णाअरत्तणं किं तए पुरदो भवीअ णाणुणीदा । केच्चिरं वा चंदे पसारिदकरे अविसङ्कंदोट्ठा णीलुप्पलिणी चिट्ठदि । †(ख)

(क) अथ एकपर्यङ्कगतया देव्या किं प्रतिपन्नम् ।

(ख) अहो ते नागरत्वं किं त्वया पुरतो भूत्वा नानुनीत कियच्चिरं वा चन्द्रे प्रसारितकरे अदलितकन्दोट्ठा नीलोत्पलिनी तिष्ठति ।

कथयेति । हे बाले त्वं कथयोत्तरं प्रयच्छ । इह किं किंनिमित्तमागतासीति शेषः । अव्ययानामनेकार्थत्वात्किम एव वा तावानर्थः । का त्वमित्युल्लपन्सन् । तां दुकूलस्य परिधानवाससोऽञ्चले पल्लवे यावद्धारयामि । अथानन्तरं ममाञ्चलधारणोद्योगानन्तरमित्यर्थः । असौ कामिनी निकेतादासगृहात् । झगिति शीघ्रं । क्वापि मदज्ञातप्रदेशेऽगमत् । कीदृशी । मांसलैरिति (पि?) प्रगल्भैर्दृष्टिपातैः कटाक्षै नवकुवलयमाला नवनीलेन्दीवरश्रेणीः सारयन्ती प्रसारयन्ती ।मालामित्येकवचनान्तोऽपि क्वचित्पाठः॥१८।

*विदू । अथैकपर्यङ्कगतया देव्या किं प्रतिपन्नम् ।

†विदू । अहो ते नागरत्वम् । किं त्वया पुरतो भूत्वा नानुनीता । कियच्चिरं वा चन्द्रे प्रसारितकरे अदलितकन्दोट्ठा नीलोत्पलिनी तिष्ठति ।

---

१ C. काप्यसौ, २ C. प्रेरयन्ती ३ C. मां गतैः ४ D. सितम्बा. ५ C. सञ्चारण. ६ D. अन्तःपुरात्.

Digitized by Google

राजा । (सखेदस्मितम्) तदनुध्यानपरतन्त्रचेतसा धारयितुं न पारिता किं पुनरनुनेतुम् ।

विदूषकः । सच्चकं तए किदं णडे दिट्ठे मण्डिदे उवविट्ठो पई मुंडिदो त्ति* ।(क)

राजा । (सखेदस्मितम्) भगवन्नाशे सत्यमप्रतिहतासि । ननु विचारय चिरम् ।

क्व पातव्या ज्योत्स्नामृतभुवनगर्भोऽपि तृषितै-
र्मृणालीतन्तुभ्यः सिचयरचना कुत्र भवतु ।
क्व वापारो मेयो बत बकुलदाम्नां परिमलः
कथं स्वप्नः साक्षात्कुवलयदृशं कल्पयतु ताम् ॥ २० ॥

(क) सत्यं त्वया कृतं नटे दृष्टे मण्डिते उपविष्टः पतिर्मुण्डित इति ।

चिरं वा चन्द्रे प्रसारितकरेऽविकसितनीलोत्पला नीलोत्पलिनी तिष्ठति । कंदोट्टशब्दो नीलोत्पले रूढः प्राकृते ।

*विदू । सत्यकं त्वया कृतं नटे दृष्टे मण्डित उपविष्टः पतिर्मुण्डित इति । कृतमण्डने नटे दृष्टे सति तादृशसौन्दर्याभावात्स्वपतिः कयाचिन्मुण्डित इत्याभाणकं त्वया सत्यं कृतम् ।यत्स्वप्रदृष्ट नायिकापरवशमनसा त्वया स्वाधीनापि देवी नानुनीतेति भावः ।

क्व पातव्येति । तृषितैः सञ्जातपिपासैः पुरुषैः । अमृतस्य भुवनानि गर्भे यस्यास्तादृश्यप्यतिशीतलापीत्यर्थः । ज्योत्स्ना चन्द्रिका क्व पातव्या भवतु । मृणाल्यास्तन्तुभ्यो बिससूक्ष्मतन्तुभ्यः सिचयस्य वस्त्रस्य रचना कुत्र भवतु । बकुलस्य पुष्पाणि बकुलानि तेषां दाम्नां मालानां परिमलः (पारीपात्रतया?) मातुं योग्यः क्व वा भवतु । स्वप्नस्तां स्वप्नदृष्टां कुवलयदृशं साक्षाद् वास्तवस्वरूपां सत्यां कथं कल्पयतु । यथा पूर्वोक्तं न संभवति तथेदमपि न संभवतीति भावः । चतुर्थचरणं व्याख्याय वा प्राक्तनपादत्रयं व्याख्येयम् ॥२०॥

---

१ D. मुण्डिद्दे. २ C. मुञ्चोति.

Digitized by Google

राजा । ततश्च ।

साम्यं संप्रति सेवते विचकिलं षाण्मासिकैर्मौक्तिकै
र्बाह्लीकीदशनव्रणारुणतरैः पत्रैरशोकश्चितः ।
भृङ्गालम्बितकोटिकिंशुकमिदं किञ्चिद्विवृन्तायते
माञ्जिष्ठैः स्तबकैश्च पाटलितरोरन्यैव कापि श्रियः ॥ २५ ॥

(विचिन्त्य)

सा कापि स्वप्नविधौ दृष्टा च मधुश्च यत्[3] समायातः
तदिदं मम लीढमधोरनुपानं तत्तदुग्धेन ॥२६॥

मयस्य वसंतसमयस्यारम्भ इति किमेतदनवरतसारणासिकेसुकुमारासु कोलिवनवसुन्धरास्वधिकविस्तारः सुरभिसमयारम्भः ।

साम्यमिति । सम्प्रति वसन्ते किञ्चत्प्रौढिमागते विचकिलस्य मल्लीभेदस्य पुष्पं विचकिलम् । पुमान् विचकिलो मल्लीभेदे दमनकेऽपि चेति विश्वः। षाण्मासिकैः षण्मासाः परिमाणं येषां तैरतिस्थूलैर्मौक्तिकैः साम्यं सेवते । अशोकः कङ्केलितरुर्बाह्लीकीनां बाह्लीकदेशोद्भवस्त्रीणां दन्तच्छदवदोष्ठवदरुणतरैरत्यंतारुणतरैः पत्रैः पर्णैश्चितो व्याप्तः। नदीनां सिंधुषष्ठानामन्तरा निवसन्ति ये। बाह्लीका नाम ते देशा न तत्र दिवसं वसेदित्यादिना निर्दिष्टस्वरूपा बाह्लीकाः । देशविशेषा वा । तद्देशजस्त्रीणामधरोष्ठा अत्यरुणाः कोमलाश्चेति प्रसिद्धिः । दशनव्रणारुणतरैरितिपाठे दन्तक्षतवदत्यन्तारुणैरिति व्याख्येयम् ।दन्तक्षतानि वाधरोष्ठ एव भवन्ति नखक्षतानि च स्तनजघनेष्वेति कामशास्त्रप्रसिद्धमेव । किञ्चिदिदं ? किंशुकं भृङ्गेण भ्रमरेणालम्बिताधिष्ठिता कोटिरग्रभागो यस्य तत्तादृशं सद्विवृन्तायते अरुणश्चाद्यगद्यरूपेऽपि वृन्तद्वयवदिव भवति । पलाशवृन्तस्य श्यामत्वेन पुरःस्थितभ्रमरो द्वितीयवृन्तत्वेनोपमित इति भावः । पाटलितरोर्माञ्जिष्ठैर्माञ्जिष्ठासरागैः स्तबकैः पुष्पगुच्छैः । काचिदन्यैव पूर्वरचनाविलक्षणैव लिपी रचनाविशेषः ॥ २५ ॥

तदिदमिति । तदनिर्देश्यगुणातिशयावास्तस्याः स्वप्ने दर्शनम् । इदं त-

---

१ D. छदारुण. २ D. लंघित. ३ A. यदयमागतः B. यदयमायातः D. Omits this verse.

(पारिक्रामितकेन)

विदुषकः । कलमंकरकुमंडपाण्डरेसुं सितसिंदुवारफुल्लेसुं तक्कालकिदमंजिट्ठेसुं असोअपल्लवेसुं णिज्जिदमंजिट्ठाधूसरिदमणोहरेसुं माहवीकुसुमेसुं दधिसरसरिच्छेसुं णोमालिआमुउलेसुं दरावट्टिददुद्धमुद्धेसुं विचइलफुल्लेसुं णीसेसकुसुमसंपदं वज्जीअ भममाणा संसज्जदि मे दिट्ठी । *(क)

राजा । अत्र हि किलोचितोपमाननिर्वादिनी ते जिह्वा ।

विदूषकः (अग्रतो निर्दिश्य)(ख †रंगांगणं लदाणच्चकीणं वाहिआली मलआणिलतुरंगस्स पारद्धिरएणं वम्महवाहस्स संकेहसदणं

(क) कलमाङ्कुरकूष्माण्डपाण्डरेषु सितासिन्दुवारपुष्पेषु तत्कालकृतमाञ्जिष्ठेषु अशोकपल्लवेषु निर्जितमञ्जिष्ठाधूसरितमनोहरेषु माधवीकुसुमेषु दधिशरसदृक्षेषु नवमालिकामुकुलेषु इषदावर्तितदुग्धमुग्धेषु विचिकिलपुष्पेषु निःशेषकुसुमसंपदं वर्जयित्वा भ्रममाणा संसज्जते मे दृष्टिः ।

(ख) रङ्गाङ्गणं लतानर्तकीनां वाह्याली मलयानिलतुरङ्गस्य

दव्यवहितोत्तरसमं एव वसन्तागमनमिदं द्वयं लीढं मधु माक्षिकं येन तादृशस्य मम तक्रदुग्धेनानुपानं मरणकरत्वेनातिविषमिति भावः । अस्यार्थस्य माक्षिकास्वादनतत्स्वप्रदर्शनयोस्तक्रदुग्धपानवसन्तागमनयोश्चोपमानोपमेयभावो रूपकं वा तद्व्यञ्जकत्वं द्रष्टव्यम् ॥ २६ ॥

*विदू । कलमकूरः शाल्योदनं कूष्माण्डानि च तद्वत् पाण्डुरेषु सितसिन्दुवारपुष्पेषु तत्कालकृतमञ्जिष्ठेषु अशोकपल्लवेषु निर्जितमञ्जिष्ठाधूसरितमनोहरेषु माधवीकुसुमेषु दधिशरसदृक्षेषु दध्नः शर उपरितनो भागस्तत्सदृशेषु । शरो दध्यग्रभागे स्यादिति कोशः । नवमल्लिकामुकुलेष्वीषदावर्तितदुग्धमुग्धेषु विचकिलपुष्पेषु निःशेषकुसुमसम्पदं वर्जयित्वा भ्रममाणा संसज्यते मे दृष्टिः । सिन्दुवारिन्दुसुरसौ निर्गुण्डीद्राणिकेत्यमरः । निर्जितानि माञ्जिष्ठाधूसरितानि माञ्जिष्ठेयदञ्जितानि वस्त्रादीनि यैस्तानि तादृशानि च तानि मनोहराणि च । अथवा माञ्जिष्ठाधूसरितमनोहरयोः कर्मधारयानन्तरं निर्जितपदेन समं बहुव्रीहिः । वासन्ती माधवीलतेत्यमरः । पुमान् विचकिलो मल्लीभेदे दमनकेऽपिचेति विश्वः ।

†विदू । रंगांगणं लतानर्तकीनां वाह्याली मलयानिलतुरगस्य पापद्धैरण्यं

---

१ C. संसज्जइ.

Digitized by Google

णीसेसकुसुमाणं पीऊसवरीसो हिअअस्स पमदुज्जाणं। ता इमं णिवणअंतो इदो एदु पिअवअस्सो ।

राजा । (पवनस्पर्शमभिनीय) ।

ये दोलाकेलिकाराः, किमपि मृगदृशां मानतन्तुच्छिदो ये
सद्यःशृङ्गारदीक्षाव्यातिकरगुरवो ये च लोकत्रयेऽपि ।
ते कण्ठे लोठयन्तः परभृतवयसां पञ्चमं रागराजं
वान्ति स्वैरं समीराः स्मरविजयमहासाक्षिणो दाक्षिणात्याः॥ २७॥

अपिच । सुरतभरखिन्नपन्नगविलासिनीपानकेलिजर्जरितः ।
पुनरपि विरहिश्वासैर्मलयमरुन्मांसलीक्रियते ॥ २८ ॥

विदूषकः । एवं णेदं । (क)

लंकातोरणमालिआतरलणो माणोसहं सिंघली-
संघाणं दविडीण वम्महमहालासैकणट्टावओ ।

पापर्द्धरण्यं मन्मथव्याधस्य संकेतसदनं निःशेषकुसुमानां पीयूषवर्षो हृदयस्य प्रमदोद्यानम् । तदेतन्निर्वर्णयन्नित एतु प्रियवयस्यः ।

(क) एवमेतत् ।

लङ्कातोरणमालिकातरलनो मानौषधं सिंहली-
संघानां द्राविडीनां मन्मथमहालास्यैकनर्तापकः ।
कर्णाटीचिकुराणां ताण्डवकरो लाटीनां लीलागुरु
रुन्मत्तो महाराष्ट्रीलुण्ठितमनाश्चैत्रानिलो नृत्यति ॥ २९ ॥

मन्मथव्याधस्य संकेतसदनं निःशेषकुसुमानां पीयूषवर्षो हृदयस्य प्रमदोद्यानम् । तदेतन्निर्वर्णयन्नित एतु प्रियवयस्यः। वाह्याली धावनभूमिः। वाहेभ्यो ऽर्हा वाह्या । आली श्रेणी तंचाभूमितियोगेन(नूद्या?) वा धावनभूमिर्द्रष्टव्या। पुमानाक्रीड उद्यानं राज्ञः साधारणं वनं । स्यादेतदेव प्रमदवनमन्तःपुरोचितमित्यमरः प्रमदवनस्य पूर्वोक्तैः पञ्चभी रूपकम्।

विदू । एवमेतत् । लंकातोरणमालिकातरलनो मानौषधं सिंहलीसंघानां द्राविडीनां महालास्यैकनर्तापकः । कार्णाटीचिकुराणां ताण्डवकरो लाटीनां

Digitized by Google

कण्णाडीचिउराणतंडवअरो लाडीण लीलागुरू
उम्मत्तो मरहट्ठिलुंठिदमणो चेत्ताणिलो णच्चदि ॥२९॥

उभौ । इह हि नववसन्ते मञ्जरीरेणुपुञ्ज-
च्छुरणधवलदेहा बद्धहेलं सरन्ति ।
तरलमलिसमूहा हारिहुंकारिकण्ठा
बहलपरिमलालीसुन्दरं सिन्दुवारम् ॥ ३० ॥

राजा । (किंचिद्विहस्य) सखे संस्कृतेऽपि प्रगल्भसे ।

विदूषकः । तुमं पि अह्मारिसजणजोग्गे पाउअमग्गे पउत्तोसि । ता एहि महामंतिकारिदं फलिहसिलामंदिरं केलिकेलासं पेक्खिदुं गच्छह्म । *(क) (इति परिक्रामतः)

विदूषकः । कहिं उण कोंचीकेकारसुन्दरो सद्दो सुणीअदि । (ख)

(क) त्वमपि अस्मादृशजनयोग्ये प्राकृतमार्गे प्रवृत्तोऽसि । तदेहि महामन्त्रिकारितं स्फटिकशिलामन्दिरं केलिकैलासं प्रेक्षितुं गच्छावः ।

(ख) कुत्र पुनः क्रौञ्चीकेङ्कारसुन्दरः शब्दः श्रूयते ।

लीलागुरुरुन्मत्तो मरहट्टीलुण्ठितमनाश्चैत्रानिलो नृत्यति । लङ्कायास्तोरणानां बहिर्द्वाराणां या मालिका अल्पा मालाः पुष्पस्रजस्तास्तरलयति कम्पयति स तादृशः । सिंहल्यः सिंहलद्वीपस्त्रियस्तत्सङ्घानां मानस्यौषधं माननिवर्तकमौषधमित्यर्थः । स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिय इति कोषः । द्राविडीनां महालास्यस्यैको नर्तापको नृत्तकारयिता । कार्णाटीनां ये चिकुरा अलकास्तेषां ताण्डवकरः । लाटीनां लाटदेशीयानां स्त्रीणां लीलानां विलासानां गुरुरुपदेष्टा । मरहट्टीनां महाराष्ट्रस्त्रीणां लुण्ठितानि मानदरिद्रीकृतानि मनांसि येन स तादृशः । चैत्रानिलो वसन्तानिलो नृत्यति मन्दमन्दमावातीति भावः ॥ २९ ॥

इहहीत्यादिः संस्कृतप्राकृतयोः समा जातिः । तरलमिति सिन्दुवारविशेषणम् ॥ ३० ॥

*विदू । त्वमप्यस्मादृशजनयोग्ये प्राकृतमार्गे प्रवृत्तोऽसि । तदेहि महाम-

---

१ A. कुरित. २ A. कांची.

Digitized by Google

राजा । (समाकर्ण्यंस्तदनुसारेणोर्ध्वमवलोक्य) सखे

उपप्राकाराग्रं प्रहिणु नयने तर्कय मना-
गनाकाशे कोऽयं गलितहरिणः शीतकिरणः ।
सुधाबद्धग्रासैरुपवनचकोरैरनुसृतः
किरन् जोत्स्नामच्छां लवलिफलपाकप्रणयिनीम् ॥ ३१॥

विदूषकः । भो वअस्स कहिं सो* (क) ।

राजा । अयमयम् । (सविस्मयमवलोक्य) कथं न दृश्यते किं पुनरिदम् । (वितर्क्य)

यन्मञ्जुसिञ्जितमितो रशनामणीनां
यच्छ्वाससौरभभरोदलयो वलन्ति[3] ।
यद्गीतयः स्खलदलंकृतयश्च लीला-
दोलाविलासतरलस्तदयं मुखेन्दुः ॥ ३२ ॥

(क) भो वयस्य कुत्र सः ।

न्त्रिकारितं स्फटिकशिलामन्दिरं केलिकैलासं प्रेक्षितुं गच्छावः।

कुत्र पुनः क्रौञ्चारिक्रौञ्चारसुन्दरः शब्दः श्रूयते ।

उपप्राकाराग्रमिति विभक्त्यर्थेऽव्ययीभावः । पक्वानि लवलिफलानि लवलिफलपाकः तद्वत्प्रणयो यस्यां सा तत्तुल्येत्यर्थः । लवलिरिति पाण्डुरफलभरानता काचिल्लता ॥ ३१ ॥

*विदू । भो वयस्य कुत्र सः ।

वलन्ति पतन्ति । कलतिवलती कामधेनू ? । लीलार्थं क्रीडार्थं या दोला तस्या विलासैस्तरलश्चञ्चलः यद्वा स्खलन्त्योऽलङ्कृतयो यासु ता लीलाश्चेति पृथक्पदम् । शीतकिरणत्वनिरासेन मुखेन्दुत्वपूर्वोक्ताः सिञ्जितादयस्तत्सहचरितत्वेन हेतुतयोपन्यस्ताः ।

---

१ B. D. °ताम्. २ D. °बला. ३ D. वहन्ति.

Digitized by Google

विदूषकः । सच्चकं तुए जाणिदं जदो हिंदोलदंडिआसिहराइं इदो दीसंति ।* (क)

राजा । (पुनर्दृष्ट्वा) सखे अयमसावाश्चर्यचन्द्रमाः ।

विदूषकः । कधं लुक्कदंसणिआहिं विअ अम्हेहिं समं खेलदि चंदो ।† (ख)

राजा । (निपुणं निरूप्य) सखे । दिष्ट्या वर्धसे स्वप्नदृष्टजनमुखपद्मसंवादिनी लावण्यलक्ष्मीः ।‡

विदूषकः । कीदिसी सा ।§ (ग)

राजा । यादृशी परिपाकपाण्डुराणां शरकाण्डानाम् ।

विदूषकः । करिकलभदन्तच्छेदेसु वि सा अत्थि ज्जेव । (विचिन्त्य) । विरमिदहिन्दोलसद्देण जाणिज्जादि उत्तिण्णा सा । ता एहि अग्गतो गच्छम्ह ¶ । (घ) (इति परिक्रामतः)

(क) सत्यं त्वया ज्ञातं यतो हिन्दोलदण्डिकाशिखराणि इतो दृश्यन्ते ।

(ख) कथं आच्छिन्नदर्शनिकाभिरिवास्माभिः समं खेलति चन्द्रः ।

(ग) कीदृशी सा

(घ) करिकलभदन्तच्छेदेष्वपि सास्त्येव । विरतहिन्दोलाशब्देन ज्ञायते उत्तीर्णा सा । तदेहि अग्रतो गच्छावः ।

---

*विदू । सत्यं त्वया ज्ञातम् । यतो हिन्दोलादण्डिकाशिखराणीतो दृश्यन्ते ।

†विदू । कथमाच्छिन्नदर्शनिकाभिरिवास्माभिः समं खेलति चन्द्रः लुक्कदंसणिआ लपंडाई इति महाराष्ट्रभाषायाम् ।

‡स्वप्ने दृष्टस्य जनस्य यन्मुखपद्मं तत्संवादिनी तदनुकारिणी लावण्यलक्ष्मीः । अस्याश्चर्यचन्द्रमस इति शेषः ।

§विदू । कीदृशी सा ।

¶विदू । करिकलभदन्तच्छेदेष्वपि सास्त्येव । विरतहिन्दोलाशब्देन ज्ञायत उत्तीर्णा सा । तदेह्यग्रतो गच्छावः ।

---

१ A. शरपाकपाण्डुराणाम्.

Digitized by Google

विदूषकः । इदं तं केलिकेलासं । ता पविसीअदु । * (क) (तथा कुरुतः)

राजा । उद्दण्डडिण्डीरपिण्डपरिपाण्डुरेण महसा महाकैलास-मेवेदम् †।

विदूषकः । इदो दाव ललिअफालिहगब्भभवणभित्तिचित्त संठ्ठेसु कम्मेसु णिवेसीअदु दिट्ठी । एस दाव देवो देवीए समं पासआहिणिवेसी आलिहिदो । एसा वि तंबोलकरंडवाहिणी णाअवल्ली । एसा चामरग्गाहिणी पभंजणिआ । एसो अ णअरकंडओ णाम वामणओ । एसो उण मंदुरामक्कडो टप्परकण्णो णाम ‡ । (ख)

(क) इदं तत्केलिकैलासम् । तत्प्रविश्यताम् ।

(ख) इतस्तावल्ललितस्फाटिकगर्भभवनभित्तिचित्रसंस्थेषु कर्मसु निवेश्यतां दृष्टिः । एष तावद्देवो देव्या समं पाशकाभिनिवेशी आलिखितः । एषापि ताम्बूलकरण्डवाहिनी नागवल्ली । एषा चामरग्राहिणी प्रभञ्जनिका । एष च नगरकण्टको नाम वामनकः । एष पुनर्मंदुरामर्कटष्टप्परकर्णो नाम ।

---

*विदू । इदं तत्केलिकैलासं तत्प्रविश्यताम् ।

†उद्दण्डो बहुतरो यो डिण्डीरः फेनः । डिण्डीरोऽब्धिकफः फेन इत्यमरः । तस्य पिण्डवत् परिपाण्डुरेण महसा तेजसा महाकैलासं वास्तवशिवावासमेवैतत् ।

‡विदू । इतस्तावल्ललितस्फाटिकगर्भभवनभित्तिचित्रसंस्थेषु कर्मसु निवेश्यतां दृष्टिः । एष तावद्देवो देव्या समं पाशकाभिनिवेशी पाशकं अक्षसाध्या क्रीडा तदभिनिवेशवान् आलिखितः । एषापि ताम्बूलकरण्डवाहिनी नागवल्ली एषा चामरग्राहिणी प्रभञ्जनिका । एष नगरकण्टकः । रअणकरण्डओ इति पाठे रत्नकरण्डको नाम वामनः । एष पुनर्मन्दुरामर्कटष्टप्परकर्णो नाम । वाजिशाला तु मन्दुरेत्यमरः । टप्परावीषद्बद्धौ कर्णौ यस्य स तथा ।

---

१ C. कैलाससमं वेदम्. A. drops महा. २ C. D. रअणकरण्डओ.

Digitized by Google

राजा । सखे त्वमेषोऽभिलिखितः ।

विदूषकः । (सक्रोधम्) णाहं लिहिदुं जाणिदो। बम्हणी जाणादि जादिसोहं सा मां भणादि तुमं पच्चक्खको देवो त्ति*। (क)

राजा । किमयमुपवने शुको वदति ।

विदूषकः । किं विअ । † (ख)

राजा । अस्ति भवान् देवः किं पुनर्भृङ्गिरिटिः ।‡

विदूषकः । को दुज्जणवअणाणं कण्णं देदि । (अङ्गुल्या निर्दिशन्) एसा उण सोहासमुदयेण उवहसंती विअ देवीं अपुव्वा कावि अहिलिहिदा । § (ग)

राजा । इयमपूर्वास्माकं न पुनरनङ्गस्य । (सम्यग्विलोक्य) सैवेयमस्मन्मनःसागरशशिलेखा । अहो रूपसंपदेतस्याः ।

चक्षुर्मेचकमम्बुजं विजयते वक्त्रस्य मित्रं शशी
भ्रूसूत्रस्य सनाभि मन्मथधनुर्लावण्यपण्यं वपुः ।

(क) नाहं लिखितुं ज्ञातो । ब्राह्मणी जानाति यादृशोऽहं सा मां भणति त्वं प्रत्यक्षो देव इति ।

(ख) किमिव ।

(ग) को दुर्जनवचनानां कर्णं ददाति । एषा पुनःशोभासमुदयेनोपहसन्तीव देवीमपूर्वा काप्यभिलिखिता ।

---

*विदू । नाहं लिखितुं ज्ञातः ।ब्राह्मणी जानाति यादृशोऽहं सा मां भणति त्वं प्रत्यक्षो देव इति ।

†विदू । किमिव ।

‡भृङ्गरीटीरुद्रगणविशेषः ।

§विदू । को दुर्जनवचनानां कर्णं ददाति । एषा पुनः शोभासमुदयेनोपहसन्तीव देवीमपूर्वा काप्यालिखिता ।

चक्षुरिति । सुतनोरिति सर्वत्र चक्षुरादिषु सम्बध्यते । तथा च सुतनोश्चक्षुः कर्तृ । मेचकं नीलमम्बुजमुत्पलं विजयते पराजितं करोति । शशी चन्द्रः

---

१ C. अं बम्हणी जाणादि सोहं. २ D. पूर्वं. ३ A. मंचक. C. वञ्चकम्.

Digitized by Google

लेखा कापि रदच्छदे च सुतनोर्गात्रे च तत्कामिनी-
मेनां वर्णयिता स्मरो यदि भवेद्वैदग्ध्यमभ्यस्यति ॥ ३३ ॥

विदूषकः । (स्वगतम्) का उण एसा देवीपरिवारे । (विचिन्त्य) भोदु कोदूहलेण देवी उल्लहणागदं णिअमादुलजादकं मिअंकवम्मं वारंवारेण विरइदमहिलावेसं धारेदि । तं च दट्ठूण अमुणिअपरमत्थेहिं चित्तअरेहिं सव्वेअ चित्ते आलिहिदत्ति तक्कोमि । ता ण विप्फोलइस्सं । विम्हअदु दाव पिअवअस्सो । (प्रकाशम्) भो वट्टावइस्सं कुमारिआ खलु एसा । एदाए णेवत्थलीलाए लक्खीआदि । * (क)

(क) का पुनरेषा देवीपरिवारे । भवतु कौतूहलेन देवी ओल्लागदं निजमातुलजातकं मृगाङ्कवर्माणं वारंवारं विरचितमहिलावेषं धारयति । तां च दृष्ट्वा अज्ञातपरमार्थैश्चित्रकरैः सैव चित्रे आलिखितेति तर्कयामि । तन्न विस्फोटयिष्ये । विस्मयतां तावत्प्रियवयस्यः । भो वर्धापयिष्ये कुमारिका खलु एषा । एतस्या नेपथ्यलीलया लक्ष्यते ।

सुतनोर्वक्त्रस्य मित्रमस्ति । मन्मथधनुः कर्तृ सुतनोर्भ्रूसूत्रस्य सनाभि सोदरम् । सुतनोर्वपुः सर्वमङ्गं कर्तृ लावण्यपण्यं लावण्यमेव पण्यं विक्रेयमिव पुरः प्रसारितं यत्र तादृशमस्ति । सुतनो रदच्छद ओष्ठे कापिरेखाधरोष्ठमध्यभागे रेखा सा सामुद्रिकशास्त्रे शुभफलत्वेन स्त्रीचिह्नेषु निर्दिष्टास्ति । गात्रेचेति चकारादृगात्रे सर्वशरीरे कापि रेखा रचनाविशेषः । अथवा चक्षुर्मेचकमम्बुजं नीलोत्पलाभिन्नमितिरूपकं तद्विजयते सर्वोत्कर्षेण वर्तते । शशी सुतनुवक्त्रमित्रमित्यादावग्रेऽपि रूपकं स्पष्टमेव । विजयत इत्यग्रेऽपि सर्वत्र सम्बध्यते । तत्तस्मात्स्मरो मदनो यदि वैदग्ध्यं विदग्धतामभ्यस्यति वारंवारमनुसंधत्ते तदैनां कामिनीं वर्णयिता भवेत् ॥ ३३ ॥

*का पुनरेषा देवीपरिवारे । भवतु कौतूहलेन देवी ओल्लागदं ओलः करादिदानपर्यन्तं तद्बन्धकत्वेन स्थापितो मनुष्यस्तत्त्वेनागतं निजमातु-

१ A. रेखा. २ D. ओल्लागदम्. ३ D. अण्णाअपरमत्थेहिं. ४ C. चित्तअरैहि सव्वस्मिं वि. ५ D. णेवच्छो लक्खीअदि.

Digitized by Google

राजा । यथाह प्रियवयस्यः ।

कन्येति सूचयति वेषविशेष एव
यन्नीलचोलकवती लिखितात्र चित्रे ।
पाणिग्रहात्प्रभृति तु प्रमदाजनस्य
नीवीनिवेशसुभगः परिधानमार्गः ॥ २४ ॥

(विमृश्य) अहो वपुःश्रीर्लिखितुर्जनस्य
स्वाकारसंवादि यदत्र चित्रम् ।
इदं च पौरन्ध्रमवैमि कर्म
रेखानिवेशोऽत्र यदेकधारः ॥ २५ ॥

(सम्यग्विलोक्य) तादियं मकरध्वजवैजयन्ती कापि स्वयमेव स्वं लिखितवतीति निर्णीयते ।

विदूषकः । *(क) एव्वं णेदं जदो गरिट्ठजणगोट्ठीसु वि इत्थं

(क) एवमेतत् यतो गरिष्ठजनगोष्ठीष्वपीत्थं किल श्रूयते ।

लजातकं निजमातुलापत्यं मृगाङ्कवर्माणं वारंवारं विरचितमहिलावेषं धारयति । तां च दृष्ट्वाज्ञातपरमार्थैश्चित्रकरैः सैव चित्र आलिखितेति तर्कयामि । तन्न विस्फोरयिष्ये न प्रकटयिष्ये विस्मयतु तावत्प्रियवयस्यः ।

प्रकाशमिति सर्वश्राव्यमित्यर्थः । उक्तं च दशरूपके।नाट्यधर्ममपेक्ष्यैतत्पुनर्वस्तु त्रिधेष्यते । सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च । तत्र । सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्। द्वेधान्यन्नाट्यधर्मोक्त्यं जनान्तमपवारितम् । अन्यन्नियतश्राव्यम् ।त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम्। अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् । यस्य न श्राव्यं तस्यान्तरे शुद्धसर्वाङ्गुलिं वक्त्रानासिकं त्रिपताकालक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तज्जनान्तिकमिति । रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम् ।तदिदं चाग्रे द्रष्टव्यम् ।

भो वर्धापयिष्ये कुमारिका खल्वेषा एतया नेपथ्यलक्ष्म्या दृश्यते ।

*विद् । एवमेवैतत् । यतो गरिष्ठजनगोष्ठीष्वपीत्थं किल श्रूयते । यादृशश्चे-

---

१ D. विशेष.

Digitized by Google

किर सुणीआदि । जादिसो चित्तअरो तादिसी चित्तअम्मरूअरेहा जादिसो कई तादिसी कव्वबंधच्छाअ त्ति ।

राजा । युज्यते । आकृतिमनुगृह्णन्ति गुणाः । अपि च सखे चारायण

क्रमपरिणतरेखामांसलैरङ्गभङ्गै-
र्लघुरपि लिखितेयं दृश्यते पूर्णमूर्तिः ।
अयमपि सुकुमारः सात्विकानां निवेश-
श्चतुरमसृणमुग्धं भावमाविष्करोति ॥ ३६ ॥

विदूषकः । इदो वि देवीं मअणवदी असेसपरिवारा आलिहिदा ।* (क)

राजा । इदमेव रूपरत्नं संभावयामस्तावत् ।

विदूषकः । इहा वि सा अत्थि ज्जेव्व ।† (ख)

राजा । (आत्मगतम्) एकं चक्षुरनेकत्र सा । (विदूषकं प्रति) कासौ ।

विदुषकः । इअमिअं ।‡ (ग)

यादृशश्चित्रकरस्तादृशी चित्रकर्मरूपरेखा यादृशः कविस्तादृशी काव्यबन्धच्छायेति ।

(क) इतोऽपि देवी मदनवत्यशेषपरिवारालिखिता ।
(ख) इहापि सास्त्येव । (ग) इयमियम् ।

त्रकरस्तादृशी चित्रकर्मरूपरेखा यादृशः कविस्तादृशी काव्यबन्धच्छायेति

*इतोऽपि देवी मदनवती अशेषपरिवारालिखिता ।

†विदू । इहाऽपि सास्त्येव ।

‡विदू । इयमियम् ।

---

१ C. परिणति. २ A. वर्तिः. ३ B. C. परिभावा एसा.

Digitized by Google

राजा । (विलोक्य सोत्कण्ठम्)

येनोत्पलानि च शशी च मृणालिकाश्च
रम्भालताश्च कमलानि च निर्मितानि ।
नूनं स एव मृगशावदृशोऽपि वेधाः
सृष्टिक्रमो यदयमेकतया चकास्ति ॥ ३७ ॥

विदूषकः । (स्तम्भे शालभञ्जिकां विलोक्य) इअं वि सा ज्जेव ।* (क)

राजा । इयमपि सास्मद्विलोचनचकोरचन्द्रिका । (विलोक्य सोत्कण्ठम्)

सा दुग्धमुग्धमधुरच्छविरङ्गयष्टि-
स्ते लोचने तरुणकेतकपत्रदीर्घे ।
कम्बोर्विडम्बनकरश्च स एष कण्ठः
सैवेयमिन्दुवदना मदनायुधं या ॥ ३८ ॥

(सवितर्कम्)

न स्वप्नानुभवस्य कश्चिदपरः सब्रह्मचारी मम
स्यात्सङ्कल्पकृतश्चकास्तु मनसः कस्यैष लेखाक्रमः ।

(क) इयमपि सैव ।

येनेति । येनोत्पलादीनि निर्मितानि मृगशावदृशोऽस्या नूनं निश्चयेन स एव वेधा निर्माता । यद्यस्मात्कारणादयं सृष्टिक्रम उत्पलादिर्मृगशावदृगन्तश्चैकतया एकजातीयत्वेन चकास्ति शोभते ॥३७॥

*विदू । इयमपि सैव ।

कम्बोः शङ्खस्य विडम्बनकरोऽनुकर्ता । इयमिन्दुवदना चन्द्रमुखी सैव या मदनायुधमिति रूपकम् ॥३८॥

न स्वप्नेति । अपरस्तद्भिन्नः कश्चिन्मम स्वप्नानुभवस्य सब्रह्मचारी स-

---

१ A. C. विलोचनचन्द्रिका. २ A. पन्नगर्भे. ३ D. वा. ४ C. स्वस्यानुभवस्य. ५ C. चकास्ति. ६ C. यस्यैष.

Digitized by Google

तन्मन्ये क्वचिदस्त्यसौ कुवलयच्छायामुषा चक्षुषा
यत्सादृश्यपरिग्रहादिह दृशौ दीर्घे समावेशिते ॥ २९ ॥

(विलोक्य) भवतु । पुनर्योग्यस्थानविन्यासमासादयतु स्वप्नहारैः संचरतु शालभञ्जिकारूपाया अप्येतस्याः कण्ठमूलम् । अलंकरोतु बालविचकिलवल्लीं कोरकनिकुरम्बः । (इति तथा करोति)

विदूषकः । इदो वि चित्तगदा स ज्जेव । (सोल्लासम्) मिअंकप्पतिबिंबमालाहिं विप्पलद्धम्हि । अअं उण पच्चक्खो पुण्णिमाचन्दो* । (क)

राजा । क्व सा पुनरसावस्मन्नयनामृतवर्तिः ।

विदूषकः । इअमिअं जा हरिणंकखण्डपंडरेहिं तिरिच्छेहिं दिट्ठिच्छडाकडक्खेहिं विप्फुरेदि दिम्मुहाइं पाणिसंचरेणण विच्छुरेदि कंकोलिपल्लवाइं चरणचालणेण विरएदि पंकअसंकासमाउलाइं भमरउलाइं† । (ख)

(क) इतोऽपि चित्रगता सैव । मृगाङ्कप्रतिबिम्बमालाभिर्विप्रलब्धोऽस्मि । अयं पुनः प्रत्यक्षः पूर्णिमाचन्द्रः ।

(ख) इयमियम् । या हरिणाङ्कखण्डपाण्डुरैस्तिरश्चीनैर्दृष्टिच्छटाकटाक्षैर्विस्फोरयति दिङ्मुखानि पाणिसंचारणेन विच्छुरयति कंङ्केलिपल्लवानि चरणचालनेन विरचयति पङ्कजशङ्कासमाकुलानि भ्रमरकुलानि ।

तीर्थो न स्यान्न घटते एष मनसः संकल्पकृतः संकल्पमात्रेण कृतो नतु वार्तिकादिना कृतो रेखाक्रमः कस्य चकास्तु । तत्तस्मात्कारणात् कुवलयस्य नीलोत्पलस्य छायां कान्तिं मुष्णाति तादृशेन चक्षुषोपलक्षितासौ बाला क्वचिदस्मदविज्ञातप्रदेशेऽस्ति सादृश्यपरिग्रहादिह चित्रकर्मलिखितायामस्यां दृशौ दीर्घे समावेशिते दृशावुद्दिश्य दैर्घ्यसमावेशो विधीयते ।

*विदू । इतोऽपि चित्रगता सास्त्येव । मृगाङ्कप्रतिबिम्बमालाभिर्विप्रलब्धोऽस्मि । अयं पुनः प्रत्यक्षः पूर्णिमाचन्द्रः ।

†विदू । इयमियम् । या हरिणांकखण्डपाण्डुरैस्तिरश्चीनैर्दृष्टिच्छटाकटाक्षै

---

१ A. क्वचिदस्त्ययं. २ C. स्वहारः. A. स्तन्यहारः. ३ A. शालभञ्जिकाया. ४ D. नयनामृतवृष्टिः. C. नयनकपूरवर्तिः. ५ D. संचरिष्य. C. संचलनेन. A. संचरणं.

Digitized by Google

राजा । भवदाशंसिता सत्यस्वप्नतैव जाता । (विलोक्य) सैवेयं सञ्जीवनौषधिर्मकरध्वजस्य विशल्यकरणौषधिर्मे हृदयस्य । (विभाव्य)

मात्रानर्तनपण्डितभ्रु वदनं किंचित्प्रगल्भे दृशौ
स्तोकोद्भेदनिवेशितस्तनमुरो मध्यं दरिद्राति च ।
अस्या यज्जघनं घनं च कलया प्रत्यङ्गमेणीदृशः
सत्यंकारमिव स्मरैकसुहृदा तद्यौवनेनार्पितम् ॥ ४० ॥

विस्फोरयति दिङ्मुखानि पाणिसंचारणेन विच्छुरयति कङ्केलिपल्लवान् चरणचालनेन विचयति पङ्कजशङ्कासमाकुलानि भ्रमरकुलानि ।

मात्रेति । अस्या इति प्रत्येकमभिसम्बध्यते यदस्या एणीदृशो वदनं मुखं मात्रयांशेन । मात्रा परिच्छेदेऽल्पे च परिमाण इत्यमरः । यन्नर्तनं तत्र पण्डिते विदग्धे भ्रुवौ यत्र तादृशमस्ति नतु सर्वात्मना नर्तने भ्रुवौ पण्डिते दृशौ किञ्चित्प्रगल्भे नतु सर्वात्मना कटाक्षविक्षेपसमर्थे । उरो वक्षःस्थलं स्तोकं अल्प उद्भेदो ययोस्तादृशौ निवेशितौ स्तनौ यत्र तादृशं नतु स्तनयोरनल्प उद्भेदः । मध्यं दरिद्राति कृशं भवति परं तु नाद्यापि मुष्टिमेयं जघनं कटिपुरोभागः । क्लीबे तु जघनं पुर इत्यमरः । घनं निबिडं । न तु कटिपश्चाद्भागो नितम्बरूपो रथाङ्गवद्विस्तीर्णस्तत्तस्मात्कारणात् स्मरैकसुहृदा स्मर एव एको मुख्यः सुहृद्यस्य तादृशेन यौवनेन अस्या एणीदृशो मृगीदृशः प्रत्यङ्गमङ्गं प्रतीति प्रत्यङ्गं सत्यङ्कारम् । क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियामित्यमरः । सत्यं करोति क्रीतं विक्रीतं वा तत्सत्यंकारं बहुमूल्यवस्तुनः क्रयविक्रयवेलायां किञ्चिद्दत्वा क्रयविक्रयौ सत्यौ क्रियेते तन्महाराष्ट्रभाषया विसार इति प्रसिद्धम् । तत् सत्यंकारं कलया चातुर्येण षोडशभागेन वार्पितमेवेत्युत्प्रेक्षा । यौवनेन हि शैशवाक्रान्तमस्याः प्रत्यङ्गं कान्तिरूपं चातुर्यरूपं वा सत्यंकारं दत्वा । अथवा भ्रुवोर्नर्तनं दृशोः प्रागल्भ्यं स्तनयोरनल्प उद्भेदो मध्यस्य मुष्टिमेयत्वं श्रोण्याश्च रथांगवद्विस्तीर्णत्वादिकं यावद्यावत्तव्यमस्ति तन्मध्ये षोडशांशरूपं सत्यंकारं दत्वा

---

१ D. भवत्प्रशंसिता. २ C मेऽरुषःपदस्य. A. मेरूपपदस्य. ३ C. मध्यो. ४ A. प्रत्यय.

Digitized by Google

विदूषकः । उल्लसिदभूलदेण उदंगुलिकरकमलेण इमिणा संढ्ढाणेण एसा किं उण कुणंती चिट्ठदि । *(क)

राजा । यद् भ्रूलेते[1] तरलिते यदुदङ्गुलीकः
पाणिः पुरो यदपि चक्षुरलम्बलक्ष्यम्[3] ।
उन्मुद्रिताधरदलं[4] च यदास्यमस्या
स्तत्काव्यकर्मणि निषक्तमवैमि चेतः ॥ ४१ ॥

विदूषकः । एवं णेदं जदो पुरदो इमाए अद्धलिहिदा अक्खरावली चिट्ठदि । †(ख)

राजा । (वाचयति)

विधत्ते सोल्लेखं कतरदिह नाङ्कं[5] तरुणिमा ।

(क) उल्लसितभ्रूलतेन उदङ्गुलिकरकमलेनानेन संस्थानेनैषा किं पुनः कुर्वती तिष्ठति ।

(ख) एवमेतत् । यतः पुरतोऽस्या अर्धलिखिताक्षरावली तिष्ठति ।

स्वीयत्वेन कृतमास्ते । अशेषतो दातव्यं दत्वा शैषवाधिकारं दूरीकृत्य स्वीयोऽधिकारः कर्तव्यस्तत्रापि स्मरैकसुहृदेत्यनेन मत्सुहृदः स्मरस्य तत्राधिकारो जातोऽस्त्येव तथा च सत्यंकारमात्रेण यदि शैशवापसारणपुरस्सरं ममाधिकारविलम्बस्तदा मुख्यसुहृदः स्मरस्यावष्टम्भेन शैशवमपसार्य मयैतस्या अंगानि क्रमश आक्रान्तव्यान्येवेति ध्वनिरित्यादिकं सुधीभिरनुसंधेयम् ॥४०॥

* विदू । उल्लसितभ्रूलतेनोदङ्गुलिकरकमलेनानेन संस्थानेनैषा किं पुनः कुर्वती तिष्ठति ।

† विदू । एवमेवैतत् । यतः पुरतोऽस्या अर्धलिखिताक्षरावली तिष्ठति ।

विधत्ते सोल्लेखमित्यादिः श्लोकः प्रत्यङ्गचरण इति क्रमेण चतुर्थाङ्के सम्पूर्णो भविष्याते । तत्रैवास्यार्थोऽनुसंधेयः ।

---

१ C. संभाषणेण. २ A. भूतलं. ३ B. C. लक्षम्. ४ A. उन्निद्रित. ५ D. चांगं.

Digitized by Google

(विमृश्य) अहो शिखरिणीपादः। अहो सूक्तियुक्ता वाचः। अहो इयं वैदर्भी रीतिः। अहो माधुर्यमपर्याप्तम्। अहो निष्कम्पाः प्रसादः।

विदूषकः। तो उचिदकालमभिसारीअदु सुंदरी। पीअदु णअणजलिसंपुडेहिं पुण्णिमाअंदो। पूरिज्जंतु (कण्णकुहलाइं सुहासिदसाअरेहिं। णच्चीअदु, रहसुच्चंभिदहत्थो मअणणाडअच्चओ। (क)

राजा। (पदान्तरे स्थित्वा चतुर्दिशमवलोक्य) अहो दक्षिणद्वैतं वर्तते। तथाहि

सुतनुरियमितस्ततश्च चित्रे
गुणमुकुरत्व च यावलम्भिकेव्याम

(क) तदुचितकालमभिसार्यतां सुंदरी। पीयतां नयनाञ्जलिसम्पुटैः पूर्णिमाचन्द्रः। पूर्यतां कर्णकुहराणि सुभाषितसागरैः। नृत्यप्यतां रभसोत्तम्भितहस्तो मदननर्तापकः।

शिखरिणीनामकं छन्दस्तस्य लक्षणमुक्तोऽस्ति। शिखरिणीलक्षणं तु। यस्यां प्रान्त्यो ह्रस्वः कलितकमले षष्ठकपरास्ततो वर्णाः पञ्च प्रकृतिसुकुमाराश्च रचिताः। त्रयोऽन्ये सोपान्त्या सुतनु जघनाभोगसुभगे रसैरुद्यैर्यस्यां भवति विरतिः सा शिखरिणी। वैदर्भी रीतिरिति। असमस्तपदा समस्तगुणसम्पन्ना वैदर्भी रीतिः। विदर्भेष्वेषोत्पत्तेः कविप्रसिद्धितस्त्वात्। उक्तं च। असमस्तपदा वृत्तिः समस्तगुणभूषिता। विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यत इति। पृथक्पदत्वं सुश्लक्ष्णत्वं वा माधुर्यं तिष्यमादो ह्रनक्षरनतान्त्यः प्रसादः। श्रुतिमात्रेण शब्दानां ग्रन्थार्थप्रत्ययो भवेत्। साधारणः समग्राणां स प्रसादो गुणः स्मृतः।

* विदू। तत उचितकालमभिसार्यतां सुन्दरी। पीयतां नयनाञ्जलिसम्पुटैः पूर्णिमाचन्द्रः पूर्यन्तां कर्णकुहराणि सुभाषितसागरैः। नृत्यप्यतां रभसोत्तम्भितहस्तो मदननर्तापकः। स्वयमन्यैश्च नृत्यकारयिता मदनो रभसेन हर्षेणोत्तम्भितोऽभिनयार्थे यथायथं त्रयोभिर्हस्तैर्येन तादृशो नृत्यकारणीय इति तात्पर्यार्थः। रभसो वेगहर्षयोरिति कोशः।

---

१ C. वृत्तपादः. २ C. द्विअभकुहराइं. ३ C. साअरो. A. साहासिअसारेहिं. D. °सारेहि. ४ D. चित्रे:. C चके.

स्थितमिह सुतनोर्वपुः प्रतुर्मा
स्मरशरतापकृजं विमुञ्च सीदुम् ॥ ४२ ॥

देवि ! उपसृत्य सुभाषितेन श्रवणे[1] कृतार्थयावः । न खलु आकारमन्तरेण करतलैकदेशेनापि शुक्तिर्विमुञ्चति मौक्तिकानि । (इत्युभौ परिक्रामतः)

विदूषकः । (पुरतः सत्रासं दृष्ट्वा स्फोटनं नाटयित्वा) भो ओसर ओसर । भूदंतरं खलु एदं । ता इमिणा परिकुविददेवीभूलदाभंगकुडिलेण दंडकट्ठेण गाढं ताडयिस्सं ता पेक्खस्सु मे पुरिसआरम् ।† (क)

राजा । तर्हि मालतीकुसुमैः कुकूलं* कल्पयिष्यसि ।

(क) भो अप्सरापसर । भूतान्तरं खल्वेतत् । तदनेन परिकुपितदेवीभूलताभङ्गकुटिलेन दण्डकाष्ठेन गाढं ताडयिष्ये तत्प्रेक्षस्व मे पुरुषकारम् ।

सुतनुरिति । इयं प्रत्यक्षपरिदृश्यमाना सुतनुः स्वयं नायिका । इतस्ततश्च चित्रे प्रदेशभेदेन द्वे चित्रे । अत्रास्मिन् प्रदेशे । इयं गुणैर्यथोचितावयवसंनिवेशैर्गुरुर्माहात्म्यवती शालभञ्जिका पुत्तलिका । एवंप्रकारैः सुतनोर्नायिकाया वपुः कर्तृ । इह वास्तवशरीरस्मरतापसम्बाधिनीं वज्रं पिठरां विभ्रच्च सीदुं चतुर्धा प्रकारचतुष्टयेन स्थितमिह वासगृहे वा स्थितं । स्थितमिति काकुर्विदूषकं प्रति प्रश्नार्थोपेक्षा वा ॥ ४२ ॥

† विदू । भो अपसरापसर भूतान्तरं भूतमन्तरे मध्ये यस्य तादृशं खल्वेतत् । तदनेन परिकुपितदेवीभूलताभङ्गकुटिलेन दण्डकाष्ठेन गाढं ताडयिष्ये तत् प्रेक्ष मे पुरुषकारम् ।

*मालतीकुसुमैर्मालतीपुष्पैः । कुकूलं तुषाग्निं । कुकूलं तण्डुलैः कीर्णं खभ्रे वा तु तुषानल इत्यमरः । दुकूलमित्यपि पाठः ।

---

१ C. सुभाषिते. २ C. श्रवणानि. A. B. श्रवणात्. ३ D. drops करतल. ४ D. मुञ्चति. ५ A. B. ओसक्क. ६ D. ताडिस्सं. ७ D. दुकूलं.

Digitized by Google

विदूषकः । ता किं णु क्खु एदं* । (क)

राजा । सखे । तर्कयामि स्फटिकभित्तेः परतः स्थितया स्वच्छभावादतिसुव्यक्तमानया भवितव्यम् । तदेहि कलिकैलासपक्षिणैनां संभावयावः । (तथा कुरुतः)

विदूषकः । तुरिदतरमवक्कन्ता सा जदो असमंजसा इअं देवीभवणाहिमुही पअपरिवाडी दीसइ † । (ख)

राजा । हृदय स्वस्ति भवते ‡ एनामनुवर्तता स्मर्तव्या वयम् । (नेपथ्ये) जय जय त्रिलिङ्गाधिपते ‡ । सुखाय माध्यन्दिनी सन्ध्या भवतु भवतः । संप्रति हि

धत्ते पद्मलतादलेऽस्तपरि इयं कर्णोत्पलं द्विपः
प्रोप्तस्तम्बरसाभियच्छति शिखी मध्येशिखण्डं शिरः ।
मिथ्या लेढि मृणालकोटिरभसादष्टाङ्कुरं सूकरो
जम्बाले महिषश्च वाञ्छति निजच्छायामहाकर्दमम् ॥ ४१ ॥

(क) तत् किं नु खल्वेतत् ।

(ख) त्वरिततरमपक्रान्ता सा यतोऽसमञ्जसेयं देवीभवनाभिमुखी पदपरिपाटी दृश्यते ।

---

* विदू । तत् किं नु खल्वेतत् ।

† विदू । त्वरिततरमपक्रान्ता सा यतोऽसमंजसा इयं देवीभवनाभिमुखी पदपरिपाटी दृश्यते ।

‡ त्रिलिङ्गानां त्रिलिङ्गदेशानामधिपते स्वामिन् । क्वचित्कलिङ्गाधिपते इत्यपि पाठः ।

धत्त इति । द्विपो हस्ती । पद्मलताया दलं पत्रं ईप्सति इच्छति न तु प्राप्नोति तादृशः सन् इयं स्वीयं कर्णोत्पलमुपरि धत्ते धारयति । शिखी मयूरः तदा आम्रो गुल्मस्तदा रसात् तत्प्राप्तिजन्यं हर्षं मनसिकृत्य मध्येशि

---

१ D. संभावयामः । २ D. समंजसा । ३ C. मनुवर्तमानाः स्मर्तव्या भवता वयम् । ४ C. लेऽभ्युपरि च. A. दलेप्युपरि. ५ A. न्द.स्य

Digitized by Google

अपि च । विशन्तीनां स्नातुं जघनपरिवेषैर्मृगदृशां
तटभुवं यद्भ्यः संप्राप्तं प्रमदवनवाप्यास्तटभुवम् ।
गभीरे तन्नाभीकुहरपरिणाहध्वनि रसत्
कुहुंकारस्फारं रचयति निनादं नमति च ॥४४॥

विदूषकः । भो देवीए भवणं गदुअ मज्झण्हसंज्झा णिव्वत्तिअदु तिण्णा पउत्तिलंभे पअट्टीअदु ।* (क)

(इति निष्क्रान्तौ †)

इति प्रथमोऽङ्कः ।

(क) भो देव्या भवनं गत्वा मध्याह्नसंध्या निर्वर्त्यतां तस्याः प्रवृत्तिलम्भे प्रवर्त्यताम् ।

खण्डं शिखण्डस्य पिच्छस्य मध्ये शिरो निवच्छति स्थापयति । शष्पं बालतृणं घास इति कोशः । अप्रकाण्डे सम्भ्रमोत्थितमरः । रसो गन्धे रसो हर्षे रसः स्वादे प्रकीर्तित इति नानार्थः । शिखण्डश्चूडे पिच्छबर्हे, नपुंसक इत्यमरः । मध्येशिखण्डमिति । परे मध्ये षष्ठ्या वेत्यव्ययीभावः । सूकरो वराहो मृगाधिपस्य विसस्य कोटिरग्रभागस्तत्र रभसेन औत्सुक्यं तस्मादंष्ट्राङ्कुरं अङ्कुरतुल्यां दंष्ट्राम् । दंष्ट्रारूपमेव वाङ्कुरं मिथ्या मृणालास्वादनजन्यरभसालाभेऽपि लोढे आस्वादयति । महिषो विजच्छायारूपं कर्दमं वाञ्छति । नतु कर्दम इव तत्रापि क्रीडां कर्तुं शक्नोति । घर्मवशेन क्षिप्तरोऽपि गन्तुमशक्त्या वृक्षच्छायासरःकर्दमानामलाभेन निजच्छायाकर्दममेव वाञ्छति । चकारो गजादिभिः समुच्चयार्थः । मध्याह्न इति सर्वत्र सम्बध्यते । उद्देश्यविधेयभावव्यत्ययेन गजादीनां कर्णतालादिधारणनियमनादिनाऽस्य समयस्य मध्याह्नत्वं विधेयं न तूद्देश्यमिति व्याख्येयम् ।

विशन्तीनामिति । प्रमदवनवाप्या यद्भ्यः कर्तृभ्यः । स्नातुं स्नानं कर्तुं विशन्तीनां मृगदृशां जघनपरिवेशैर्जघनविस्तारैस्तटभुवं प्राप्तं तद् । गभीरे तासां दृशां नाभिकुहरस्याध्वनि मार्गे रसत् उच्चरन्तो ये कुहुंकाराः कुहू शब्दाः शब्दात्कार इत्यनुशासना (शौः ?) स्फारं विस्तीर्णं बहुतरं निनादं शब्दं रचयति नमति च । नमु प्रह्वीभावे । नम्रं भवति यथावस्थिते भवतीत्यर्थः ॥४४॥

* विदू० । भो देव्या भवनं गत्वा मध्याह्नसंध्या निर्वर्त्यतां निर्वर्त्यतामिति वा तस्याः प्रवृत्तिलम्भे प्रवर्त्यताम् ।

† निष्क्रान्तौ राजविदूषकाविति शेषः ।

इति श्रीवेङ्कटनारायणविरचिते विदूषालभञ्जिकाविवरणे प्रथमोऽङ्कः ।

---

१ C. वाप्यास्तटभुवम्. २ A. नाद्यनि.

Digitized by Google

अथ द्वितीयोऽङ्कः।

(ततः प्रविशतो मिथःसंमुखागतौ* चेट्यौ)

(परिक्रम्य)

एका। (इतरामञ्चले विधाय) हला तरंगिए हिअअप्पविट्ठराअक्खरा विअ लक्खीअसि जं दाणीं संमुहागदं पि मं अणालवीअ पचलिदासि। †(क)

द्वितीया। (समालिङ्ग्य) सहि कुरंगिए। मा कुप्प गोरी मे कुप्पदु जइ मए दिट्ठासि अण्णहिअअत्तणेण। ‡(ख)

कुरङ्गिका। अइ कीदिसं दे अण्णहिअअत्तणं। × (ग)

(क) हला तरङ्गिके। हृदयप्रविष्टराजाक्षरेव लक्ष्यसे यदिदानीं संमुखागतामपि मामनालप्य प्रचलितासि।

(ख) सखि कुरङ्गिके। मा कुप्य। गौरी मे कुप्यतु यदि मया दृष्टासि अन्यहृदयत्वेन।

(ग) आर्ये कीदृशं ते अन्यहृदयत्वम्।

---

* संमुखीन इत्यत्र यथामुखसंमुखस्य दर्शनः ख इति दर्शनमित्यर्थेऽस्मिन्नर्थे खः प्रत्ययः।

† एका चेटीतरां द्वितीयां चेटीमञ्चले वस्त्रप्रान्ते विधाय धृत्वा वदतीति शेषः। इति कवेर्वचनम्। हलेति आरभ्य चेटीवचनम्। हंजे हंजे हलाह्वाने नीचां चेटीं सखीं प्रतीति कोशः। सखि तरङ्गिके हृदयप्रविष्टराजाक्षरेव लक्ष्यसे यदिदानीं संमुखागतामपि मामनालप्य प्रवृत्तासि चलितासि। प्रवृत्तिस्तु प्रवाहे स्यादुदन्ते च प्रवर्तने।

‡ द्वितीया। सखि कुरंगिके मा कुप्यस्व गौरी मे कुप्यतु यदि मया दृष्टा स्यान्यहृदयत्वेन। गौरी मे कुप्यत्विति गौरी दुर्गा ममानिष्टं करोत्विति शपथोक्तिः। एवमन्योन्यमुखेन तरंगिकाकुरंगिकेति च तयोर्नाम निर्दिष्टम्।

× कुरं। अपि कीदृशं तेऽन्यहृदयत्वम्।

---

१ D. अणालक्खीअ. २ D. पडदासि. B.C. पलदासि. ३ C. कुप्पदु गोदी जइ एअ मे दिट्ठासि. D. गोउरी कुप्प

तरङ्गिका । तादिसं जादिसेण तवा वि पुरदो मंतअंतीए उक्कंपदि हिअअं *। (क)

कुरं । हिअअणिव्विसेसम्मि जणे आसंकात्ति कोदूहलं मे पुच्छीवेदि +। (ख)

तरं । जं वा तं वा भोदु ण पच्छादइस्सं ण हि सिणेहो जुत्ताजुत्तमणुरुज्झदि †। (ग)

कुरं । अदो जेव्व मे आसंघो । कधं विअ सहकारलट्ठीए कलकंठी कुंठिदपणआ ‡। (घ)

तरं । अत्थि एव्वं तधा वि एवं भणीअदि मंतस्स रक्खणं कज्जसिद्धीए लक्खणं §। (ङ)

(क) तादृशं यादृशेन तवापि पुरतो मन्त्रयन्त्या उत्कम्पते हृदयम् ।

(ख) हृदयनिर्विशेषे जने आशङ्कते कौतूहलं मां प्रच्छयति ।

(ग) यद्वा तद्वा भवतु न प्रच्छादयिष्ये नहि स्नेहो युक्तायुक्तमनुरुध्यते ।

(घ) अत एव मे आसंघः । कथमिव सहकारयष्ट्या कलकण्ठी कुण्ठितप्रणया ।

(ङ) अस्त्येवं तथाप्येवं भण्यते मन्त्रस्य रक्षणं कार्यसिद्धे लक्षणम् ।

---

* तरं । तादृशं यादृशेन तवापि पुरतो मन्त्रयन्त्या उत्कम्पते हृदयम् ।

+ कुरं । हृदयनिर्विशेषे जने आशंकेति कौतूहलं मां प्रच्छयति ।

† तरं । यद्वा तद्वा भवतु न प्रच्छादयिष्ये नहि स्नेहो युक्तायुक्तमनुरुध्यते ।

‡ कुरं । अत एव मे आसंघो । आश्वासो विचार इत्यपि केचित् । कथमिव सहकारयष्ट्यां कलकण्ठी कोकिला कुण्ठितप्रणया । प्रणयः प्रेम्णि विस्रम्भे (याच्चा ?) प्रसरयोरपीति विश्वः ।

§ तरं । अस्त्येवं तथाप्येवं भण्यते मन्त्रस्य रक्षणं कार्यसिद्धेरा लक्षणमिति ।

---

१ D. adds मे. २ C. विज्ञावेदि. ३ C. अणुभोदि. ४ C. अभणा.

Digitized by Google

कुरं । मा एवं भण । कधं विअ जीअंतादो किकलासादो सिरसुवण्णं पावीअदि * । (क)

तरं । ता सुणीअदु पिअसही । अत्थि एत्थ कुंतलेसो चंडमहासेणो णाम राआ । तस्स णिअरज्जपरिब्भट्ठस्स इह आगदस्स सुदा कुवलअमाला णाम । सा णम्मदामज्जणुत्तिण्णा देवेण दिट्ठा हिअअं च से पाविट्ठा तं च पदीच्छिदवदी देवी णिअमादुलचंदवम्मसुदस्स मिअंकवम्मस्स किदे । तण्णिमित्तं च विवाहोवअरणाइं सज्जीकादुं पेसिदम्हि । तग्गदमणाए मए ण तुमं पेक्खिदासि + । (ख)

(क) मैवं भण । कथमिव जीवतः कृकलासात् शिरःसुवर्णं प्राप्यते ।

(ख) तत् शृणोतु प्रियसखी । अस्त्यत्र कुन्तलेशश्चण्डमहासेनो नाम राजा । तस्य निजराज्यपरिभ्रष्टस्येहागतस्य सुता कुवलयमाला नाम । सा नर्मदामज्जनोत्तीर्णा देवेन दृष्टा हृदयं चास्य प्रविष्टा । तां च प्रतीष्टवती देवी निजमातुलचन्द्रवर्मसुतस्य मृगाङ्कवर्मणः कृते । तन्निमित्तं च विवाहोपकरणानि सज्जीकर्तुं प्रेषितास्मि । तद्गतमनसा मया न त्वं प्रेक्षितासि ।

---

* कुरं । मैवं भण । मन्त्राक्षणमित्यादिकं मा भणेत्यर्थः । कथमिव जीवत कृकलासात् शिरःसुवर्णं प्राप्यते । तच्छिरसि सुवर्णं वर्तते मयूरचन्द्रकेषु तामिव । उक्तं च रामायणे उत्तरकाण्डे । अथ ब्रवीद्वैश्रवणः कृकलासं गिरौ स्थितं हैरण्यं सम्प्रयच्छामि वर्णं प्रीतस्तवाप्यहम् । सहिरण्यं शिरो नित्यं भविष्यति तवाक्षयमिति । सटः कृकलासः स्यादित्यमरः ।

+ तरं । तत् शृणोतु प्रियसखी । अस्त्यत्र कुन्तलेशश्चण्डमहासेनो नाम राजा तस्य निजराज्यपरिभ्रष्टस्येहागतस्य सुता कुवलयमाला नाम सा नर्मदामज्जनोत्तीर्णा देवेन दृष्टा हृदयं चास्य प्रविष्टा । तां च प्रतीच्छितवती देवी निजमातुलचंद्रवर्मसुतस्य मृगांकवर्मणः कृते तन्निमित्तं च विवाहोपकरणानि सज्जीकर्तुं प्रेषितास्मि । तद्गतमनसा मया न त्वं प्रेक्षितासि ।

---

१ D. सुणदु.

Digitized by Google

कुरं । अहो देवीए विअक्खणत्तणं । एवं किल कदे सवत्ति-लंभो पडिकदो भोदि । चंदवम्मंमादुलस्स सिणेहो अ दंसिदो भोदि * । (क)

तरं । तुमं उण कहिं पत्थिदासि + । (ख)

कुरं । अज्ज देवीए अलीअविवाहेण विडंबिदुं आरद्धो अज्ज-चाराअणो । तस्स विवाहसामग्गिं उप्पादेदुं अहं पेसिदा ता एहि दुवे वि अम्हे जधासमीहिदसिद्धीए गच्छम्ह ‡ । (ग)

(इति निष्क्रान्ते) †

। इति प्रवेशकः । ×

(क) अहो देव्या वैचक्षण्यम् । एवं किल कृते सपत्नी-लम्भः प्रतिकृतो भवति । चन्द्रवर्ममातुलस्य स्नेहश्च दर्शि-तो भवति ।

(ख) त्वं पुनः कुत्र प्रस्थितासि ।

(ग) अद्य देव्या अलीकविवाहेन विडम्बयितुमारब्ध आर्य-चारायणः । तस्य विवाहसामग्रीमुत्पादयितुमहं प्रेषिता । तदे-हि द्वे अप्यावां यथासमीहितसिद्धये गच्छावः ।

---

* कुरं । अहो देव्या विचक्षणत्वं । एवं किल कृते सपत्नीलम्भः प्रतिकृतो भवति चंद्रवर्ममातुलस्य स्नेहो दर्शितो भवति ।

+ तरं । त्वं पुनः कुत्र प्रस्थितासि ।

‡ कुरं । अद्य देव्या अलीकविवाहेन विडम्बयितुमारब्ध आर्यचारायणस्त-स्य विवाहसामग्रीमुत्पादयितुमहं प्रेषिता । तदेहि द्वे अपि आवां यथासमी-हितसिद्धये गच्छावः ।

† इति निष्क्रान्त इति कञ्चुकिवचनं । तरंगिकाकुरंगिके इति शेषः ।

× प्रवेशक इति चेटीद्वयप्रवेशानन्तरं एतावान् संदर्भः प्रवेशकपदेनोच्यते ।

---

१ D. adds देवस्स. २ C. जहसमीहिदासिद्धिं कादुं.

Digitized by Google

(ततः प्रविशति सोत्कण्ठो राजा विदूषकश्च)

राजा । (मदनाकृतमभिनीय)

तस्मिन् पञ्चशरे स्मरे भगवता भर्गेण भस्मीकृते
जानामीक्षणसायकं कमलभूः कामान्तरं निर्ममे ।
यस्यामीभिरितस्ततश्च विशिखैरापुङ्खमालम्भि-
र्जातं मे विदलत्कदम्बमुकुलस्पष्टोपमानं वपुः ॥ १ ॥

(संतापमभिनीय)

विलीयेन्दुः साक्षादमृतरसवापी यदि भवेत्
कलङ्कस्तत्रत्यो यदि च विकचेन्दीवरवनम् ।
ततः स्नानक्रीडाजनितलघुभावैरवयवैः
कदाचिन्मुच्येयं मदनशिखिपीडाव्यतिकरम् ॥ २ ॥

अपि च । सखे चारायण

द्विधाविभागः सर्वस्यापीह वस्तुतः । सूच्यमेव भवेत् किञ्चिद्दृश्यश्रव्यमथापरमिति पूर्वमभिधाय । अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् । विष्कम्भचूलिकाङ्कास्यावतारप्रवेशकैः । एवं पञ्चभिरभिनेयपात्रस्य प्रवेशं सूचयेदित्यभिहितानां विष्कम्भादीनां लक्षणानि शुद्धमिश्रादिभेदांश्च सोदाहरणा दशरूपकादौ विस्तरेण प्रतिपादिता इति नेह तन्यन्ते । संक्षेपतस्तु । अधमपात्रेण पात्राभ्यां वा प्राकृतभाषिभ्यां सूच्येतिवृत्तसूचनं प्रवेशकः इति । उक्तं च दशरूपके । तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः । प्रवेशोऽकद्वयस्यान्तः शेषार्थस्यैषसूचकः इति । अत्र तद्वदेवेत्यनेन विष्कम्भकलक्षणोक्तं भूतभविष्यदर्थशब्दैकत्वमिति दिश्यते । अंकद्वयस्यान्त इत्यनेन प्रथमांकप्रतिषेध इति ।

तस्मिन्नाति । पञ्चशरे । पञ्च कणिकारमशोकं च चूतं च नवमालिका । नीलोत्पलं च पञ्च पञ्चबाणस्य सायका इयुक्ताः शरा यस्य तादृशे स्मरे कन्दर्पे भगवतैश्वर्यवता भर्गेण महादेवेन भस्मीकृते सति विधिर्ब्रह्माक्षयसायकं क्षोभ्यमीक्षणसायकं कामान्तरमन्यं कामं निर्ममे निर्मितवान् इत्यहं जानामीति योजना । कामान्तरमन्यं कामं ॥ १ ॥

तत इति सप्तम्यर्थे तसिः । तस्मात्पुनरतस्तस्मिन्निमित्तेऽर्थः । मदन एव

Digitized by Google

मन्दादरः कुसुमपत्रिषु पेलवेषु
नूनं बिभर्ति मदनः पवनास्त्रमग्र्यं ।
हारप्रकाण्डसरलाः कथमन्यथामी
श्वासाः प्रनर्तितलदुकूलदशाः सरन्ति ॥ ३ ॥

तत्कुलातिमुक्तकलताच्छन्नस्य तुषारपुञ्जनाम्नः कदलीगृहस्य मार्गमादेशय ।

विदूषकः । (संज्ञया* निर्दिशति)

राजा । केयमक्षुण्णा मौनमुद्रा ।

विदूषकः । (भूमावक्षराणि लिखति)

राजा । अष्टादशलिपिविदो वयं न त्वदीयाक्षरविचक्षणाः ।

विदूषकः । (दन्तैर्जिह्वामवष्टभ्य) भो दिक्खिदोहं मउणे चिट्ठामि †। (क)

(क) भो दीक्षितोऽहं मौने तिष्ठामि ।

शिखी वाहस्तत्संबंधिपीडाया व्यतिकरं संबंधं कदाचित् ननु नियमेन मुञ्चेयं त्यक्ष्ये ॥ २ ॥

कुसुमपत्रिषु पुष्परूपबाणेषु । पत्री रोष इषुर्द्वयोरित्यमरः । पेलवेषु कोमलेषु परमर्मभेदाक्षमेष्विति यावत् । हारप्रकाण्डसरलाः प्रशस्ता हारा हारप्रकाण्डाः श्रेष्ठा हारा इति यावत् तद्वत् सरलाः । मतल्लिका मचर्चिका प्रकाण्डमुद्भूतलतौ । प्रशस्तवाचकान्यभूनीत्यमरः । प्रकाण्डः काम्बशस्यकोरिति हैमः । दुकूलं क्लक्ष्णवस्त्रे चात्क्षौमे चेति मेदिनी । दशा वर्त्तीमवस्थायां वस्त्रान्ते भूम्नि पुंस्त्रियोरिति रभसः । कुलैरतिमुक्तकैर्लतामिश्च च्छादितदरः । तिविशे रथस्थदारुणि रथहुतिमुक्तक कुसुमरः । लता ज्योतिष्मतीदूर्वाशाखावल्लीप्रियंगुषु । दरः कामधनुर्ध्वनिरित्यपि हैमः ॥ ३ ॥

* संज्ञया हस्तादिचेष्टया । संज्ञा नामनि गम्यायां हस्तसंकेतचेष्टयोः ।

† विदू० भो दीक्षितोऽहं मौने तिष्ठामि ।

राजा । किमिति ।

विदूषकः । देवी संपदं ज्जेव्व मं परिणाइस्सादि* । (क)

राजा । तामेव चिरन्तनीं[1] ब्राह्मणीम् ।

विदूषकः । ण हु ण हु+ । (ख)

राजा । तदन्या[2] का ।

विदूषकः । ओल्लागदस्स मिअंकवम्मस्स पुरोहिददुहिदा क्खु सा‡ । (ग)

राजा । किंनामधेयः पुरोहितः ।

विदूषकः । ससासिंगो णाम । जणणी उण मअतिण्हिआ भविस्सधारिणी अ से दुहिदा अंबरमाला णाम । †(घ)

राजा । (स्वगतम्) मन्ये देवी उपहासितुमेनमिच्छति । तज्जोषमास्महे । वर्धतां परिहासलता ।

(ततः प्रविशति चेटी)

(क) देवी साम्प्रतमेव मां परिणाययिष्यति ।

(ख) न खलु न खलु ।

(ग) ओल्लागतस्य मृगाङ्कवर्मणः पुरोहितदुहिता खलु सा ।

(घ) शशशृङ्गो नाम । जननी पुनर्मृगतृष्णिका । भविष्यद्दुहिणी चास्या दुहिता अम्बरमाला नाम ।

---

* विदू । देवी साम्प्रतमेव मां परिणाययिष्यति ।

+ विदू । न खलु ।

‡ विदू । ओल्लागदस्स ओल्लं बंधकत्तं तेनागतस्य मृगांकवर्मणः पुरोहितदुहिता खलु सा ।

† विदू । शशशृंगो नाम जननी पुनर्मृगतृष्णिका भविष्यद्दुहिण्याः ? । अस्या दुहिता अम्बरमाला नाम । मालाशब्दो ग्रथितेषु माल्येषु रूढः । तथा चाम्बरमाला वस्त्रपुष्पसंज्ञा ।

---

१ C. चिरन्तनीं. २ C. तर्हि अन्या. ३ C. अंबरपुष्पमाला.

Digitized by Google

चेटी (परिक्रम्य पुरतोऽवलोक्य) कधं एसे देवे चारायणब्राह्मणेण समं कोदूहलकदस्स तुसारपुञ्जस्सेव सन्निहिदे वट्टदि । ता विण्णवेमि देवीसंदिट्ठं । (इत्यस्य) जअदु जअदु भट्टा । देवी विण्णवेदि चाराअणो दुदीआविआहे विआहिदुमारद्धो । ता तुम्हेहिं वरइत्तकेहिं होदव्वं । एदस्स जेव्व एकाए गेहिणीए कदं कअलीहरं ता पविसदु देवो । देवी सपरिअणा ताहं वट्टदि ।* (क)

(इति प्रवेशं नाटयति)

(ततः प्रविशति देवी कृतवधूवेषश्चेटो विभवतश्च परिवारः)

देवी । हला मेहले कुणीअदु जामादुणो मुहावलोअणं ।† (ख)

मेखला । (तथा विधाय शिरसि चाघ्राय) अज्ज चाराअण अवणेसु रत्तसुअं कुणसु तारामेलअं । ‡ (ग)

(क) कथमेष देवश्चारायणब्राह्मणेन सह कौतूहलकृतस्य तुषारपुञ्जस्यैव सन्निहितो वर्तते । तद्विज्ञापयामि देवीसंदिष्टम् । जयतु जयतु भर्ता । देवी विज्ञापयति चारायणो द्वितीयविवाहे विवाहितुमारब्धः । तद्युष्माभिर्वरयितृभिर्भवितव्यम् । एतस्यैव एकया गेहिन्या कृतं कदलीगृहं तत् प्रविशतु देवः । देवी सपरिजना तत्र वर्तते ।

(ख) हला मेखले क्रियतां जामातुर्मुखावलोकनम् ।

(ग) आर्य चारायण । अपनयस्व रक्तशुकं कुरुष्व तारामेलकम् ।

---

* चेटी । कथं एष देवश्चारायणब्राह्मणेन समं कौतूहलकृतस्य तुषारपुञ्जस्यैव सन्निहितो वर्तते तद्विज्ञापयामि देवीसंदिष्टं । जयतु जयतु भर्ता । भर्तः देवी विज्ञापयति चारायणो द्वितीयविवाहे विवाहितुं उद्युक्तस्तद्युष्माभिर्वरयितृभिर्भवितव्यं एतस्यैव एकया गेहिन्या कृतं कदलीगृहं तत्प्रविशतु देवो । देवी सपरिजना तत्र वर्तते ।

† देवी । हला मेखले क्रियतां जामातुर्मुखावलोकनं ।

‡ मेख । आर्य चारायण अपनयस्व । अवनेसु इति पाठे अपनयस्व रक्तं शुकं कुरुष्व तारामेलकं । तारामाक्षिकनिकानां मेलकं संघः परस्परावलोकनं इत्यर्थः ।

---

१ C. तुसारपुंजस्स कथमेषदेवस्स. २ C. विआहेदुं. ३ D. मारद्धो. ४ A. शिरस्याघ्राय.

Digitized by Google

विदूषकः । (तथा करोति)

देवी । मेहले तुरितं देवावेसु भामरीओ जेण पज्जलिदे हुदवहे लाअंजलीओ मुच्चंति । * (क)

विदूषकः । (तथा कृत्वा) दुदीअब्रह्मणि धुवं सत्तारिसिमंडलं च पेच्छ । † (ख)

चेटः । (विलोक्य) दिट्ठधुओ दिट्ठसत्तारिसिमंडलो संवुत्तोम्हि । ‡ (ग)

विदूषकः । अयि मुद्धे दिट्ठधुआ दिट्ठसत्तारिसिमंडला संवुत्तम्हि त्ति भण । +(घ)

(चेटविदूषकौ पुनःपुनस्तथाभिधत्तः)

चेटः । ×अज्ज चाराअण देवीदासो बंधुलो क्खु अहं तुए परिणाआमि । ण सुणीअदि दीवंतरे वि एसावत्था जं पुरिसो

(क) मेखले त्वरितं दापयस्व भ्रामर्यो येन प्रज्वलिते हुतवहे लाजाञ्जलयो मुच्यन्ते ।

(ख) द्वितीयब्राह्मणि ध्रुवं सप्तर्षिमण्डलं च प्रेक्षस्व ।

(ग) दृष्टध्रुवो दृष्टसप्तर्षिमण्डलश्च संवृत्तोऽस्मि ।

(घ) अयि मुग्धे दृष्टध्रुवा दृष्टसप्तर्षिमण्डला संवृत्तास्मीति भण ।

---

* देवी । मेखले त्वरितं दापय भ्रामर्यो येन प्रज्वलिते हुतवहे लाजाञ्जलयो मुच्यन्ते ।

† विदू । द्वितीयब्राह्मणि ध्रुवं सप्तर्षिमण्डलं च प्रेक्ष ।

‡ चेटः । दृष्टध्रुवो दृष्टसप्तर्षिमण्डलः संवृत्तोऽस्मि ।

+ विदू । अयि मुग्धे दृष्टध्रुवा दृष्टसप्तर्षिमण्डला संवृत्तास्मीति भण ।

× चेटः । आर्य चारायण देवीदासो बंधुलः खल्वहं त्वया परिणीये । अथ बांधकिनेयः स्याद् बंधुलश्चासतीसुतः । कौलटेयः कौलटेर इत्यमरः । बंधुलस्वरूपं तु मृच्छकटिकेऽप्युक्तं तथा । परगृहललिताःपराभ्रष्टाः पर-

---

१ A. दाक्खु. २ O. पज्जलदि हुदवहो.

Digitized by Google

पुरिसं परिणेदि ईत्थिआ चे इत्थिअं । अंबरमाला उणे अंबरमाला ज्जेव । (क)

विदूषकः । (मेखलां प्रति) आः दासीए पुत्तिए कुट्टिणि भमरिणि टेंटेटेंटाकरणि टुटुसंघलिदे विसमकत्तरि छलिदम्हि तुए ता रक्खेज्जसु अत्ताणं । †(ख)

(सर्वे हसन्ति)

विदूषकः । (परिक्रामति)

राजा । देवि । विलेक्षः क्रुद्धश्चारायणो बंकुलवीथीं प्रति गतः । अस्माभिरपि गन्तव्यम् । ‡ तत् केनचित् कर्पूरद्वीपादा-

---

(क) आर्य चारायण देवीदासो बन्धुलः खल्वहं त्वया परिणीये । न श्रूयते द्वीपान्तरेऽप्येषावस्था यत्पुरुषः पुरुषं परिणयति स्त्री च स्त्रियम् । अम्बरमाला पुनरम्बरमालैव ।

(ख) आः दास्याः पुत्रिके कुट्टिनि भ्रमरिणि टेंटेटेंटाकारिणि दुष्टसंघट्टिते विषमकर्तरि छलितोऽस्मि त्वया तद् रक्षस्वात्मानम् ।

पुरुषैर्जनिताः परांगनासु । परधननिरता गुणेष्ववाच्या गजकलभा इव बंधुला ललाम इत्यादि । न श्रूयते द्वीपांतरेऽप्येषावस्था यत्पुरुषः पुरुषं परिणयति स्त्री च स्त्रियं अम्बरमाला पुनरम्बरमालैव ।

† विदू । आः दास्या दुहितः पुराणकुट्टनि भ्रमणशीले टेंटेटेंटाकरणि । टेंटेटेंटा इति कर्णकटुशब्दानुकारः तथाच टेंटेटेंटा एतादृशशब्दविशेषकारिणि । भमरटेंटेटेंटाकराले इति बहुषु पुस्तकेषु पाठः तत्र भ्रमरवत् टेंटं विकृतचक्षुर्गोलको यस्याः सा तादृशि टेंटाशब्देन कराल भयानके । पुष्टसंघटिते विषमकर्तरि छलितोऽस्मि त्वया तद्रक्षस्वात्मानम् ।

‡ नरेन्द्रेण विषवैद्येन । नरेन्द्रो वार्त्तिके राज्ञि विषवैद्येऽपि कथ्यत इति कोषः । आत्मजीवितुं अनुजेतुम् ।

---

१ C. इत्थिआ अंबरपुप्फमाला ज्जेव. २ A drops च. ३ A. drops उण. ४ B. पुए. C. उज्जे. D. दुहिदे. A. B. C. णकुट्टिणि भमरि टेंटेटेंटाकरणि हरटटीति अक्षिगोलकै देशी संघलिदे. ५ D. विलक्षः. ६ D. कुलवर्त्मनि.

Digitized by Google

गतेन नरेन्द्रेण सिद्धौषधैर्माधवीलतामण्डपो माल्यिजष्ठस्तबकालंकृतः कृतः । तददृष्टपूर्वकं चरितमवलोकयितुं प्रियवयस्यमावर्जयितुं च गच्छामः । त्वं पुनस्तदद्भुतं प्रदोषे द्रक्ष्यसि ।

देवी । कुरंगिए देवतादुदीअस्स देवस्स पासपडिवत्तिणी होहि । * (क) (इति सपरिवारा निष्क्रान्ता)

कुरङ्गिका (परिक्रामितकेन) अअं अज्जचाराअणो णवमालिआगुम्मन्तरे बरही विअ मुहमेत्तणिलुक्को चिट्ठदि । † (ख)

राजा । तदानयैनम् ।

कुरङ्गिका । (किंचिदुपसृत्य) भो अम्बरमालावल्लह देवो वाहरदि । ‡ (ग) (इत्यञ्चले कर्षति)

विदूषकः । आः दुट्ठदासि भविस्सकुट्टणि तुमं पि मं उअहससि । ता तुह्मारिसजणहिअअकुडिलेन दण्डकट्ठेण झत्ति ताडइस्सं । +(घ)

(क) कुरङ्गिके देवताद्वितीयस्य देवस्य पार्श्वपरिवर्तिनी भव ।

(ख) अयमार्यचारायणो नवमालिकागुल्मान्तरे बर्हीव मुखमात्रनिलीनस्तिष्ठति ।

(ग) भो अम्बरमालावल्लभ देवो व्याहरति ।

(घ) आः दुष्टदासि भविष्यत्कुट्टनि त्वमपि मामुपहससि । तद्युष्मादृशजनहृदयकुटिलेन दण्डकाष्ठेन झटिति ताडयिष्ये ।

---

* देवी । कुरंगिके देवताद्वितीयस्य देवतया द्वितीयो न तु परिजनेन तस्य एकाकिन इत्यर्थः देवस्य पार्श्वपरिवर्तिनी भव ।

† कुरंगिका । अयं आर्यचारायणो नवमालिकागुल्मान्तरे बर्हीव मुखमात्रनिलीनस्तिष्ठति ।

‡ कुरं । भो अम्बरमालावल्लभ देवो व्याहरति आकारयतीत्यर्थः ।

+ विदू । आः दुष्टदासि भविष्यत्कुट्टनि त्वमपि मामुपहससि तद्युष्मादृशजनहृदयकुटिलेन दण्डकाष्ठेन झटिति ताडयिष्ये

---

१ D. सिद्धौषध. २ A. drops कृतः. ३ A. simply अपूर्वकं. ४ A. आलोकयितुं. ५ C. मुहुत्तेण णिलीणो. ६ C. दुट्ठे दासी भविय.

Digitized by Google

राजा । कुरङ्गिके देवीमनुवर्तस्व । तत्परिवारे कुद्धश्चारायणः ।

(कुरङ्गिका निष्क्रान्ता परिक्रामितेन)

विदूषकः । पिअवअस्स विणोदत्थं महामंतिकारिदा रअणवदी णाम चउक्किआ किं उण कए वि सदेवदव्व एसा । * (क)

राजा । (विलोक्य स्वगतम्) हृदय दिष्ट्या वर्धसे स्वप्नदृष्टजनप्रत्यक्षदर्शनेन । (तं[1] प्रति †) सखे चारायण । सैवेयमस्मन्मनःशिखण्डिताण्डवयित्री वर्षालक्ष्मीः । इदमन्य कथयामि न पुराणप्रजापतिनिर्माणमेषा[2] । यतः

चन्द्रो[3] जडः कदलिकाण्डमकाण्डशीत
मिन्दीवराणि च विसूत्रितविभ्रमाणि[4] ।

(क) प्रियवयस्य विनोदार्थं महामन्त्रिकारिता रत्नवती नाम चतुष्किका । किं पुनः कयापि सदेवतैवैषा ।

---

*विदू । प्रियवयस्य विनोदार्थं महामन्त्रिकारिता रत्नवती नाम चतुष्किका कयापि सदेवतैवैषा ।

† तां प्रति । तामुद्दिश्येत्यर्थः ।

चन्द्र इति । येन पुराणप्रजापतिना चन्द्रो जडः शीतलः शीतं । गुणे तद्वदर्थाः सुशीमः शिशिरो जडः । तुषारः शीतलः शीतो हिमः सामान्यलिंगका इत्यमरः । अक्रियत । कदलिकाण्डम् कदल्या रंभायाः काण्डं स्कन्धः । संज्ञाशब्दत्वाद् ह्रस्वता । कदलकाण्डामिति क्वचित्पाठः । कदली कदलश्च कदल्यम् इति व्याडिः । अकाण्डे अस्थाने असमये शीतं अक्रियत । इंदीवराणि नीलोत्पलानि विसूत्रितो दिनरात्रिभेदेन नैकरूपः विभ्रमो विलासो येषां तथाविधानि । विमुद्रितविभ्रमाणीतिपाठे स्वरसत एवायमर्थोऽवसेयः । अक्रियत । स सुतनोः शोभना—रदादि जडत्वाभावेन हेमंते कुचयोरुष्मवत्त्वात् ग्रीष्मे चातिशीतलत्वाद् अकाण्डशीतत्वाभावेन अहोरात्रेऽपि नयनयोरेकरूपविलासवत्त्वाद् विसूत्रितविभ्रमत्वाभावेन—तनुर्यस्याःसा सुतनुः तस्या विधाता

---

१ D. तां प्रति. २ A. तत्पुराण. D. निपुणप्रजापति°; C. तत्पुराणप्रजापति निर्माणनं नैषा. ३ C. चन्द्रोदयः. ४ D. विमुद्रित.

Digitized by Google

येनाक्रियन्त सुतनोः स कथं विधाता
किं चन्द्रिकां क्वचिदशीतरुचिः प्रसूते ॥ ४ ॥

आपि चास्याः खलु लक्षयामि तामिव वयोऽवस्थामलंकुरुते यस्यां दिवानिशमभिनवाकल्पविकल्पगतमानसा *तिष्ठति ।

उत्तालालकभञ्जनानि कबरीपाशेषु शिक्षारसो
दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः ।
तिर्यग्लोचनचेष्टितानि वचसां छेकोक्तिसंक्रान्तयः
स्त्रीणां म्लायति शैशवे प्रतिकलं कोऽप्येष केलिक्रमः ॥ ५ ॥

निर्माता कथं केन प्रकारेण एतन्निर्मातृत्वं तस्य न घटत इति भावः । यद्वा चन्द्रस्य मुखोपमानत्वं कदलिकाण्डस्य विधाय मूर्धानमधश्चरं चेन्मुखेत्तपोभिः स्वमसारभावं जाड्यं च नीचे(वे?) त् कदली बलीयस्तदा यादृ स्यादियमूरुचारुरित्यादिना-ऊरूपमानत्वमाशंक्य निषेधितमपि पूर्वकविभिरुपमानांतराभावात् स्वीकृतमेव । इंदीवराणां च नयनोपमानत्वं स्पष्टमेव तत्र चन्द्रस्य जलमयत्वाद् वारंवारं वृद्धिक्षयगामित्वाद्वा जडत्वेन एतन्मुखस्य च सर्वदा प्रसादवत्त्वात् सर्वदाभिनवसरस्वतीविलासवत्त्वाच्च जडत्वाभावेन नोपमानोपमेयभावः । कदलिकाण्डस्य चाकांडेऽसमये शैत्यानपेक्षायामपि शीतत्वेन औष्म्यापेक्षायामपि उष्मत्वाभावेन चोर्वीश्च ग्रीष्मकाले शैत्यापेक्षायामेव शीतत्वेन हेमंते औष्म्यापेक्षायामेवोष्मत्वेन च नोपमानोपमेयभावः । इंदीवराणां चाहोरात्रेऽपि नैकरूपत्वेन बहुकालानवस्थायित्वेन च नयनानां च प्रतिक्षणवर्धमानविलासवत्त्वेन चिरस्थायित्वेन च नोपमानोपमेयभाव इत्यभिप्रेत्य कार्यकारणयोरभेदेन तनुपदेन तन्ववयवा उच्यंते । तथा च शोभना तनुः तन्ववयवा यस्याः तस्याः कथं विधातेति व्याख्येयम । किमिति प्रश्ने । क्वचित् कस्मिन्नपि देशे काले वा अशीता उष्मा रुचिर्दीप्तिर्यस्य स उष्मरश्मिः सूर्यः चन्द्रिकां ज्योत्स्नां किं प्रसूते उत्पादयति ॥ ४ ॥

* अभिनवाः अपूर्वाः ये आकल्पानां भूषणानां विकल्पाः रचनाविशेषाः तेषु गतं प्रवणं मानसं यस्या एतादृशी तिष्ठति ।

उत्तालेति । उत्तालं अतिवेगेन वारंवारमिति यावत् । अलकानां चूर्णकुन्तलानां भंजनानि संनिवेशविशेषेणावस्थापनानि । कबरी केशपाशः तस्या

---

१ D. तामिमं. २ C. लाक्षारसो. ३ B. C. वहनं.

Digitized by Google

विदूषकः । (आकारमाकलय्य सोपहासम्) एहि पुरतो भवीअ देवीसआसं गच्छम्ह । * (क)

राजा । सखे पश्यामस्तावत् † ।

विदूषकः । किं तुमं गलिबइल्लो विअ ठाणे ठाणे थक्कसि । ता गुडूचीदंडोव्व भवं इध ज्जेव परोहदु अहं उण देवीसआसं गच्छोहि ‡ (ख)

राजा । सर्वं संभाव्यते त्वयि । किं मधुर्न कुसुमयति ।

विदूषकः । (विहस्य पुरोऽवलोक्य च) भो उप्फालसंफालाइं कैरेदुं लग्गा । § (ग)

(क) एहि पुरतो भूत्वा देवीसकाशं गच्छावः ।

(ख) किं त्वमधुर्वहबलीवर्द इव स्थाने स्थाने श्रांतो भवसि । तद् गुडूचीदण्ड इव भवानत्रैव प्ररोहतु । अहं पुनर्देवीसकाशं गच्छामि ।

(ग) भो उत्फालसंफालानि कर्तुं लग्ना ।

ग्रन्थिविशेषाः तेषु शिक्षारसः पुनः पुनरुन्मोच्य बन्धनप्रीतिः दंतानां परिकर्म प्रसाधनं नीव्याः वसनग्रन्थेर्वहनं भ्रुवोर्लीस्ययोगो यस्मात् स भ्रूलास्ययोग एतादृशः आग्रहः तिर्यञ्चि च तानि लोचनचेष्टितानि च तानि यथा वचसां वचनानां छेकोक्तयो विदग्धोक्तयस्तासां संक्रान्तयः सो णाणि ? स्त्रीणां शैशवे कौमारे म्लायति अपगच्छति प्रतिकलं कलां कलां प्रतीति प्रतिकलम्। अष्टादश निमेषास्तु काष्ठास्त्रिंशत्तु ताः कला इति निर्दिष्टकालावयवमभिव्याप्य एव पूर्वोक्तः कोऽप्यनिर्वाच्यः केलिक्रमः क्रीडाप्रकारः ॥५॥

* विदू । एहि पुरतो भूत्वा देवीसकाशं गच्छावः ।

† पश्यामस्तावत् । एनामिति शेषः ।

‡ विदू । किं त्वं गलिधुरमनुद्वहन् बइल्लो बलीवर्द इव स्थाने स्थाने थक्कसि श्रांतो भवसि स्तब्धो भवसीति वा । गलिर्दुष्टवृषः शक्तोऽप्यधूर्वह इति हैमः । तद् गडूचीदंड इव भवान् अत्रैव प्ररोहतु अहं पुनर्देवीसकाशं गच्छामि ।

§ विदू । भो उप्फालसंफालोइं । पतनोत्पतनानि कर्तुं लग्ना ।

---

१ C. गलिअरिल्लोव्व. २ C. गडूय उहण्डोव्व इध एव्व तप्पेस होदु३ C. कादुं पउत्ता.

Digitized by Google

राजा । (विहस्य) कन्दुकेन क्रीडति । तथाहि ।

अमन्दमणिनूपुरक्वणनचारुचारिक्रमं[1]
झणज्झणितिमेखलास्खलिततारहारच्छटम्[2] ।
इदं तरलकङ्कणावलिविशेषवाचालितं[3]
मनो हरति सुभ्रुवः किमपि कन्दुकक्रीडनम्[4] ॥ ६ ॥

विदूषकः । *(क) एव्वं णेदं[5] ।

चंचलचलणचेल्लिवक्किमवेल्लिदचोलअंचलं[6]
चेल्लिरवेणिवल्लिहलावणधुअविअइल्लमल्लिअं[7] ।

(क) एवमेतत् ।

चञ्चलचरणचारिवक्रिमवेल्लितचोलाञ्चलं
वलनशीलवेणिवल्लीचालनधुतविचकिलमल्लिकम् ।
राजते घणघणरणद्रसनावलिकिङ्किणीकंकणोच्चयं
चन्द्रमुख्या मदनरङ्गाङ्गणे गेन्दुककेलिताण्डवम् ॥

अमंदेति । अमंदं उच्चैः यन्मणिनूपुराणां रत्नखचितपादभूषणानां क्वणनं शब्दितं तेन चारुः मनोहरः चारीणां । नृत्ये पादस्य विन्यासश्चारिरित्यभिधीयते । इत्युक्तरूपाणां पादविन्यासविशेषाणां क्रमः पारंपर्यं यस्मिन् तत् झणझणितायां झञ्झणीति शब्दायमानायां मेखलायां रसनायां स्खलिता तारस्यात्युज्ज्वलस्य हारस्य छटा अग्रं यस्मिन् तत् । तरलानां कंकणानां हस्तवलयानां वा वल्या श्रेण्या विशेषेण वाचालितं वाचालं जातम् एतादृशं सुभ्रुवः इदं किमपि कंदुकक्रीडनं मनो हरति वशीकरोति ॥ ६ ॥

*विदू । एवमेवैतत् । चंचलचरणचारिवक्रिमवेल्लितचोलांचलं । वल्लनशीलवेणिवल्लीचालनधुतविचकिलमालिकं । राजते घणघणरणद्रसनावलिकिंकिणीकंकणोच्चयं । चन्द्रमुख्या मदनरंगांगणं कंदुककेलिताण्डवं । चंचला

---

१ C. °नेयं क्रीडति. २ C. चारक्रमं. ३ C. क्वणत्कनितमेखले. ४ C. चरणं. ५ C. वलिवंकिमवेल्लितचेलंचलं. ६ C. वेल्लिदवेणीवल्लिहेलावणद्वविअलिअमल्लिअं.

Digitized by Google

रेहइ घणघणरणंतरसणावलिकिंकिणीकंकणुच्चअं
चंदमुहीए मअणेरंगंगणे गेंदुअकेलितंडवं ॥७॥

राजा ।

अस्याः स्वेदाम्बुबिन्दुच्युततिलकतया व्यक्तवक्त्रेन्दुकान्ते-
र्वारंवारेण वेगप्रहणनगणनाकेलिवाचालितायाः ।
तत्पातोत्पाततालक्रमनमितदृशस्ताण्डवोत्तालताली-
लालित्याल्लोभिताःस्मः प्रतिपदमनया कन्दुककीडितेन ॥८॥
तथाहि

चरणयोश्चारिर्नृत्ये विन्यासो यस्मिन् तत् । नृत्ये पादस्य विन्यासश्चारि-रित्यभिधीयते । वक्रिम्णा वेल्लितः कंपायमानः वेष्टित इति वा चोलस्य कूर्पासकस्यांचलो यत्र तत् । वेल्लिराकम्पनशीला या वेणरेव वल्ली लता तस्या हल्लावणं चालनं तेन धुतानि कंपितानि विचकिलानि विचकिल पुष्पाणि मल्लिकापुष्पाणि च यत्र तत् । घणघणेति रणंतः प्राकृते पौर्वापर्य न दोषाय । रसनाकिंकिणीनां आवलिः श्रेणी कंकणानां हस्तवलयानां उच्चयाः समूहाश्च यत्र तत् । मदनस्य कंदर्पस्य रंगांगणं नर्तनशालांगणं इति रूपकं अथवा मदनरंगा मदनविलासवती अंगना मृगाङ्कावली एव यत्र तत् । चंद्रमुख्याः चन्द्रवदनायाः कंदुककेलिसंबंधि ताण्डवं उद्धतं नृत्यं रेहइ राजत इति योजना । ताण्डवोऽस्त्री तृणांतरे भवेदुद्धतनृत्येचेति मेदिनिः॥७॥

अस्या इति । स्वेदाम्बुनः बिंदुभिः कणिकाभिःच्युतः परिमृष्टः तिलकः पत्रवल्ली यस्यास्तस्या भावस्तत्ता तया व्यक्ता प्रकटा वक्त्रेन्दोर्मुखचंद्रस्य कांतिः शोभा यस्याः । वारंवारेण पुनः यद्वेगेन प्रहणनं प्रकर्षेण कंदुक-क्रीडासंप्रदायानुरोधेन हननं आघातः अर्थात् कंदुकस्य । प्रहरणमित्यपिपाठः । तस्य या गणनाकेलिः एकद्यादिगणनरूपा क्रीडा तया वाचालिताया मुखरिताया: । तस्य कंदुकस्य ये पातोत्थाने अधोगमनोर्ध्वगमने ते एव तालश्च कृतपुटादिः । तस्य क्रमेण निमिता अधऊर्ध्वप्रहिता । नमितेत्यपिपाठः । एकदृष्टिर्यया सा तस्याः अमुना कंदुककीडितेन कर्त्री तांडवे उद्धतनृत्ये उत्तालाः सवेगाः यास्ताल्यः कराघातास्तासां लालित्याद् विला

---

१ C. सोइदि. २ D. रंगगणं. ३ D. बिम्ब. ४ D. स्थान. ५ C. लीला. ६ D. प्रतिकल. ७ D. omits तथाहि.

Digitized by Google

(भूयो विभाव्य) अहह । महता वेगेन वर्तते ।

चेलाञ्चलेन चलहारलताप्रकाण्डै-
र्वेणीगुणेन च बलाद्वलयीकृतेन ।
हेलाहितभ्रमरकभ्रममण्डलीभि-
श्छत्रत्रयं रचयतीव चिरं नतभ्रूः ॥ ९ ॥

सातिशयात् हेतोः प्रतिपदं पदं पदं प्रति इति प्रतिपदं प्रतिव्यवसायम् । पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्विति विश्वकोशः । वयं लोभिताः प्रलोभिताः वशीकृता इति यावत् स्मः भवामः ॥ ८ ॥

चेलांचलेनेति । नतभ्रूः हेलयानायासेन । हेलावज्ञाविलासयोरिति विश्वः। आहिता रचिताः भ्रमरकाणां जलावर्तानां भ्रमा इव भ्रमा भ्रमणानि भ्रमणभ्रमः तेषां मंडल्यः समूहाः याः मंडलाकाराणि भ्रमणानीति यावत् । भ्रमणेऽम्बुभ्रमे भृंगे गिरिके चूर्णकुन्तल इति विश्वः । समूहे मंडले न ना इति कोशः । ताभिः संगीतशास्त्रप्रसिद्धाभिः करणैः मंडलीनां करणत्वं नत ुवश्च कर्तृत्वं छत्ररचने । छत्रगतत्रित्वसंख्यायां चेलांचलादीनां त्रयाणां करणत्वम्। तथा च चेलांचलावभिन्नच्छत्रत्रयं कर्म नतभ्रूः कर्त्री मंडलीभिः करणैः रचयतीवेति तात्पर्यम् । अथवा चेलांचलेन वस्त्रप्रांतेन चलाः ये हारलताप्रकांडाः प्रशस्ता हारलता इति यावत् ताभिः । मतल्लिका मचर्चिकाप्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनीत्यमरः । अथवाप्रकाण्डेस्तम्बगुल्मौ इत्यभिधानात् चलहारा एव लताप्रकाण्डानि लतागुल्मास्तैः घनीभूतैः हारैरिति यावत् । वलात् पलात् शिक्षाविशेषादिति यावत् वलयीकृतेन वलयवत् संपादितेन वेण्येव गुणो गुण इव वा वेणीः तेन । चकारस्त्रयाणां चेलांचलादीनां समुच्चयार्थः । यद्वा वलद्वलयीकृतेनेति पाठः। वलत् भ्रमत् यद्वलयं तद्वत् कृतेन वेणीगुणेन । कलतिवलती कामधेनू । एतैस्त्रिभिरपि हेतुभिः छत्रत्रयं कर्म चिरं बहुकालं रचयतीवेत्युत्प्रेक्षा । अथवा चेलांचलेनेति चलेत्यत्रैवान्वेति तथाच हारलताप्रकाण्डैः वेणीगुणेन हेलाहिता याः भ्रमरकाणां ललाटकेशानां भ्रममण्डल्यस्ताभिश्छत्रत्रय मिति व्याख्येयम् । अलकाश्चूर्णकुन्तलाः।ते ललाटे भ्रमरका इत्यमरः।यद्वा हेलाहितभ्रमरकभ्रममंडलीभिरितीत्थंभूतलक्षणे तृतीया । भ्रमराणां समूहः भ्रमरकं भ्रमणं भ्रमः भ्रमरकस्य भ्रमः भ्रमरकभ्रमः तद्वत् मंडल्यः मंडलाकाराः

---

१ A. वलद्वलयीकृतेन. C. बलाद्वेणीकृतेन.

Digitized by Google

(पुनर्निरूप्य)

स्मरशरधिनिकाशं[1] कर्णपाशं कृशाङ्ग्या[2]
रयविगलिततालीपत्रताटङ्कमेकम् ।
वहति हृदयचोरं कुङ्कुमन्यासगौरं
वलयितमिव नालं लोचनेन्दीवरस्य ॥ १० ॥

विदूषकः । भो विरदा गेंदुअखेलणादो । * (क)

राजा । न केवलं विरता सखी । करतलन्यस्तपाणिपद्मा स[3]प्रत्यभिज्ञानमिवास्मानवलोकयति[4] च । पश्य

वक्त्रश्रीजितजर्जरेन्दुमलिनं कृत्वा करे कन्दुकं
क्रीडाकौतुकमिश्रभावमनया ताम्रं वहन्त्याननम् ।
भृङ्गाग्रग्रहकृष्टकेतकदलस्पर्धावतीनां[5] दृशां[6]
दीर्घापाङ्गतरङ्गणैकसुहृदामेषोऽस्मि पात्रीकृतः[7] ॥ ११ ॥

(क) भो विरता गेन्दुकखेलनात् ।

गतिविशेषाः । शेषं पूर्ववत् । ताभिरुपलक्षिता नतभ्रूः चेलांचलेनेत्यादिकरणत्रयेण छत्रत्रयं च मतीवेत्यादि यथात्यं गतं भवति तथा व्याख्येयम् ॥९॥

स्मरस्य मदनस्य शरधिः तूणीरः तन्निकाशं तत्तुल्यम् । निभसंकाशनीकाशप्रतीकाशोपमादयः । कर्णपाशं कर्णःपाश इवेत्युपमा अथवा कर्णः (पाशः)कचांते संघार्थः कर्णांते शोभनार्थक इति विश्वकोशदर्शनात् प्रशोभनं कर्णमित्यर्थः ॥ १० ॥

* विदू । भो विरता कंदुकखेलनात् ।

वक्त्रेति।ताम्रमाननं वहन्त्या अनया नायिकया वक्त्रस्य मुखस्य या श्रीः शोभा तया जितः अत एव जर्जर इव विशीर्णावयव इव जर्जरो य इन्दुस्तद्वन्मलिनं मालिन्यभाजं कंदुकं करे कृत्वा हस्ते धृत्वा कौतुकमिश्रभावं यथास्यादेवं एषोऽहं दृशां पात्रीकृतो विषयीकृतोऽस्मि कंदुकं करे कृते (त्वे) त्यनेनैतत्कंदुकोपमौ स्तनौ मम विद्येते तौ त्वं करे वा कुरु इति ध्वनिः। अग्रे

---

१ A. शरनिधिकाशं. २ D. रप. ३ D. adds किंतु. ४ D. प्रत्यभिज्ञ. ५ A. नालोकयति च. ६ C. शृंगाग्रग्रह. ७ D. कृष्ट. ८ D. दृशा.

Digitized by Google

विदूषकः । भो एहि अणुसरह सुंदरीम् । उब्भिज्जदु पेम्मदुद्दोणी । [2]दीअदु दिट्ठीए पीऊसगंडूसो । दिज्जदु मअणस्स हत्थालंबो । पअट्टदु पंचमझंकारा[3]धिआरो । भोदु विरह[4]उक्कलो परिचारिआवग्गो । मु[5]च्छदु मअरद्धअसंधिविग्ग[6]हो । चिंतावावडदाए कंठट्ठिदजीविदो चाराअणब्भणो । *(क)

(परिक्रम्य सोपानावतरणं नाटयतः)

विदूषकः । अदेवं देवउलं [7]अणक्खरो लेहो जदो ण दीसदि सा × (ख)

(क) भो एहि अनुसरावः सुन्दरीम् । उद्भिद्यतां प्रेमदुर्द्रोणी । दीयतां दृष्ट्यै पीयूषगण्डूषः । दीयतां मदनस्य हस्तालम्बः । प्रवर्ततां पञ्चमझङ्काराधिकारः । भवतु विरहव्याकुलः परिचारिकावर्गः । मूर्छतु मकरध्वजसंधिविग्रहः । चिन्ताव्यापृततया कण्ठस्थितजीवितश्चारायणब्राह्मणः ।

(ख) अदेवं देवकुलमनक्षरो लेखो यतो न दृश्यते सा ।

ग्रहणं ग्रहः अग्रग्रहस्तेन कृष्टानि तथाविधानि भृंगैर्भ्रमरैरग्रग्रहकृष्टानि-च तानि केतकदलानि च तत्स्पर्धावतीनां तत्साम्यभाजामिति दृशामित्यस्य विशेषणम् । दीर्घौ यौ अपांगौ तत्र यत्तरंगणं तरंगवत् प्रसरणं तस्यैकसुहृदां मुख्यसधर्मिणीनामित्यपि दृशामेव विशेषणम् ॥११॥

*विदू । भो एहि अनुसरावः सुंदरीम् । उद्भिद्यतां प्रेमदुर्द्रोणी । दीयतां दृष्टिपीयूषगण्डूषः दीयतां मदनस्य हस्तालम्बः प्रवर्ततां पंचमझंकाराधिकारः भवतु विरहव्याकुलः परिचारिकावर्गः मूर्छतु संधिविग्रहश्चिंताव्यापृततया कण्ठास्थितजीवितश्चारायणब्राह्मणः ।

× विदू । अदेवं देवकुलम् । देवो मेघे सुरे राजि स्यान्नपुंसकमिन्द्रिये । कुलं कुल्ये गुणे देहे गेहे जनपदेऽन्वये इति कोशः । अनक्षरो लेखो यतो न दृश्यते सा ।

---

१ D. ता. २ D. घुट्टीअदु. ३ A. B. C. पीजसगंडूसो. ४ A. D. °हिकारो. C. °हुंकाराधिकारो. ५ D. विरहाउलो. C. विरहुक्कलो. ६ D. मुच्चदु. ७ A. विग्गहं. B. विग्गहा. D. विग्गहचिंतावावडदाए. ८ C. क्षीणाक्खरो.

Digitized by Google

Indl 2006.2

राजा । दृष्टा हरिश्चन्द्रपुरीव नष्टा च । *

विदूषकः । एहि णिउणं णिरूवह्म । सा कहिं पि खंभंतरिदा चिट्ठदि । †(क) (चतुर्दिशमवलोकितकेन)

राजा । (सविषादं भुवमवलोक्य[3])

इयं चरणकुङ्कुमच्छुरितकुट्टिमा मेदिनी-
निवेदयति कन्दुकव्यतिकरं कुरङ्गीदृशः ।
हहा किमिदमद्भुतं न च कृशोदरी दृश्यते-
भवत्ववगतं स्मरः सृजति मोहमायामिमाम् ॥ १२ ॥

(संतोषमभिनीय समन्तादवलोक्य च)

शिखामणिरितोऽरुणास्तिलकयत्ययं मेदिनी
मितो ललितगुम्फनास्तरलवेणिवान्ताः स्रजः ।
इतश्छुरितमन्तरं त्रुटितहारमुक्ताफलै
रितः श्रवणपाशतश्च तलपत्रमास्ते च्युतम् ॥ १३ ॥

(क) एहि निपुणं निरूपयावः । सा कुत्रापि स्तम्भान्तरिता तिष्ठति

---

*हरीश्चन्द्रपुरी गन्धर्वनगरी ।

† विदू । एहि निपुणं निरूपयावः । सा कुत्रापि स्तम्भान्तरिता तिष्ठति । इतोऽस्मिन् प्रदेशे अंतरं मध्यवर्तिप्रदेशांतरालः । अंतरं तु वरीधाने भेदे रंध्रावकाशयोः । त्रुटितो यो हारस्तस्य मुक्ताफलैः छुरितं व्याप्तम् । इतोऽत्रप्रदेशे च तलपत्रं तलस्य तालस्य पत्रं पर्णम्।तलस्ताले तलं खड्गमुष्टौ व्याघातवारणे । वने चपेटे तत्स्त्री तु स्वरूपाधरयोस्तलमिति विश्वः । पत्रं पलाशं छदनं दलं पर्ण छदः पुमानित्यमरः । तत् तलपत्रं कर्तृ श्रवणपाशतः च्युतं निपतितं आस्ते ॥ १३ ॥

---

१ A. दृष्ट्वा. २ D. प्रनष्टा. ३ A. आलोक्य C. adds च at the end. C altogether drops the verse 12. ४ D. कुन्दुक. ५ D. संतोष. ६ C. मम्वरं.

Digitized by Google

IndL 2006.2

विदूषकः । सुट्ठु खलु सुसण्णिवेसं[1] विअ तालवेंटं । (आदाय प्रसार्य च[3]) कधं अक्खराइं[4] । अयि पिअवअस्स जइ कालक्खरिओसि[5] ता पढ एदं*। (क)

राजा । (वाचयति)

विधत्ते सोल्लेखं कतरदिह नाङ्कं तरुणिमा
तथापि प्रागल्भ्यं किमपि चतुरं लोचनयुगे ।

(विभाव्य) अये[6] । द्विपदीयं न पुनरद्यापि चतुष्पदी ।

विदूषकः । पोगंडआ विअ केच्चिरं उद्धजाणुअं[9] चिट्ठिस्सामो । ता एहि मत्तवारणिए उवविसह[7] । (ख)

(तथा कुरुतः) । (नेपथ्ये)

यत्तालीदलपाकपाण्डु वदनं यद्दुर्दिनं नेत्रयो-
र्यत्प्रेङ्खोलितकेलिपङ्कजदलश्वासाःप्रसर्पन्ति च ।

(क) सुष्ठु खलु सुसंनिवेशितमिव तालवृंतम् । कथमक्षराणि । अयि प्रियवयस्य यदि कालाक्षरिकोऽसि तत्पठ एतत् ।

(ख) पौगण्डा इव कियच्चिरमूर्ध्वजानुकं स्थास्यामः । तदेहि मत्तवारण्यामुपविशावः ।

---

*विदू । सुष्ठु खलु सुसंनिवेशमिव तालवृन्तम् । व्यजनं तालवृन्तकमित्यमरः । कथं अक्षराणि । अयि प्रियवयस्य यदि कालाक्षरिकः कालानि कृष्णानि अक्षराणि यस्य वेद्यत्वेन इति कृष्णाक्षरिकोऽसि तत्पठैतत् ।

†विदू । पौगंडा इव व्यंगा इव । विकलांगस्तु पौगंड इत्यमरः । पंचमवर्षादूर्ध्वमादशवार्षिका इति वा । कियच्चिरं स्तब्धजानुकं स्थास्यामः तदेहि मत्तवारिण्यामुपविशामः । बालायं मत्तवारणम्।सैव मत्तवारणी कपोतपालिकेति केचित् । गजदंतैः कृता शाला विज्ञेया मत्तवारणीति अन्ये । वातायनानामग्रे उ (अ) पवेशनार्थं दारुभिः पाषाणैर्वा निर्मितं स्थलमित्यपरे ।

यत्तालीति । वदनं मुखं यत् यस्मात् कारणात् तालीदलपाकपाण्ड पक्वा-

---

१ A. B. सुसण्णिवेसमिव. D. सुसण्णिवेसव्व. २ B. C. तालवत्तं. D. तालछदं. ३ A. omits च. ४ D. अक्खराइं पि, and drops अयि. ५ B. कालवरिओसि. C. लिविण्णोसि. ६ C. drops अये. ७ B. उद्धजाणुअ चिट्ठिस्सामि. ८ C. दलःश्वासाः D. पंकजवनाः श्वासाः

Digitized by Google

गौरी क्रुध्यतु वर्तते यदि न ते तत् कोपि चित्ते युवा
धिक् धिक् त्वां सह पांसुखेलनसखीलोकेऽपि यन्निह्नवः॥१४॥

विदूषकः । (चमत्कृत्य) भो सिहाबंधं करोहि । अमाणुसी वाणी सुणीअदि*। (क)

राजा । भीयन्तरितः कश्चिदभिधत्ते ।

विदूषकः । भो वक्खाणेहि मे† । (ख)

राजा । काचित् कचिदनुरक्ता लज्जावती वयस्यया भिन्नरहस्या क्रियते ।

‡(नेपथ्ये सत्वाक्स्तंभम्) सहीओ किं एत्थ अलिअं संभावेध । (ग)

राजा । वयस्य श्रुतम् ।

विदूषकः । §हीही भो एदं क्खु पंडिदा अलिअविअप्पेहिं

(क) भो शिखाबन्धं कुरु । अमानुषी वाणी श्रूयते ।
(ख) भो व्याचक्ष्व मे ।
(ग) सख्यः किमत्रालीकं संभावयत ।

नि तालीदलानि तालपाकः तद्वत् पाण्डु यच्च नेत्रयोर्दुर्दिनं यथापूर्वं प्रसन्नत्वाभावः यच्च श्वासाः प्रेंखोलितानि कंपितानि क्रीडिपंकजस्य दलानि यथा स्यात् एवं प्रसर्पन्ति । तत् तस्मात् कारणात् ते चित्ते कोऽपि युवा वर्तते यदि न वर्ततेदन्यनुषंगः ? तर्हि गौरी क्रुध्यतु इति शपथः यत् यस्मात् कारणात् सह मिलित्वा पांसुखेलनं धूलिक्रीडा यस्य तादृशः यः सखीलोकः तत्रापि निह्नवः अपलापः तद्वा धिक् ॥ १४ ॥

*विदू । चमत्कृत्य किंचिदंगकंपमभिनीयेत्यर्थः । भो शिखाबन्धं कुरु अमानुषी वाणी श्रूयते ।

†विदू । भो व्याचक्ष्व मे । ‡नेपथ्ये । सख्यः किमत्रालीकं संभावयत ।

§विदू । हीही भो इति विस्मये । एतत् खलु पंडिता अलीकविकल्पैः फ-

---

१ A. C. धिक्कृत्वा सह पांसु.° २ D. खलु.° ३ A. भीत्यन्तरितः. ४ C. वक्खाणेहि. ५ D. लज्जावती च यस्य भिन्नरहस्या.

Digitized by Google

फलचुक्का विअ मक्कलेला मूलमलहंता पल्लवग्गाहिणो होंति मुक्खा उण फणसवणपालआ विअ मूलमणुसरंता फलं पावंति ता सुण अहं जेव्व वक्खाणइस्सं। ण हु एदं सामण्णजणवअणं तुमं जेव्व भणीअसि ण हु मिअलंछणमुज्झिअ ससिकंतपुत्तलिआ बद्धणिज्झरा पासरदि। (क)

राजा। तदिदं तर्के अनाकरे पद्मरागरत्नम्*।

†[पुनर्नेपथ्ये]

कहं तक्खणफालिदसिप्पिसंपुडुम्मुक्कमोतिअच्छाआ।
थक्कंतु तुह धोअंजणा णअणाणं बाहकणा॥ १९॥

(क) हीही भो एतत् खलु पण्डिता अलीकविकल्पैर्विस्मृतफला इव मर्कटा मूलमलभमानाः पल्लवग्राहिणो भवन्ति। मूर्खाः पुनः पनसवनपालका इव मूलमनुसरन्तः फलं प्राप्नुवन्ति। तच्छृण्वहमेव व्याख्यास्यामि। न खल्वेतत्सामान्यजनवचनं। त्वमेव भण्यसे। न खलु मृगलाञ्छनमुज्झित्वा शशिकान्तपुत्तलिका बद्धनिर्झरा प्रसरति।

कथं तत्क्षणस्फालितशुक्तिसंपुटोन्मुक्तमौक्तिकच्छायाः।
विरमन्तु तव धौताञ्जना नयनयोर्बाष्पकणाः॥ १९॥

लचुक्का विअ विस्मृतफला इव मर्कटा मूलमलभंतः पल्लवग्राहिणो भवंति। मूर्खाः पुनः पनसवनपालका इव मूलमनुसरन्तः फलं प्राप्नुवंति। तत् शृणु अहमेव व्याख्यास्ये। न खलु एतत् सामान्यजनवचनम्। त्वमेव भण्यसे। न खलु मृगलांछनमुज्झित्वा शशिकान्तपुत्तलिका बद्धनिर्झरा प्रसरति।

*तदिदम्। भवन्मुखादीदृशवचनोपन्यासरूपं तर्के तर्कये अनाकरे खनिभिन्नप्रदेशे पद्मरागरत्नं उत्पन्नमिति शेषः।

†पुनर्नेपथ्ये। कथं तत्क्षणस्फुटितशुक्तिसंपुटोन्मुक्तमौक्तिकच्छायाः।

---

१ C. फलछुआ. २ A. मक्कडा. ३ C. °डाहिणो. ४ C. उक्खा. ५ C. सुणु. ६ D. अब्बुदं. ७ C. बद्धबिंदुणिअरा प्फुरादि. B. बद्धणिवुशप्यतुरदि? (बद्धणिझरा प्पासरदि). ८ D. पासरादि. ९ C. तर्कय. १०C. अनाकरेऽपि. ११ D. तक्कालप्फुडिद. १२ A. उधाअंजणा. B. उधो अंजगाणं अणाणं. D. तुह धोअंजणाणं.

Digitized by Google

सिक्किहिसि कहं णु पुसिउं पारदरसाछित्तकंचणच्छाअं ।
तणुकदलीए परिपंडुरत्तणं डिंभहरिणच्छि ॥ १६ ॥
कहं णु तए तरलिज्जंति केलिपंकेरुहग्गरुखलणेण ।
णीसासा कट्ठिअहारलट्ठिसंठाणपरिमाणा ॥ १७ ॥
पसिढिलणीविअकंचुअं कहं णु प्फुरइ देहदोव्वल्लं ।
अंगं पुणो वि दिणहरिणंकबिंबपरिपंडुरं कहं णु होइ ॥१८॥
इअ तुह विज्जाहरमल्लदंसणेण प्फुडमिमाओ भंगीओ ।

शक्ष्यसे कथं नु पोषितुं पारदरससिक्तकाञ्चनच्छायम् ।
तनुकदल्याः परिपाण्डुरत्वं डिम्भहरिणाक्षि ॥ १६ ॥
कथं नु त्वया तरल्यन्ते केलिपङ्केरुहाग्रस्खलनेन ।
निश्वासाः कृष्टहारयष्टिसंस्थानपरिमाणाः ॥ १७ ॥
प्रशिथिलनीविककञ्चुकं कथं नु स्फुरति देहदौर्बल्यम् ।
अङ्गं पुनरपि दिनहरिणाङ्कबिम्बपरिपाण्डुरं कथं नु भवति॥ १८॥
इह तव विद्याधरमल्लदर्शनेन स्फुटमिमा भङ्ग्यः ।

थक्कंतु विरमंतु तिष्ठंतु इति वा । तव धौतांजना नयनानां बाष्पकणाः । शक्नोषि शक्ष्यसे इति वा । कथं नु प्रेक्षितुं पारदरससिक्तकांचनच्छायम् । तनुकदल्याः परिपाण्डुरत्वं डिंभहरिणाक्षि । डिंभो बालो यः हरिणस्तन्नयनसदृशनयने कथं नु त्वया तरल्यंते तरलीक्रियन्त इत्यर्थः । केलिपंकेरुहाग्रस्खलनेन निश्वासाः कृष्टहारयष्टिसंस्थानपरिमाणाः । प्रशिथिलनीविककंचुकं कथं नु स्फुरति देहदौर्बल्यम् । अंगं पुनर्दिनहरिणांकबिंबपरिपाण्डुरं कथं नु भवति । इह तव विद्याधरमल्लदेवदर्शनेन स्फुटमिमा भंग्यः । न विना चंद्रं शेफालिकाया विकसंति कुसुमानि ॥ १५-१९ ॥

११ C. कहं तक्खणफोडितसिप्पिसंपुडुम्मुक्कमोत्तिअच्छाआ ।
कहं तुमं अणंजनादो णअणजुआदो बाहकणा सिंचेसि ॥ १ ॥
कहं वपुं भिदरसंछिण्णकंचणच्छाअं । अणुहोदि कदलीए पडिपंडुरत्तणं ॥ २ ॥
किंअ । हरिणछि तुए तरालिज्जंति केलिपंकेरुहस्स खलणेण ।
णीसासा कट्ठिअहारलट्ठिसंठाणपडिमाणा ॥ ३ ॥
पसिठिलाणीवीअकंचुअं उण फुरइ दे दुव्वलं ।
अंगं पुण्णहरिणंकबिंबपरिपण्डुरं कहं णु होइ ॥ ४ ॥

१ D. सक्किसिहि. २ D. पेक्खिदुं. ३ B. D. कंचुअत्तणं. ४ B. D. drop वि. ५ A. इह.

Digitized by Google

ण विणा चंदं सेहालिआए विअसंति कुसुमाइं ॥ १९ ॥

विदूषकः । सिविणवदिट्ठा दोलंणंदोलिणी विद्धसंचारिदसाल-भंजिअत्तणेण[2] परिणदा गेंदुअखेलिणी कअकव्वबंधर[3]अणा सा ज्जेव एसा तुए आलक्खिदा तुह चित्तं अक्खिवदि *। (क)

(नेपथ्ये) सहि मिअंकावलि ता मए संपदं णिंसिट्ठत्थाए दू-दीए होदव्वं †। (ख)

राजा । सैवेयमस्मन्मनासि मन्मथेनेदानीमुंत्तोर्यते मृगाङ्कावली-ति पञ्चाक्षरी ।

‡(पुनर्नेपथ्ये) रइदा अ मए तुंहावत्थाणिवेदणत्थं महाराँअ-

न विना चन्द्रं शेफालिकाया विकसन्ति कुसुमानि ॥ १९ ॥

(क) स्वप्नदृष्टा दोलान्दोलिनी विद्धसंचारितशालभञ्जिकात्वेन परिणता गेन्दुकखेलिनी कृतकाव्यबन्धरचना सैवैषा त्वयालक्षिता तव चित्तमाक्षिपति ।

(ख) सखि मृगाङ्कावलि तन्मया सांप्रतं निसृष्टार्थया दूत्या भवितव्यम् ।

---

*विदू । स्वप्नदृष्टा दोलांदोलिनी विद्धसंचारितशालभञ्जिकात्वेन स्थलांतरे निर्माय अवस्थापनस्थले विद्धा चासौ संचारिता च या शालभंजिका पुत्तलिका तत्त्वेन परिणता कंदुकखेलिनी कृतकाव्यबंधरचना सैवैषा त्वयालक्षिता तव चित्तं आक्षिपति ।

† नेपथ्ये । सखि मृगांकावलि तत् मया सांप्रतं निसृष्टार्थया दूत्या भवितव्यम् । या कामिनोरन्यतरस्यान्यतरत्रानुरागं ज्ञात्वा स्वबुध्यैव परस्परसंघटनं विदधाति सा निसृष्टार्थी दूतीति कामशास्त्रे । उक्तंच । स्त्रीपुंसयोरागममादधाना स्वयं च कार्यं प्रतिपादयन्ती । सृष्टार्थिका सा परदानयोगे दूती नियोज्या बहुधा सुधीभिरिति भरतः । स्त्रियाः पुंसोऽथवा ज्ञात्वा मनीषां स्वमनीषया संपादयति या कार्यं निसृष्टार्थेति तां विदुरित्यन्यत्र ।

‡ पुनर्नेपथ्ये । रचितौ मया तवावस्थानिवेदनार्थं महाराजपुरतः पठनीयौ

---

१ A. दोलंदोलिणी. २ D. adds स्थलंतरे. ३ C. कव्वबंधणा. ४ C. निसिट्ठाए. ५ D. उत्कीर्यते. ६ B. C. तुहावत्थाए वेदणत्थं. ७ C. महाराअस्स.

Digitized by Google

पुरदो पढणिज्जा दुवे सिलोआ ते पियसहीए सुणीअंदु । (क)

(संस्कृतमाश्रित्य)

चन्द्रं चन्दनकर्दमेन लिखितं संमार्ष्टि दृष्टाधरा
कामः पुष्पशरः किलेति सुमनोवर्गं लुनीते च यत् ।
वन्द्यं निन्दति यच्च मन्मथमसौ भङ्क्त्वाग्रहस्ताङ्गुली
स्तत्कामं सुभग त्वया वरतनुर्वातूलतां लम्भिता ॥२०॥

अपिच

तापोऽम्भःप्रसृतिंपचः प्रचयवान् बाष्पः प्रणालोचितः
श्वासाः कम्पितदीपवर्तिलतिकाः पाण्डिम्नि मग्नं वपुः ।
किञ्चान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते ॥ २१ ॥

(क) रचितौ च मया तवावस्थानिवेदनार्थं महाराजपुरतः पठनीयौ द्वौ श्लोकौ तौ प्रियसख्या श्रूयेताम् ।

द्वौ श्लोकौ प्रियसख्या श्रूयेताम् । प्राकृते द्विवचनाभावात् रचिता इत्यादि बहुवचनं द्विवचनार्थे ।

चन्द्रमिति । यदसौ वरतनुः चंदनकर्दमेन लिखितं चन्द्रं निर्मार्ष्टि प्रोंछति यच्च कामो मदनः पुष्पाणि शरा यस्य तादृशः । किलेति श्रवणे इति श्रवणमात्रेण सुमनसां पुष्पाणां वर्गं समूहं तज्जातीयमात्रं लुनीते छिनत्ति । दष्टाधरेति क्रोधातिशयख्यापनाय । यच्च वंद्यं देवत्वेन वंदनार्हं मन्मथं मदनं अथ च मनो निजजन्मस्थानं मथ्नाति पीडयति स मन्मथः तं स्वमनोमथनकारित्वेन कृतापराधतया निंदार्हं च हस्तांगुलीनामग्राणि अग्रहस्तांगुल्यस्ता भङ्क्त्वा यत् निन्दति तत् हे सुभग शोभनैश्वर्य । भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु । यशोवीर्यप्रपलेच्छाश्रीधर्मरविमुक्तिषु । त्वया सा वातूलतां वातरोगित्वम् । वातूलो वातसंघाते वातले माहतासहे इति विश्वः । लंभिता प्रापिता ॥ २० ॥

ताप इति । तापः संतापः अंभःप्रसृतिं पचति स तादृशः प्रचय उपचयस्तद्वान् बाष्पः प्रणालोचितः श्वासाः निश्वासाः कंपिता दीपवर्तिलतिका

---

१ A. सुणीअं. C. सुणिदव्वा. २ C. पंचशरः. ३ A. C. वंद्यं. ४ C. मान्मथ. ५ A. तत्कालं. ६ A. लंभितः. ७ C. °कालिकाः. ८ A. तन्मार्ग.

Digitized by Google

विदूषकः । अहं उण जाणे अणुप्पविस्सीअ अम्हे छलिदुमिह सुवण्णचउक्किआसंक्कंता के वि बम्हरक्खसा जंप्पंति। भूअप्पिआ अ संज्ञा सण्णिहिदा वट्टदि ता ओदरह* । (क)

राजा । यथा भवानाह । (इत्यवतरणं नाटयतः)

(नेपथ्ये) सुखाय सायंतनसंध्या भवतु देवस्य । संप्रति हि

निर्यद्वासरजीवपिण्डकरुणं बिभ्रत्कवोष्णैः करै
र्मांजिष्ठं रविबिम्बमम्बरतलादस्ताचलं चुम्बति ।
किं च स्तोकतमःकलापकलनाश्यामायमानं मना
ग्धूमश्यामपुराणचित्ररचनारूपं जगज्जायते ॥ २२ ॥

(क) अहं पुनर्जाने अनुप्रविश्यास्मान् छलितुमिह सुवर्णचतुष्किकासंक्रान्ताः कोऽपि ब्रह्मराक्षसा जल्पन्ति । भूतप्रिया च संध्या संनिहिता वर्तते तदवतरामः ।

यैस्ते तादृशाः अतिदूरप्रसृता इति भावः वपुः सर्वशरीरं पांडिम्नि पांडुभावे मग्नं मग्नमित्यनेन वपुषोऽल्पत्वं पांडिम्नो बहुलत्वं च व्यज्यते । अन्यत् पूर्वोक्तादन्यत् किं केन प्रकारेण कथयामि । हस्त एव छत्रं तेन निरुद्धं चन्द्रस्य महस्तेजो यया सा तस्याः स्थितिरवसानं अखिलां रात्रिं त्वन्मार्गवातायने वर्तते । तस्या इति वर्तत इति च तापादिष्वपि प्रत्येकं अभिसंबध्यते । सर्वं व्याख्याय वा अन्यत् किं कथयामीति व्याख्येयं कथनप्रकारस्यान्यस्याभावात् । किमिति काकु प्रश्नार्था वा ततश्च त्वन्मार्गवातायने हस्तच्छत्रनिवारितचन्द्रातपायास्तस्याः स्थितिर्वर्तते इति सर्वकथनप्रकाराणां संक्षेप इत्यादि व्याख्येयम् ॥ २१ ॥

*विदू । अहं पुनर्जाने अनुप्रविश्यास्मान् छलितुमिह सुवर्णचतुष्किकासंक्रान्ताः कोऽपि ब्रह्मराक्षसा जल्पन्ति। भूतप्रिया च संध्या संनिहिता वर्तते तदवतरावः ।

निर्यादिति । निर्यन् यो वासरस्य दिवसस्य जीवपिण्डस्तद्वत् करुणं कारुण्यास्पदं तत्तुल्यमिति यावत् तथा कवोष्णैः किंचिदुष्णैः करैः किरणैर्मांजिष्ठं मांजिष्ठाया अयं मांजिष्ठो राग इति यावत् तं बिभ्रत् अथवा करैरित्युपल-

---

१ C. °चडाक्किआए. २ B. दूबम्हरक्खसा. C. दुम्बम्ह. ° ३ B. C. जंप्पंति. ४ C. भूदपिसाअसंका. ५ A. B. यथा भवान्. ६ A. उभाव. ° ७ D. निर्याद्—करुणां.

Digitized by Google

अपि च । सैरन्ध्रीकरकृष्टकङ्कणसरत्तारध्वनिः संचर
दूतीसूत्रितसंधिविग्रहविधिः सोल्लासलीलाधरः ।
वारस्त्रीजनसज्जमानशयनः सन्नद्धपुष्पायुधः
श्रीखण्डद्रवधौतसौधतलिनो रम्यः क्षणो वर्तते ॥ २३ ॥

राजा । संध्यामुपासितुं देवीभवनमेव गच्छावः[2] ।

(इति निष्क्रान्तौ)

॥ इति द्वितीयोऽङ्कः ॥

क्षणे तृतीया मंजिष्ठया रक्तं मांजिष्ठं इति रूपकं निर्यद्वासरजीवपिण्ड-करुणामिति पाठः । तथाच तां बिभ्रदिति योजनीयम् । एतादृशं रविबिम्बं अंबरतलादस्ताचलं पश्चिमाद्रिं चुम्बति । किंच अन्यदपि वर्ण्यत इति शेषः । स्तोकोऽल्पो यस्तमःस्तोमस्तस्य कलनैया संबंधेन श्यामायमानं जगत् कर्तृ मनागीषत् धूमेन श्यामा या पुराणस्य चित्रस्य रचना तस्या रूपामिव रूपं यस्य तद्रूपं तत्तुल्यामिति वा जायते भवति ॥ २२ ॥

सैरंध्रीति । सैरंध्रीभिः परवेश्मस्थाभिः शिल्पकरीभिः करैःकृत्वा कृष्टानां कंकणानां करवलयानां सरन् प्रसरन् तारो मंद्रो ध्वनिः शब्दो यस्मिन् । सैरंध्री परवेश्मस्था स्ववशा शिल्पकारिकेत्यमरः। सैरंध्र्यो हि परवेश्मनि स्थिताः स्ववशा एव नायिकानां प्रसाधनानि तद्दृढकर्मीचरंति न तु दास्य इव तदधीनाः सत्यः । तथा च ताभिः करैः प्रसाधनार्थं कृष्टानां नायिका-कंकणानां ध्वनिरत्र समये प्रसराति इति भावः । यद्वा कष्टमिति भावे । तथाच सैरंध्रीणां यानि करकृष्टानि करकर्षणानि अर्थात् प्रसाधनार्थं नायिकानां तैः कृत्वा सैरंध्रीणां नायिकानां च यानि करवलयानि तेषां ध्वनिर्यत्र समये इति व्याख्येयम् । संचरंतीभिः कामिनां कामिनीनां च सविधे यातायातं कुर्वतीभिर्दूतीभिः संदेशहरणेन कामिसंघटनकारिणीभिः सूत्रितः संक्षेपेण चातुर्यविशेषेण च सूचितः संधिविग्रहयोः आदिपदपूरणेन संधिविग्रहयानासनद्वैधीभावसंश्रयरूपमहिलाषड्गुणानां विधिः कर्तव्यार्थोपदेशो यत्र । अथवा सूत्रितमिति भावे । तथा च दूतीनां यत् सूत्रितं सूचनं तत् संधिविग्रहादिविषये विधिरिव विधायकवेदवचनमिवालं-

---

१ D. धीर. २ D. तलिमो. ३ D. गच्छामः.

Digitized by Google

॥ अथ तृतीयोऽङ्कः ॥

(ततः प्रविशति चेटी)

चेटी । *(परिक्रम्य)(क) को विअ कालो वट्टदि पिअसहीए विअक्खणाए दिट्ठाए । उक्कंठाभरेण असिसिरकरकरंबिज्जमाणं विअ

(क) क इव कालो वर्तते प्रियसख्या विचक्षणाया दृष्टायाः । उत्कण्ठाभरेण अशिशिरकरकरंब्यमाणमिव करिदन्तमुसलं स्फुटन-

घनीयं यत्रेत्यनेनेह दूतीनां श्रद्धेयवचनता व्यज्यते । उल्लसनं उल्लासः शोभातिशयो वृद्धिर्वा तेन सह वर्तमाना या लीलाः कामिजनचेष्टितानि ता धारयति तादृशः। सोल्लासाः सोत्साहाः असमशरसमरं कर्तुं लीलाधराः कामिन्यः कामिनश्च यत्रेति वा । उल्लासलीलाभिःस्फुरणैःसह वर्तमाना अधरा अधरोष्ठा यत्र । अधरे प्रियसंगमश्चेति स्पंदनप्रकरणे शाकुनिकाभिधानात् अधरकंपनस्य झटिति प्रियसंगमादिपुरस्सरं चुंबनादिसूचकत्वेनाधरकंपनं यत्रेति वा वारस्त्रीणां गणिकानां जनैः समूहैर्लोकैर्वा सज्यमानानि आस्तीर्यमाणानि शयनानि यत्र । वारेषु स्वस्वदिनेषु स्त्रीजनैः सज्यमानशयन इति वा । वारस्त्रीभिर्जनेभ्यो लोकार्थं सज्यमानशयन इति वा । वारस्त्रीजनानां सज्ये ज्यासहितधनुस्तुल्ये मानशयने मानोऽहंकारः शयनं च यत्र तेषां । मानस्य केवलं द्रव्यग्रहणार्थत्वेनातिक्षणिकत्वात् मानस्य सत्त्वेऽपि शयनस्य रचनामिति भावः । सन्नद्धः कामिनो रतिसमरविधानाय सन्नाहवान् पुष्पायुधो मदनो यत्र। श्रीखण्डस्य चन्दनद्रुमस्य यो द्रवः घर्षणेन साधितो द्रवभागः तेनधौतानि लिप्तानि सौधानां सुधाधवलितानां गृहाणां तलिमानि कुट्टिमानि यत्र यद्वा सौधानि च तलिमानि शय्याश्च यत्रेत्यर्थः । तलिमं तल्पखड्गयोः विताने कुट्टिमे चापीति हैमः । एतादृशः क्षणो रम्यो वर्तते ॥ २३ ॥

इति श्रीवेंकररंगनाथदीक्षितसूनोर्नारायणस्य कृतौ विद्धशालभाञ्जिकाविवरणे द्वितीयोऽङ्कः ।

* चेटी । कोऽपिच कालो वर्तते प्रियसख्या विचक्षणाया दृष्टायाः । उत्कण्ठाभरेण च शशिकरकरंब्यमानमिव करिदन्तमुसलं स्फुटनभूयिष्ठं वर्तते

१ B. असासीसिअर. A. D. अ ससिअरकरं.

Digitized by Google

करिदंतमुसलं फुट्टणभूइट्ठं वट्टदि मे हिअअं । ता काहं क्खु तं पेक्खिस्सं । (पुरोऽवलोक्य) कधं एसा पिअसही किं पि मंतअंती आअच्छादि ।

(ततः प्रविशति यथानिर्दिष्टा द्वितीया चेटी)

चेटी । (स्वगतम्) अहो मेहामंतिणो पहुकज्जे णिरदिसआ भत्ती*। (क)

प्रथमा । कधं महाभाअधेअजणकज्जसिद्धी विअ चिंतिदोवणदा पिअसही । ता पच्छा भविअ णअणाइं से पिहाइस्सं† । (ख) (तथा करोति)

द्वितीया । पिअसहीए सुलक्खणाए विअ करप्फंसो । (प्रकाशम्) साहि सुलक्खणे जाणिदोसि ता मुंच णअणाइं‡ । (ग)

सुलक्षणा । (नयने परित्यज्य सप्रणयकोपम्)(घ) हला विअक्खणे

भूयिष्ठं वर्तते मे हृदयम् । तत् कुत्र खलु तां प्रेक्षिष्ये । कथमेषा प्रियसखी किमपि मन्त्रयमाणागच्छति ।

(क) अहो महामन्त्रिणः प्रभुकार्ये निरतिशया भक्तिः ।

(ख) कथं महाभागधेयजनकार्यसिद्धिरिव चिन्तितोपनता प्रियसखी । तत्पश्चाद्भूत्वा नयने अस्याः पिधास्ये ।

(ग) प्रियसख्याः सुलक्षणाया इव करस्पर्शः । सखि सुलक्षणे ज्ञातासि तन्मुञ्च नयने ।

(घ) हला विचक्षणे एतावन्मात्रेऽपि सलिलासिक्तशणगु-

मे हृदयं तत् कुत्र खलु तां प्रेक्षिष्ये । कथमेषा प्रियसखी किमपि मन्त्रयन्ती आगच्छति ।

*चेटी । अहो महामन्त्रिणः प्रभुकार्ये निरतिशया भक्तिः ।

†प्रथमा । कथं महाभागधेयजनकार्यसिद्धिरिव चिंतितोपनता प्रियसखी । तत् पश्चाद्भूत्वा नयनान्यस्याः पिधास्ये ।

‡द्वितीया । प्रियसख्याः सुलक्षणाया इव करस्पर्शः । सखि सुलक्षणे ज्ञातासि तत् मुंच नयनानि ।

---

१ C. कुट्टण.° २ A. B. मंतिणो. ३ C. भाअजण. ४ D. adds स्वगतं ५ C. adds नुमं. ६ C. मुंचेहि.

Digitized by Google

एदहमेत्ते वि सलिलसित्तसणगुणगंठिगंठिदे वि सिणेहे कधं उब्भिण्णसिहा खंजरीडी विअ अदंसणा चिट्ठसि । ता एसा दे कुविस्सं* ।

विचक्षणा । (सप्रश्रयम्) पिअसहि सुलक्खणे मा कुप्प । महामंतिभागुराअणणिओओ[1] एत्थ अवरज्झादे ण उण अहं[†] । (क)

सुल । (सोपहासम्) को तुह्माहिंतो अण्णो छगुण्णअणिउणो[‡] । (ख)

विच । अह्मारिसजणजोग्गं महिलाछगुण्णअं खु एदं[§] । (ग)

सुल । महिलाछगुण्णएण जइ महिलाअणस्स अदंसणं ता अह्मारिसीओ अक्खिहिं[2] वि ण दीसंति[3] । [¶] (घ)

णग्रन्थिगाढेऽपि स्नेहे कथमुद्भिन्नशिखा खञ्जरीटीवादर्शना तिष्ठसि । तदेषा ते कोपिष्यामि ।

(क) प्रियसखि सुलक्षणे मा कुप्य । महामन्त्रिभागुरायणनियोगोऽत्रापराध्यति न पुनरहम् ।

(ख) को युष्मत्तोऽन्यः षाड्गुण्यनिपुणः ।

(ग) अस्मादृशजनयोग्यं महिलाषाड्गुण्यं खल्वेतत् ।

(घ) महिलाषाड्गुण्येन यदि महिलाजनस्यादर्शनं ततोऽस्मादृश्योऽक्षिभिरपि न दृश्यन्ते ।

---

* सुल । हला विचक्षणे एतावन्मात्रेऽपि सलिलसिक्तशणगुणग्रन्थिगाढेऽपि स्नेहे कथं उद्भिन्नशिखा खंजरीटीव अदर्शना तिष्ठसि । तदेषा ते कुपिष्ये ।

† विच० । प्रियसखि सुलक्षणे मा कुप्य । महामन्त्रिभागुरायणनियोगोऽत्रापराध्यति न पुनरहम् ।

‡ सुल । को युष्मत्तोऽन्यः षाड्गुण्यनिपुणः ।

§ विच । अस्मादृशजनयोग्यं महिलाषाड्गुण्यं खल्वेतत् ।

¶ सुल । महिलाषाड्गुण्येन यदि महिलाजनस्यादर्शनं तत् अस्मादृश्योऽक्षिभिरपि न दृश्यन्ते ।

---

१ A. B. °गाढे. २ C. adds एव. ३ C. महिलाओ अणणदंसणा ता अह्मारिसीण.

Digitized by Google

विच । अध दे कीदिसं महिलाछगुण्णअं ।*(क)

सुल । तुमं भण दाव । पुणो अहं भणिस्सं । पठमं सहआरमंजरीओ उब्भिज्जंदि पच्छा तच्चुंबिणी कलकंठी कंठमुद्दं सिठिलीकरेदि[†] । (ख)

विच । ता सुणु । अहमेकदा भअवदा भागुराअणेण सबहुमाणं भणिदा जधा विअक्खणे तुए अह्माणं राअरहस्से साहज्जं कादव्वंत्ति[‡] । (ग)

सुल० । अहो दे मतिविहवो । जेण महामंती वि एदं संभावेदि । का वण्णना बउलावल्लीए सुरहिगंधुग्गारोत्ति । तदो तदो[§] । (घ)

(क) अथ ते कीदृशं महिलाषाड्गुण्यम् ।

(ख) त्वं भण तावत् । पुनरहं भणिष्ये । प्रथमं सहकारमञ्जर्यं उद्भिद्यन्ते पश्चात्तच्चुम्बिनी कलकण्ठी कण्ठमुद्रां शिथिलीकरोति ।

(ग) तच्छृणु । अहमेकदा भगवता भागुरायणेन सबहुमानं भणिता यथा विचक्षणे त्वयास्माकं राजरहस्ये साहाय्यं कर्तव्यमिति ।

(घ) अहो ते मतिविभवो । येन महामन्त्र्यपि एतत्संभावयति । का वर्णना बकुलावल्याः सुरभिगन्धोद्गार इति । ततस्ततः ।

---

* विच । अथ ते कीदृशं महिलाषाड्गुण्यम् ।

† सुल । त्वं भण तावत् पुनरहं भणिष्ये । प्रथम सहकारमंजर्यं उद्भिद्यन्ते पश्चात् तच्चुंबिनी कलकण्ठी मुद्रां शिथिलीकरोति ।

‡ विच । तत् शृणु । अहमेकदा भगवता भागुरायणेन सबहुमानं भणिता यथा विचक्षणे त्वयास्माकं राजरहस्ये साहाय्यं कर्तव्यामिति ।

§ सुल । अहो ते मतिविभवो येन महा मंत्री अपि एतत् संभावयति । का वर्णना बकुलावली सुरभिगन्धोद्गारा इति ।

---

१ C. उब्भिज्ज. २ B. adds कादव्वं. ३ A. गंधो रेहति.

Digitized by Google

विच । तदो विणओवणदाए मए तधत्ति पडिवण्णं । कधिदं अ मे तेण जधा एसो जो मिअंकवम्मो सा मिअंकावलीत्ति* । (क)

सुल । तदो तदो † । (ख)

विच । ‡ (ग) तदो तं परिणीअ महाराअसिरिविज्जाहरमल्लदेवेण महीअलचक्कवत्तिणा होदव्वं । ता तुए तस्स कदाविं किदभवणभित्तिगब्भसंचोरे[3] वासहरे एसा दंसिदव्वा जेण देवस्स सिविणआवगमो होदि । कज्जंतरट्ठाणाइं दे हरदासो कधइस्सदि एदस्सिं महाराअकज्जरहस्से तुमं तीए वि पिअसही तत्थ राअ-

---

(क) ततो विनयोपनतया मया तथेति प्रतिपन्नम् । कथितं च मे तेन यथैष यो मृगाङ्कवर्मा सा मृगाङ्कावलीति ।

(ख) ततस्ततः ।

(ग) ततस्तां परिणीय महाराजश्रीविद्याधरमल्लदेवेन महीतलचक्रवर्तिना भवितव्यम् । तत्त्वया तस्य कदापि कृतभवनभित्तिगर्भसंचारे वासगृहे एषा दर्शयितव्या येन देवस्य स्वप्नावगमो भवति । कार्यान्तरस्थानानि ते हरदासः कथयिष्यति । एतस्मिन्महाराजकार्यरहस्ये त्वं तस्या अपि प्रियसखी तत्र राजकार्यसाहाय्यं अ-

---

* विच । ततो विनयोपनतया तथेति प्रतिपन्नम् । कथितं च मे तेन यथा एष यो मृगांकवर्मा सा मृगांकावलीति ।

† सुल । ततस्ततः ।

‡ सुल । ततः तां परिणीय महाराजश्रीविद्याधरमल्लदेवेन महीतलचक्रवर्तिना भवितव्यम् । त्वया तस्य कदाचित् कृतभवनभित्तिगर्भसंचारे वासगृहे सा दर्शयितव्या येन देवस्य स्वप्नावगमो भवति । कार्यान्तरस्थानानि ते हरदासः कथयिष्यति । एतस्मिन् महाराजकार्यरहस्ये त्वं तस्या अपि प्रियसखी तत्र राजकार्यसाहाय्यमिव अभ्यर्थ्यसे न खलु सोपानपंक्तिमन्तरेण

---

१ D. कदाचित्. २ D. omits गब्भ. ३ B, C. संचारवासहरे. ४ D. omits एसा. ५ C. तुए.

Digitized by Google

कज्जसाहज्जं अब्भत्थीअसि। ण हु सोवाणवंतिमंतरेण वडहीए समारोहो । मए तदो हरदासकधिदकज्जाणुसारेण सा सविस्संभं भणिदा जधा सहि मिअंकावलि इह वासहरे मअरद्धओ ओदरदि । तं च दट्ठूण कंठाहिं कड्ढिदेण हारकुसुमदामेण तुए अच्चिदव्वो जेण दे तादिसो कंतो होदित्ति । तिए वि तह अब्भुवगदं किदं अ । पुणो हिंदोलए दंसिदा केलिकैलासभवणे सुट्ठिदफलिहभित्तिसु अत्तणो चित्तं लेहाविदा त्थंभगब्भसंचारेण तं तं भणाविदा पढाविदा अ ।

मुल । अध तं विविहेहिं विलासेहिं पेक्खंतेण महाराएण किं पडिवण्णं* । (क)

भ्यर्थ्यसे । न खलु सोपानपङ्क्तिमन्तरेण वलभ्याः समारोहः । मया ततो हरदासकथितकार्यानुसारेण सा सविस्रम्भं भणिता यथा सखि मृगाङ्कावलि इह वासगृहे मकरध्वजोऽवतरति । तं च दृष्ट्वा कण्ठाकृष्टेन हारकुसुमदाम्ना त्वयार्चयितव्यो येन ते तादृशः कान्तो भवतीति । तयापि तथाभ्युपगतं कृतं च । पुनर्हिन्दोलायां दर्शिता केलिकैलासभवने सुस्थितस्फटिकाभित्तिष्वात्मनश्चित्रं लेखिता स्तम्भगर्भसंचारेण तत्तद्भणायिता पाठिता च ।

(क) अथ तां विविधैर्विलासैः प्रेक्षमाणेन महाराजेन किं प्रतिपन्नम् ।

वलभ्याः समारोहः । मया ततो हरदासकथितकार्यानुसारेण सा सविस्रंभं भणिता यथा सखि मृगांकावलि इह वासगृहे मकरध्वजोऽवतरति । तं च दृष्ट्वा कंठाकृष्टेन हारकुसुमदाम्ना त्वया अर्चयितव्यः येन ते तादृशः कान्तो भवति । तयापि तथाभ्युपगतं कृतं च । पुनर्हिंदोलायां दर्शिता केलीकैलस्थभवने सुस्थितस्फटिकभित्तिषु आत्मनश्चित्रं लेखिता स्तम्भगर्भसंचारेण तत् तत् भणायिता पाठिता च ।

*मुल । अथ तां विविधैर्विलासैः प्रेक्षता महाराजेन किं प्रतिपन्नम् ।

---

१ C. अत्थि. D. विअ अत्तत्थीअसि. २ A. कडीरेण C. कंठाहिंतो कड्डिदेण. ३ D. अज्जिदव्वो. ४ D. पदादिसो. ५ A. drops त्ति. ६ B. मंए. ७ C. भणावीअ. ८ C. पेक्खिअ तेण.

Digitized by Google

विच। जं केलिकरिणीचाडुकम्मच्छलिदो रण्णकरी पडिवज्जदि। तदो तरुणपोफलिछोल्लिदद्दविडसामलीदंतपंतिविसदासु मुद्धससिजामिणीसु असमंजसं विप्पलअदि जधा तं*। (क)

(†संस्कृतमाश्रित्य)

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकै
स्तन्त्रं मन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां स्मितम्।
चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दशदिशस्तद्भक्त्रमुद्राङ्किताः॥ १॥

(क) यत्केलिकरिणीचाटुकर्मच्छलितोऽरण्यकरी प्रतिपद्यते। ततस्तरुणपूगत्वग्घर्षितद्राविडश्यामलीदन्तपङ्क्तिविशदासु मुग्धशशियामिनीषु असमञ्जसं विप्रलपति यथा तत्।

---

* यत् केलिकारिणीचाटुकर्मच्छालितोऽरण्यकरी प्रतिपद्यते। ततः तरुणपूगत्वग्घर्षितद्राविडश्यामलीदंतपंक्तिविशदासु मुग्धशशियामिनीषु असमंजसं विप्रलपति। पोफलित इति पूगे सालि इति त्वचि छोल्लितं इति तृष्टे देशी। यथा तत्।

†संस्कृतमिति कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रम इत्यभिधानात् प्राकृतं विहाय संस्कृतम्।

श्यामामिति। भोः संबोध्याः परिचारिकादयः श्यामां रात्रिं लक्षणया ज्योत्स्नीं अत्र श्यामलीकरणस्य स्वत एव श्यामायां रात्र्यामनुपपन्नत्वेन तात्पर्यानुपपत्तेर्लक्षणाबीजत्वात् कृष्णशुक्लरात्रिसामान्यवाचकस्य श्यामापदस्य विशेषप्रसायकत्वस्य लक्षणयैव निर्वाहात्। अत्र विशेषपरिवृत्तमर्थदोषमुदाहृत्य तं न्यूनपदे शब्ददोषेऽतर्भाव्य श्यामामिति दुष्टामित्यभिधाय ज्योत्स्नीमिति पठनीयमिति काव्यप्रकाशकृतः। सान्द्रैः घनीभूतैः मषीकूर्चकैः सुधालेपार्थनिर्मितोपकरणतुल्यैः साधनविशेषैः श्यामलिमानं श्यामत्वं आनयत। अथानंतरं तंत्रं कंचिद्योगं मंत्रं वैदिकं शाबरं वा वर्णसमुदायं वा प्रयुज्य पठित्वा श्वेतोत्पलानां कैरवाणां स्मितं विकासं हरत दूरीकुरुत।

---

१ C. केलि. २ D. drops छलि. ३ C. सामला. ४ C. पुण्णससि. ५ C. omits तं. ६ D. ज्योत्स्नीं. ७ D. मन्त्रं तन्त्र. ८ A. खोगं.

Digitized by Google

मुल । तीए उण का अवत्था वट्टदि । (क)

विच । (संस्कृतमेवाश्रित्य)

सौधादुद्विजते त्यजत्युपवनं द्वेष्टि प्रभामैन्दवीं
द्वारात्त्रस्यति चित्रकेलिसदसो वेषं विषं मन्यते ।
आस्ते केवलमब्जिनीकिसलयप्रस्तारशय्यातले
संकल्पोपनमत्तदाकृतिरसायत्तेन चित्तेन सा ॥ २ ॥

संपदं उण तुमं कधेहि कीदिसं तं महिलाच्छगुण्णअं ।* (ख)

(क) तस्याः पुनः कावस्था वर्तते ।

(ख) सांप्रतं पुनस्त्वं कथय कीदृशं तन्महिलाषाङ्गुण्यम् ।

शिलापट्टके कृत्वा क्षणात् क्षणमात्रेण चंद्रं कणशः चूर्णयत परमाणुप्रायमारचयत । येन हेतुना तद्वक्त्ररूपाभिर्मुद्राभिर्नाममुद्राभिः तद्वक्त्रस्य वा रचनाभिरंकिताश्चिह्निता दशदिशो द्रष्टुं दृष्टिगोचरतां नेतुं अहं क्षमे समर्थो भवामि । ज्योत्स्नादीनामतिरमणीयत्वेन विरहिणो मम संतापदायकत्वात् दुर्दर्शतया मर्षाकूर्चकादिभिश्च तेषां विरूपत्वापत्तौ सर्वा अपि दिशो भावनायाततन्मुखमुद्रासनाथा द्रष्टुं समर्थो भविष्यामीति भावः ॥ १ ॥

सौधादिति । सौधादिति भयहेतौ पंचमी । उद्विजते दुःखातिशयं प्राप्नोति । चित्तं यत् केलिसदः क्रीडामंडपः तस्य द्वारात् त्रस्यति बिभेति । तद्द्वारं द्रष्टुमपि न शक्नोति कुतस्तत्र प्रवेशसंभावनापि इति भावः । वेषं वस्त्रालंकारादिपरिधानरचनां विषं मरणजनकं इव परिहार्यं मन्यते । संकल्पेन मनोरथेन उपनमंती संनिदधती या तस्य राज्ञः आकृतिः शरीरसंस्थानविशेषः तस्य रसस्तत्संबंधी हर्षः तदास्वादनं वा । रसो गंधे रसो हर्षे रसः स्वादे प्रकीर्तित इति नानार्थः। तस्यायत्तं अधीनम् । अधीनो निम्न आयत्त इत्यमरः। तादृशेन चित्तेन उपलक्षिता केवलं व्यापारांतररहित्येन अब्जिनीकिसलयानां प्रस्तारः प्रस्तरणं तदेव शय्यातलं तस्य तले प्रदेशविशेषे स्वरूपे वा । स्वरूपाधरयोस्तलमिति विश्वः । आस्ते उपविशति नतु तत्रापि निद्राति केवलं वस्त्रकंबलाद्यमिश्रितं यदब्जिनीकिसलयरूपं शय्यातलं तत्रेति वा ॥ २ ॥

*सांप्रतं पुनस्त्वं कथय कीदृशं तत् महिलाषाङ्गुण्यम् ।

---

१ C रसान् धत्ते च.

Digitized by Google

सुल । सुणु जादिसं । एकदाहं महाराएण कण्णे सप्पसाद-मादिट्ठा जधा ण तुए भिण्णरहस्सा देवी कादव्वत्ति ।* (क)

विच । किं विअ तं ।† (ख)

सुल । तं जधा । अलिअविवाहाविलक्खो चाराअणो देवी-धात्तेइअं विप्पदारिदुमिच्छदि । ता दिणावसाणसमए तरुणनीरं-धअंधआरे केसरतरुमारूहिअ पमदुज्जाणमज्झगामिणी तुए मेह-ला साणुणासिअं भणिदव्वा जधा अयि मेहले इह वेसाहपुण्णि-मापदोसे ज्जेव्व तुए मरिदव्वत्ति । भणिदा अ सा ।‡ (ग)

(क) शृणु यादृशम् । एकदाहं महाराजेन कर्णे सप्रसादमा-दिष्टा यथा न त्वया भिन्नरहस्या देवी कर्तव्येति ।

(ख) किमिव तत् ।

(ग) तद्यथा । अलीकविवाहविलक्षश्चारायणो देवीधात्रेयीं विप्रतारयितुमिच्छति । तद्दिनावसानसमये तरुणनीरन्ध्रान्धकारे केसरतरुमारुह्य प्रमोदोद्यानमध्यगामिनी त्वया मेखला सानुनासि-कं भणितव्या । यथा अयि मेखले इह वैशाखपूर्णिमाप्रदोष एव त्वया मर्तव्यमिति । भणिता च सा ।

---

* सुल । शृणु यादृशम् । एकदाहं महाराजेन कर्णे सप्रसादमादिष्टा यथा न त्वया भिन्नरहस्या देवी कर्तव्या इति ।

† विच । किमिव तत् ।

‡ सुल । तद्यथा । अलीकविवाहविलक्षश्चारायणो देवीधात्रेयीमपि प्रता-रयितुमिच्छति । तत् दिनावसानसमये तरुणनीरंध्रांधकारे केसरतरुमारुह्य प्रमदवनमध्यगामिनी त्वया मेखला सानुनासिकं भणितव्या यथा अयि मेखलें इह वैशाखपूर्णिमाप्रदोषे एव त्वया मर्तव्यमिति । भणिता च सा ।

---

१ C. केसरतरुंहि नीरंधे अंधआरे. २ C. drops केसरतरुमारुहिअ. ३ C. भिणिदा.

Digitized by Google

विच । तदो तदो । (क)

मुल । तदो तीए सज्झसवसवेविदंगीए[1] कहं[2] पि तदोहिमुहं भविअ किदणिबिडंजलिसंपुडाए भणिदं । भअवदि असरीरिणि दिव्वे वाणि मं अणुकंपंतीए जधा मरणं तुए जाणिदं जीविदं[3] पि मे जाण ।* (ख)

विच । तदो तदो ।† (ग)

मुल । तदो तधे जेव्व कधिदं जइ गंधव्ववेअविअक्खणं बह्मणं गुरुणा सक्कारेण अहिणंदिअ पाएसु वलंती[4] जंघंतरमज्झदुआरेण संचरिस्ससि[5] तदा जीविदलंभोत्ति[6] ।‡ (घ)

(क) ततस्ततः ।

(ख) ततस्तया साध्वसवशोवेपिताङ्ग्या कथमपि ततोऽभिमुखं भूत्वा कृतनिबिडाञ्जलिसंपुटया भणितम् । भगवति अशरीरिणि दिव्ये वाणि मामनुकम्पयन्त्या यथा मरणं त्वया ज्ञातं जीवितमपि मे जानीहि ।

(ग) ततस्ततः ।

(घ) ततस्तथैव कथितं यदि गान्धर्ववेदविचक्षणं ब्राह्मणं गुरुणा सत्कारेणाभिनन्द्य पादयोः वलन्तो जङ्घान्तरमध्यद्वारेण संचरिष्यासि तदा जीवितलम्भ इति ।

---

* मुल । ततस्तया साध्वसवशवेपितांग्या कथं कथमपि ततोऽभिमुखं भूत्वा कृतनिबिडांजलिसंपुटया भणितम् । भगवति अशरीरिणि दिव्ये वाणि मामनुकंपयंत्या यथा मरणं त्वया ज्ञातं जीवितमपि मे जानीहि ।

† विच । ततस्ततः ।

‡ मुल । ततस्तथैव सानुनासिकमित्यर्थः । कथितं यदि गांधर्ववेदविचक्षणं ब्राह्मणं गुरुणा सत्कारेणाभिनन्द्य पादयोः पतंती जंघांतरमध्यद्वारेण संचरसि तदा जीवितलंभ इति ।

---

१ C. वेविदसव्वंगीए. २ D. कथं कथं. C. कहं ताद अहिमुहं. ३ C तइ जीवणोपार्भ मे डवदिसेहि. ४ C. तह एव्व कहिदं ५ A. विलंती. ६ A. B. D. संचरदि.

Digitized by Google

विच । अहो दे विअक्खणत्तणं जदो मुणिणो वि एवं सुमरंति पादाहिंतो बह्मणस्स पवित्तत्तणं त्ति * । (क)

मुल । (विभाव्य) अहो से किं पि कवडणाडअकइत्तणं बह्मणस्स । †(ख)

विच । तदो तदो ‡ । (ग)

मुल ।(घ)+ तदो तं सुणिअ मेहलाए अंसुजलगलज्जलाइं णअणाइं पुणरुत्तमुप्पुसन्तीए मह पुरदो जेव्व महाराअसमीववट्टिणीए देवीए तह ज्जेव्व विण्णत्तं । देवेण वि देवीमेण्णुमवहरंतेण चारायणचरिदं अ णिव्वाहंतेण भणिदा जधा सुंदरि मा विसण्णा

(क) अहो ते वैचक्षण्यम् । यतो मुनयोऽप्येवं स्मरन्ति पादाभ्यां ब्राह्मणस्य पवित्रत्वमिति ।

(ख) अहो अस्य किमपि कपटनाटककवित्वं ब्राह्मणस्य ।

(ग) ततस्ततः ।

(घ) ततस्तच्छ्रुत्वा मेखलाया अश्रुजलगलज्जले नयने पुनरुक्तमुत्प्रोञ्छन्त्या मम पुरत एव महाराजसमीपवर्तिन्या देव्या तथैव विज्ञप्तम् । देवेनापि देवीमन्युमपहरता चारायणचरितं च निर्बाहयता भणिता यथा सुन्दरि मा विषण्णा भव । यतो गा-

---

* विच । अहो ते विचक्षणत्वम् । यतो मुनयोऽप्येवं स्मरंति पादाभ्यां ब्राह्मणस्य पवित्रत्वमिति ।

†अहो अस्य किमपि कपटनाटककवित्वं ब्राह्मणस्य ।

‡विच । ततस्ततः ।

+ मुल । ततः तत् श्रुत्वा मेखलाया अश्रुजलगलज्जले नयने पुनरुक्तमुत्प्रोंछंत्या मम पुरत एव महाराजसमीपवर्तिन्या देव्या तथैव विज्ञप्तं देवेनापि देवीमन्युमपहरता चारायणचरितं च निर्वाहयता भणिता । यथा सुंदरि मा विषण्णा भव यतो गांधर्ववेदविचक्षणः स्वाधीन एव ब्रा-

---

१ B.C. पवित्तणं. २ B.C. drop जल. ३ C. दट्ठूण उप्पसन्तीए. ४ B. मण्णुमहवहरंतेण. C. देवीमणोणुरूपं वाहरन्तेण A. मण्णुभअहरं°.

Digitized by Google

होहि । जदो गंधव्ववेअविअक्खणो साहीणो ज्जेव्व बह्मणो ता[1] किं ति अंसुकणकरंबिअबिंबाहरा वट्टसित्ति संट्ठाविदा देवी । देवीए अ अहं अज्ज सा पुण्णिमत्ति भणिअ पूआसक्कारं सज्जीकादुं पेसिदाह्मि ।

विच । ता एहि जधा[3]णिवेदिदमणुचिट्ठह्म* । (क)

(इति निष्क्रान्ते)†

। इति प्रवेशकः ।

(ततः प्रविशति निबिडोत्कण्ठो राजा स्नानशुचिर्विदूषकश्च)

राजा । (अनुध्याननाटितकेन)

क्रमसरलितकण्ठप्रक्रमोच्छ्वासितोर
स्तरालितवलिलेखासूत्रसर्वस्वमस्याः ।
स्थितमतिचिरमुच्चैरग्रपादाङ्गुलीभिः
करकलितसखीकं मां दिदृक्षोः स्मरामि ॥ २ ॥

विदूषकः । (ख) ‡मा समाधाणेभंगं मे कुण । देवीपुरदो मे-

न्धर्ववेदाविचक्षणः स्वाधीन एव ब्राह्मणस्तत्किमित्यश्रुकणकराम्बितबिम्बाधरा वर्तस इति संस्थापिता देवी । देव्या चाहं अद्य सा पूर्णिमेति भणित्वा पूजासत्कारं सज्जीकर्तुं प्रेषितास्मि ।

(क) तदेहि यथानिवेदितमनुतिष्ठावः ।

(ख) मा समाधानभंगं मे कुरु । देवीपुरतो मेखला जीव-

ह्मणः तत् किमिति अश्रुकणकरंबितबिंबाधरा वर्तसे इति संस्थापिता देवी । देव्या चाहं अद्य सा पूर्णिमेति भणित्वा पूजासत्कारं सज्जीकर्तुं प्रेषितास्मि ।

* विच । तदेहि यथानिर्दिष्टमनुतिष्ठावः ।

† निष्क्रान्ते । सुलक्षणाविचक्षणे । द्वे अपि चेटयौ गते इत्यर्थः । प्रवेशक इति ।

‡ विदू । मा समाधानभंगं मे कुरु । देवीपुरतो मेखला जीवयितव्या ।

१D. drops ता. २ C. °लोअणा. ३ D. °णिदिट्ठ. ४ A. निषण्णो°. ५ D. drops मे. C. समाधिभङ्गं.

Digitized by Google

हला जीविइद्दव्वा[1]। (स्वगतम्) अइ दुट्ठदासि णिवडिस्ससि[2]। दुक्कुरुद्धो चाराअणबह्मणो ।

राजा (तद्वचनमनाकर्ण्य तदेव*पठति)

विदूषकः । मा पुणो[3] पुणो तं सुमर । संदावदाइणी डाइणी क्खु सा[4]† । (क)

राजा । किमात्य संतापकारिणीति । तत्तव पंचमकाकलीकलगीतयः‡ कर्णं कलुषयन्ति । सुधास्यन्दिनी चन्द्रमूर्तिश्चक्षुषी तापयति । चन्दनरसनिष्यन्दस्तनुं दहति ।

विदूषकः । भो वक्करं मए[5] कहिदं । तुमं जेव्व सव्वदो सारमुच्चिणोसि । हंसो जेव्व जलाहिं[6] दुद्धमुद्धरेदि । किं उण भणामि अलसेण विअ विज्जा झत्ति दे[7] विसुमरिदा देवी ¶ । (ख)

यितव्या । अयि दुष्टदासि निपतिष्यसि । दुष्क्रुद्धो चारायणब्राह्मणः ।

(क) मा पुनःपुनस्तां स्मर । संतापदायिनी डाकिनी खलु सा ।

(ख) भो वक्रं मया कथितम् । त्वमेव सर्वतः सारमुच्चिनोषि । हंस एव जलाद् दुग्धमुद्धरति । किं पुनर्भणामि अलसेनेव विद्या झटिति ते विस्मृता देवी ।

अयि दुष्टदासि निपतिष्यति दुःक्रुद्धश्चारायणब्राह्मणः ।

* तदेव । क्रमसरलितेत्यादेव ।

† विदू । मा पुनस्तां स्मर संतापदायिनी डाकिनी खलु सा ।

‡ पंचमः । कोकिलकूजितानुकारी स्वरविशेषः । पिकः कूजति पंचमं इति तल्लक्षणात् तस्य काकली ध्वनिविशेषः । काकली तु कलेसूक्ष्मे इत्यमरः । तद्वत् मंद्रा या गीतयो गायनानि ।

¶ विदू । भो वक्रं मया कथितम् । अन्यस्मिन् वक्तव्ये कर्णापाटवेनान्यदेवोक्तमित्यर्थः । त्वमेव सर्वतः सारमुच्चिनोषि । हंस एव जलात् दुग्ध-

---

१ A.B C. जीवाविदव्वा. २ A. णियदिस्सदि अ क्रुद्धो. B. णिवडिस्सदि· D. णिवडिस्सदि दण्डः (देण्डः?.) कुरुद्धो. ३ D. drops one पुणो. ४ C· अवकरो मे काहिदा. ५ C. जलाहिंतो. ६ C. तुए.

Digitized by Google

राजा । आशैशवात्प्ररूढप्रेमा देवी कथं विस्मर्यते । किंतु देव्या निधायोपरि वामपादं यत्सुन्दरीणां प्रसभेन भुक्तम् ।
कृतं मनोरिक्थमथ द्विधा तत्तन्व्यां विभज्य स्मरशासनेन ॥४॥

विदूषकः । ता हिंदोलदोलिदं व्व[3] दे चित्तं गमागमाहिंतो ण विरमदि* । (क)

राजा । वयस्य एवमेतत् । यतः[4]
न मालतीदाम विमर्दयोग्यं न प्रेम नव्यं सहतेऽन्तरायम् ।
म्लानापि मोच्या नहि केसरस्रग्देवी न खण्ड्यप्रणया कथंचित्॥५॥

विदूषकः।(ख)† भोः किं एदेण दक्खिणवअणोवण्णासेण । पुरा-

(क) तद्धिन्दोलदोलितमिव ते चित्तं गमागमाभ्यां न विरमति ।

(ख) भोः किमेतेन दक्षिणवचनोपन्यासेन । पुराणपत्रम-

मुद्धरति । किं पुनर्भणामि । अलसेनेव विद्या झटिति ते विस्मृता देवी । ते इति कर्तरि षष्ठी । त्वयेत्यर्थः प्राकृते लिंगवचनमतन्त्रमिति वा तृतीयार्थे षष्ठी ।

देव्येति । देव्या मदनवत्या सुंदरीणां उपरि वामपादं निधाय प्रसभेन हठेन यत् मनोरूपं रिक्थं दायः भुक्तं तत् स्मरशासनेन मदनाज्ञया कृत्वा तथा मृगांकावल्या विभज्य विभागं नीत्वा द्विधाकृतम् । यन्मन्मनो देव्यैव पूर्वं भुक्तं तन्मदनाज्ञया कृत्वा मृगांकावल्या विभज्य तस्यां स्वस्मिंश्च तुल्यवत् द्विधाकृतमिति तात्पर्यार्थः ॥ ४ ॥

* विदू । तत् हिंदोलादोलितमिव ते चित्तं गमागमाभ्यां यातायाताभ्यां न विरमति ।

न मालतीति । नव्यं नूतनं मृगांकावलीविषयमिति यावत् प्रेमकर्तृ अंतरायं विघ्नं न सहते । तत् विशेषेण समर्थयति । मालतीदाम मालतीपुष्पमाला विमर्दयोग्यं न । देवी कथंचित् केनापि प्रकारेण खंड्यः खंडनार्हः प्रणयः यस्याः तादृशी न । हि यतः केसरस्रक् बकुलपुष्पमाला म्लानापि मोच्या मोचनार्हा न ॥ ५ ॥

† विदू । किं एतेन दाक्षिण्यवचनोपन्यासेन पुराणपत्रं अपेक्षिअ अदू-

---

१ D. युक्तं. A. C. मुक्तं. २ D. तत्तुल्यं. ३ C. च. ४ D. drops वयस्य. ५ C. drops यतः.

Digitized by Google

णपत्तंमपेल्लिअ णो णवपल्लवो समुल्लसदि । ण अ तरुणगंठिवण्ण-अकंदलीकवलणलुद्धो गंधहरिणो दवणअकेदारिआए अहिरमदि ।

राजा । सखे निरर्गलवागसि । यदनाशङ्कनीयं तदाशङ्कसे ।

विदूषकः । किं मम परकेरिआए चिंताए । ता भणीअसि मा समाधिभंगं मे कुण देवीपुरदो मेहला जीवेंइदव्वा । * (क)

(ततः प्रविशति देवी प्रयता च मेखला विभवतश्च परिवारः)

देवी । हला सुलक्खणे अवि संण्णिहिदो अंतेउरदुआरपग्गीवे अज्जउत्तो चाराअणब्भणो अ । † (ख)

सुलक्षणा । किं अण्णधा देवी विण्णवीअदि । ‡ (ग)

दूरीकृत्य नो नवपल्लवः समुल्लसति । न च तरुणग्रन्थिपर्णककन्दलीकवलनलुब्धो गन्धहरिणो दमनककेदारिकायामभिरमति ।

(क) किं मम परकीयया चिन्तया । तद् भण्यसे मा समाधिभङ्गं मे कुरु देवीपुरतो मेखला जीवयितव्या ।

(ख) हला सुलक्षणे । अपि संनिहितोऽन्तःपुरद्वारप्रग्रीवे आर्यपुत्रश्चारायणब्राह्मणश्च ।

(ग) किमन्यथा देवी विज्ञाप्यते ।

रीकृत्य नो नवपल्लवः समुल्लसति नच तरुणग्रन्थिपर्णकांकुरकवलनलुब्धो गंधहरिणो दमनककेदारिकायां अभिरमति ।

* विदू । किं मम परकीयया चिंतया तत् भण्यसे मा समाधिभंगं मे कुरु । देवीपुरतो मेखला जीवयितव्या ।

†देवी । हला सुलक्षणे अपि संनिहितोंतःपुरद्वारप्रग्रीवे । प्रग्रीवं वावनमिति क्षीरस्वामी । उपांतप्रदेश इत्यपि केचित् । आर्यपुत्रश्चारायणब्राह्मणश्च ।

‡ मुल । किमन्यथा देवी विज्ञाप्यते ।

---

१ C. पुराणपत्तं वेल्लि वाज्जिय जणो. A. मंपलिअं. २ C. पल्लवं समुल्लसेदि. ३ B. तत्तीए. C. drops चिन्ताए. ४ C. जीवाविदव्वा. ५ A. B. पडीवे.

Digitized by Google

JudL 2006.2

विदूषकः । एदं पग्गीवं ता उअविसदु पिअवअस्सो।* (क)

(तथा कुरुतः)

देवी (उपसृत्य[1]) । जअदु जअदु अज्जउत्तो । अज्ज चाराअण देसु मे धत्तेइआभिक्खं । जीआवेसु मेहलअं । † (ख)

विदूषकः । एस सज्जो म्हि । ‡ (ग)

मेखला । (बद्धाञ्जलिः) अज्ज चाराअण णअं जणो तुमं महाबम्हणं सरणं पडिवज्जादि ¶ । (घ) (इति तत्पादौ शिरस्यारोपयति)

(नेपथ्ये) । कहिं कहिं सा दुट्ठदासी । एदे अम्हे कालपुरिसा संखलाहिं गले गाढं बंधिअ मेहलं णेदुमाअदा × । (ङ)

(क) एतत्प्रग्रीवं तदुपविशतु प्रियवयस्यः ।

(ख) जयतु जयतु आर्यपुत्रः। आर्य चारायण देहि मे धात्रेयिकाभिक्षाम् । जीवय मेखलाम् ।

(ग) एष सज्जोऽस्मि ।

(घ) आर्य चारायण । अयं जनस्त्वां महाब्राह्मणं शरणं प्रतिपद्यते ।

(ङ) कुत्र कुत्र सा दुष्टदासी । एते वयं कालपुरुषाः शृङ्खलाभिर्गले गाढं बद्ध्वा मेखलां नेतुमागताः ।

---

*विदू । एतत् प्रग्रीवं तत् प्रविशतु प्रियवयस्यः ।

†देवी । जयतु जयतु आर्यपुत्रः आर्य चारायण देहि मे धात्रेयिकाभिक्षाम्। जीवय मेखलाम् ।

‡ विदू । एष सज्जोऽस्मि ।

¶ मेख । आर्य चारायणायं जनस्त्वां महाब्राह्मणं शरणं प्रतिपद्यते ।

× नेपथ्ये । कुत्र सा दुष्टदासी । एते वयं कालपुरुषा शृंखलाभिर्गले गाढं बद्ध्वा मेखलां नेतुमागताः ।

---

१ C. adds अहं वि उत्तरम्मि चिट्ठामि. २ D. drops उपसृत्य. ३ A. B. D. omit तत्. ४ C. drops one कहिं. ५ D. बाढं.

Digitized by Google

Indl 2006.2

विदूषकः । (बहुविधं गीत्वा दण्डकाष्ठमुद्यम्य) अइ अहं पिङ्गलिआवल्लहो गन्धव्ववेअविअक्खणो रक्खको चिट्ठामि ता को कालो के[२] कालपुरिसा का वा [३]कालसिंखला * । (क)

(इति बहुविधं वल्गति)

मेखला (पादयोरन्तरे प्रविशंती) भो परित्ताअसु मं † । (ख)

विदूषकः । (उच्चैर्गायन्नुपवार्य) भो पेक्ख[४] पेक्ख महाराअ विलासिणीवम्महरहाहिरूढं अत्तणो पिअवअस्सं । (किञ्चिदुच्चैः) भो पेक्ख[५]ध पेक्खध मे बह्मणत्तणं जेण खलखलाविदासिंखला कालपुरिसा पणट्ठा ‡ । (ग)

मेखला । अम्महे जीविदम्हि ¶ । (घ)

विदूषकः । (सास्फोटं विहस्य) आः दासीए धीए[६] अली-

(क) यद्यहं पिङ्गलिकावल्लभो गान्धर्ववेदविचक्षणो रक्षकस्तिष्ठामि तत् कः कालः के कालपुरुषाः का वा कालशृङ्खला ।

(ख) भोः परित्रायस्व माम् ।

(ग) भोः प्रेक्षस्व प्रेक्षस्व महाराज विलासिनीमन्मथरथाधिरूढमात्मनः प्रियवयस्यम् । भोः प्रेक्षध्वं मे ब्राह्मणत्वं येन खलखलायितशृङ्खलाः कालपुरुषाः प्रनष्टाः ।

(घ) अम्महे जीवितास्मि ।

---

* विदू । यद्यहं पिंगलिकावल्लभो गंधर्ववेदविचक्षणो रक्षकस्तिष्ठामि ततः कः कालः के कालपुरुषाः का वा कालशृंखला ।

† मेख । भो परित्रायस्व माम् ।

‡ विदू । भो प्रेक्ष प्रेक्ष विलासिनीमन्मथरथाधिरूढं आत्मनः प्रियवयस्यं भोः प्रेक्षतर ? मे ब्राह्मणत्वं येन खलायितशृंखलाःकालपुरुषाः प्रनष्टाः ।

¶ मेख । अम्महे सोच्छ्वासविस्मये । जीवितास्मि ।

---

२ C. गीतं कृत्वा. D. drops गीत्वा. ३ C. adds अ. ३ C. ओ कालसिंखलाओ. ४ C. drops अपवार्य. ५ B. C. drop one पेक्ख and add हे. ६ C. D. drop one पेक्खध. ७ D. दुधीए.

Digitized by Google

अविवाहविडंबिदो दुक्कुरुद्धो णिवडिदो दे चाराअणबम्हणो तो संपदमोत्तिकं आसंसे दीहमभग्गकंकणा भोदु मे बम्हणी* । (क)

(मेखला विलक्षा रोदिति)

देवी । अज्जउत्त जुत्तं ण्णेदं सरिसं ण्णेमं जं दाणीं मे पिअसही मेहला एवं विडंबीअदि †। (ख)

विदूषकः । भोदिए जुत्तं ण्णेमं । सरिसं जं महाराअपिअवअस्सो तधा विडम्बीआदि ‡। (ग)

देवी । अज्जस्स संबंधिओत्ति तुए सह एदाए वक्कं किदं¶। (घ)

(क) आः दास्याः पुत्रिके अलीकविवाहविडम्बितो दुष्कृद्धो निपतितस्ते चारायणब्राह्मणस्तत्सांप्रतमेतावदाशंसे दीर्घमभग्नकङ्कणा भवतु मे ब्राह्मणी ।

(ख) आर्यपुत्र युक्तं न्विदं सदृशं न्विदं यदिदानीं मे प्रियसखीं मेखलैवं विडम्ब्यते ।

(ग) भवत्या युक्तं नेदं । सदृशं यन्महाराजप्रियवयस्यस्तथा विडम्ब्यते ।

(घ) आर्यस्य संबन्धीति त्वया सहैतया वक्रं कृतम् ।

---

*विदू । आः दास्याः दुहितः अलीकविवाहविडम्बितो दुष्कृद्धो विनिपतितस्ते चारायणब्राह्मणस्तत् साम्प्रतमेतावदाशंसे दीर्घमभग्नकंकणा भवतु मे ब्राह्मणी ।

†देवी । आर्यपुत्र युक्तमेतत् सदृशमेतत् यदिदानीं मे प्रियसखी मेखलैवं विडंब्यते ।

‡विदू । भवत्या युक्तमेतत् सदृशमेतत् यत् महाराजप्रियवयस्यस्तथा विडम्ब्यते ।

¶देवी । आर्यस्य मत्पितुः संबंधीति त्वया सहैतया वक्रं उपहासः कृतम् ।

---

१ A. drops णिवडिदो २ D. drops ता. ३ C. आसंसीआदि मए भग्गकंकणा. ४ D. दिहसमग्गकंकणा. ५ C. D. add ण्णेमं. ६ D. मए. ७ A. वक्रं उवहासो कदं.

Digitized by Google

विदूषकः । संबंधिणीत्ति मए वि[1] वक्करं किदं* । (क)

मेखला । देवी सक्कीआदि उत्तरं दाउं पराजेदुं अ[2] । एसो महाराओ एव्व से[3] गुरुः। केअइकुसुमवासिदस्स खदिरसारस्स वि अण्णो गंधुग्गारो † । (ख)

देवी (कोपनाटितकेन सपरिवारा निष्क्रान्ता)

विदूषकः । (पार्श्वमवलोक्य) संपदं णिम्मक्खिअं[4] पिअवअस्सस्स ‡ । (ग)

राजा । अतिविलक्षा[5] देवी यतो रुदती गता ।

विदूषकः । रुदतु रुदतु किं से मोत्तिआणिं[6] गलिस्संति । ता इदो इदं[7] उज्जाणाहिमुहं एदु पिअवअस्सो[8]¶ । (घ) (इति परिक्रामतः)

विदूषकः।×(ङ)भो महकरट्ठाविदपाणी मसिणणिवेसिदपादमुद्दो

(क) संबन्धिनीति मयापि वक्रं कृतम् ।

(ख) देवी शक्यते उत्तरं दातुं पराजेतुं च । महाराज एवास्य गुरुः । केतकीकुसुमवासितस्य खदिरसारस्याप्यन्यो गन्धोद्गारः ।

(ग) सांप्रतं निर्मक्षिकं प्रियवयस्यस्य ।

(घ) रोदितु रोदितु किमस्या मौक्तिकानि गलिष्यन्ति । तदित उद्यानाभिमुखमेतु प्रियवयस्यः ।

(ङ) भो मम करस्थापितपाणिर्मसृणनिवेशितपादमुद्रः

---

*विदू । संबंधिनीति मयापि वक्रं कृतं ।

†मेख । देवी शक्यते उत्तरं दातुं । पराजयतु एषः । महाराज एवास्य गुरुः केतकीकुसुमवासितस्य खदिरसारस्याप्यन्यो गन्धोद्गारः ।

‡विदू । सांप्रतं निर्मक्षिकं मे प्रियवयस्यस्य ।

¶विदू । रुदतु रुदतु किमस्या मौक्तिकानि गलिष्यन्ति । तदित इत उद्यानाभिमुखं एतु प्रियवयस्यः ।

×विदू। मम करे स्थापितपाणिः मसृणनिवेशितपादमुद्रः संचरयतो बह-

---

१ D. drops वि. २ A. B. D. drop अ. A. पराजेदु. ३ D. एदस्स. ४. C. adds देवस्स D. adds मे. ५ D. विलक्षणा. ६ A. B. मोत्तिआओ ७. D. drops one इदो.

Digitized by Google

संचर । जदो[1] बहलालिपडलणिम्मिदं व्व कोइलकुलकलिदजम्मं व्व तेलमंजिदकज्जलपुंजसंजणिदं व्व[2] इंदणीलचुणसंभूदं व्व सितिकण्ठ-कण्ठसंघडिदं व्व णाराअणतणुविणिग्गदं व्व मिअंककलंकणिक्का[3]-लिदं व्व कुवलअदलपरिकप्पिदं व्व करिदाणप्पअदं व्व तिमि-रचक्कवालं अविण्णादसमाविसमं अणिण्णीदसामधवलं अपरिच्छिण्ण-लहुदीहं अणधिगददूरसंणिहिदं भुवणंतरालं[4] करेदि ।

राजा । एवमेतत् ।

तनुलग्ना इव ककुभः क्ष्मावलयं चरणचारपात्रमिव ।
वियदपि चालिकदघ्नं मुष्टिग्राह्यं तमः कुरुते ॥ ६ ॥

संचर । यतो बहलालिपटलनिर्मितमिव कोकिलकुलकलितजन्मेव तैलमार्जितकज्जलपुञ्जसंजनितमिव इन्द्रनीलचूर्णसंभूतमिव शिति-कण्ठकण्ठसंघटितमिव नारायणतनुविनिर्गतमिव मृगाङ्ककलङ्कनिष्का सितमिव कुवलयदलपरिकल्पितमिव करिदानप्रगतमिव तिमिरचक्र-वालमविज्ञातसमाविषममनिर्णीतश्यामधवलमपरिच्छिन्नलघुदीर्घमन-धिगतदूरसंनिहितं भुवनांतरालं करोति ।

लालिपटलनियमितमिव कोकिलकुलकलितजन्मेव तैलमार्जितकज्जलपुंजसं-जानितमिव । मंजिदेति मिश्रिते परिमार्जिते वा देशी । इन्द्रनीलचूर्णसंभूत-मिव । करिदानप्रवृत्तमिव तिमिरचक्रवालं अविज्ञातसमविषमं अनिर्णीत-श्यामधवलं शितिकण्ठकण्ठसंघमिव नारायणतनुविनिर्गतमिव मृगांककलंक-निष्कासितमिव कुवलयदलपरिकल्पितमिव अपरिच्छिन्नलघुदीर्घं अनधि-गतदूरसंनिहितं भुवनगर्भागणं करोति ।

तनुलग्ना इति । मुष्टिना ग्रहीतुं योग्यं अतिघनमिति यावत् तमः अंध-कारं कर्तृ ककुभो दिशः कर्मीभूताः तनुलग्ना इव तनौ शरीरे लग्नाः संबद्धा इव कुरुते । क्ष्मायाः पृथिव्याः वलयं मंडलं कर्म चरणचारस्य पद्भ्यां गमनस्य पात्रमिव कुरुते । वियदपि आकाशमपि कर्म अलिकदध्नं ललाट-परिमाणं कुरुते । प्रमाणे द्वयसज्दघ्नज्मात्रच इति दघ्नच् । चकारः सर्वांते पठितो मध्यवर्तिनोऽस्य च समुच्चयार्थः । ललाटमलिकमित्यमरः ॥ ६ ॥

---

१ A. तदो. २ A. णिअमिदं. ३ C. संघडिदं. ४ B. C. णिप्फालिदं. ५ D drops करिदाणप्पअदं व्व. ६ A. B. भुअणगब्भंगणं.

Digitized by Google

किञ्चित्तर्कयामि
उत्तंसः केकिपिच्छैर्मरकतवलयश्यामले दोःप्रकाण्डे
हारः सान्द्रेन्द्रनीलैर्मृगमदरचितो वक्त्रपत्रप्रपञ्चः ।
नीलाब्जे शेखरश्रीरसितवसनताचेत्यभीकाभिसारे
संप्रत्येणेक्षणानां तिमिरभरसखी वर्तते वेषलीला ॥ ७ ॥

(नेपथ्ये)

(क) आवट्टिअदुद्धमुद्धकरतरलिअजलणिहिसलिलसंचैओ

(क) आवर्तितदुग्धमुग्धकरतरलितजलानिधिसलिलसंचयः

उत्तंस इति । संप्रति इदानीं एणेक्षणानां मृगनयनानां अभीकः कामुकः तस्याभिसारे अभिसरणे इति वक्ष्यमाणप्रकारेण वेषलीला वर्तते । यद्वा अलीकः न विद्यते ली यैस्मिन् इत्यलीको लयरहित इति अभिसार-विशेषणम् । कीदृशः तिमिरस्यांधकारस्य यो भरः समूहस्तस्य सखी सख्यवती तत्समानधर्मिणीत्यर्थः । इतीति किं केकिनां मयूराणां पिच्छैर्बर्हैः उत्तंसोऽवतंसः । दोःप्रकाण्डं दोषौ हस्तौ तावेव प्रकाण्डे तरुस्कंधौ इति रूपकम् । अस्त्रीप्रकांडस्कंधः स्यान्मूलाच्छाखावाधस्तरोरित्य-मरः । दोषौ प्रकांडे इवेत्युपमा वा । प्रशस्तौ हस्तौ दोःप्रकाण्डे । मतल्लि-का मचर्चिका प्रकांडमुद्वतल्लजौ । प्रशस्तवाचकान्यमूनित्यमरः । ते दोःप्रका-ण्डे मरकतानां हरिन्मणीनां वलयानि कंकणानि तैः श्यामले श्यामवर्णे सुंदरे वा सांद्रैरिन्द्रनीलैः नीलमणिभिर्हीरः । वक्त्रस्य मुखस्य पत्राणां विशे-षकाणां प्रपंचो रचनाविशेषः मृगमदेन कस्तूरिकया रचितः । मृगनाभिर्मृ-गमदः कस्तूरी चेत्यमरः । हारो मुक्तावली चामरः । तमालपत्रतिलकपत्र-काणि विशेषका इत्यमरः । नीलैरब्जैः शेखरस्य मूर्धमालायाः श्रीःशोभा । असितानि वसनानि परिधानसंख्यानादीनि यासां ताः असितवसनाः ता-सां भावस्तत्ता । त्वतलोर्गुणवचनयोरिति पुंवद्भावः । चकार उत्तंस इत्या-दीनां पंचानां समुच्चयार्थः । केकिपिच्छादीनां श्यामत्वेन तैरुत्तंसादिरचने तमसः समानरूपत्वेन कृष्णपक्षाभिसारिकानां कैरपि नोन्नयनामिति तादृशं वेषरचनमिति भावः ॥ ७ ।

---

१ D. वलयैः श्यामलैः. २ C. वलयश्यामलैर्दोःप्रकाण्डैः. ३ C. D. नीलाब्जैः ४ C. D. एणीक्षणानां. ५ C. सेओ.

Digitized by Google

तिहुवणभवणवलअविच्छुरणसुहारसधवलणकुच्चओ ।
चंदो मअणवल्लिपल्लवणमहोसहिसरिसंजोण्हओ
जअइ अणंगकेलिभवणंगणचन्दणपंकवण्णओ ॥ ८ ॥ *
अवि अ । †(क) जणाणंदो चंदो हसइ मलिणीहोइ णलिणी
विसद्दन्ते तारा रअणिसिरिहारा दिसि दिसि ।

त्रिभुवनभवनवलयविच्छुरणसुधारसधवलनकूर्चकः ।
चन्द्रो मदनवल्लिपल्लवनमहौषधिसदृशज्योत्स्नः
जयत्यनङ्गकेलिभवनाङ्गणचन्दनपङ्कवर्णकः ॥ ८ ॥
(क) अपि च जनानन्दश्चन्द्रो हसति मलिनीभवति नालनी
विकसन्ति तारा रजनिश्रीहारा दिशि दिशि ।

---

* नेपथ्ये । आवर्तितदुग्धमुग्धकरतरलितजलनिधिसलिलसंचयः त्रिभुवनभवनवलयविच्छुरणसुधारसधवलनकूर्चकः । चंद्रो मदनवल्लिपल्लवनमहौषधिसदृशज्योत्स्नः जयत्यनंगकेलिभवनांगनचंदनपंकवर्णकः । चंद्रो जयति सर्वोत्कर्षेण वर्तते । कीदृशः । आवर्तितं अग्निसंतपनेन घनीकृतं यद् दुग्धं तद्वत् मुग्धाः सुंदराः ये कराः तैः तरलितः उद्वेलीकृतः जलनिधेः समुद्रस्य सलिलसंचयः जलसमूहः येन तथा । त्रिभुवनमेव भवनवलयं गृहमंडलं तस्य विच्छुरणं धवलीकरणं तदर्थं सुधारस इव चूर्णद्रव इव सुधारसः पीयूषरसः व्यंजनयापरस्यार्थस्योपस्थितौ शक्यव्यंग्ययोरुपमानोपमेयभावप्रतीतिः । श्लिष्टशब्दस्थले भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेरित्यादौ बहुशोऽभियुक्तैर्व्युत्पादिता । तस्य धवलनं तत्कर्तृकं धवलीकरणं तस्य चूर्णकः उपकरणविशेषः । कूर्चको हि चूर्णलेपनार्थं लोके मुंजादिभिः क्रियते । मदन एव वल्ली तस्याः पल्लवनं वर्धनं पल्लवसंपादनं वा तस्य महौषधिसदृशी ज्योत्स्ना यस्य यज्ज्योत्स्नारूपमहौषध्या मदनरूपवल्लयाः पल्लवनं अंकुरोद्गमो भवतीति तात्पर्यार्थः । अनंगस्य मदनस्य यत् केलिभवनं क्रीडागृहं तस्य यदंगणं (तं?) तस्य चंदनपंकनिर्मितो वर्णकमालेपनं (तं?) तद्रूपः । चंदनपंकस्य वर्ण इव वर्णो यस्येति वा । मदनकेलिगृहरूपभूमंडामागनलेपनं कारिचंदनपंकालयनरूप ? इति तात्पर्यार्थः ।

†अपिच जनानन्दश्चंद्रो हसति मलिनीभवति नलिनी । विसदंते विक-

---

१ A. drops भवण. C. भवणअलविछुरण. २ C. सिरिसं जोअरुओ. ३ C. दहदिहं.

Digitized by Google

रहंगा ढज्जंगा विरहसिहिणा देद्धविहिणा
इमे दुक्खकंता ससिकरकिलिंता विहडिदा ॥ ९ ॥

(पुनर्नेपथ्ये)

ये पूर्वं यवसूचिसूत्रसुहृदो ये केतकाग्रच्छद-
च्छायासाम्यभृतो मृणाललतिकालावण्यभाजोऽत्र ये ।
ये धाराम्बुविडम्बिनः क्षणमथो ये तारहारश्रिय-
स्तेऽमी स्फाटिकदण्डडम्बरजितो जाताःसुधांशोःकराः॥१०॥

रथाङ्गा दग्धाङ्गा विरहशिखिना दग्धविधिना
इमे दुःखक्रान्ताः शशिकरक्रान्ता विघटिताः ॥ ९ ॥

संते तागा रजनिश्रीहारा दिशि दिशि । रथांगा दग्धांगा विरहशिखिना दग्धविधिना । इमे दुःखाक्रान्ताः शशिकरक्रान्ता विघटिताः । जनानानन्दयति स तथा चन्द्रो हसति प्रकाशमानो भवति नलिनी चन्द्रोदयविकासिकमलशलिनी कमलिनी मलिनाभवति म्लाना भवति रजनिश्रियो रात्रिलक्ष्म्या हाररूपास्तारा दिशिदिशि प्रतिदिशं विकसन्ते विकसिता भवन्ति शशिकरैः क्रान्ता पिडिता विरहरूपेण शिखिनाग्निना दग्धान्यङ्गानि येषां ते तथा दग्धविधिना दुर्दैवेन [डद्वैवेम ?] दुःखेनाक्रान्ता दुःखव्याप्ता इमे रथाङ्गाश्चक्रवाका विघटिता विघटनां वियोगं प्राप्ता अथवा दग्धविधिना विघटिता इमे रथाङ्गा इत्याद्युद्दिश्य विरहशिखिना दग्धाङ्गा इति विधेयं योजनीयम् ॥ ९ ॥

ये पूर्वमिति । ये सुधांशोः कराः पूर्वं यवसूचयो यवाग्राणि तान्येव सूत्राणि तन्तवो यवसूचयश्च सूत्राणि चेति वा तेषां सुहृदः समानधर्माणो ये अथो अनन्तरं क्षणं केतकानां केतकीपुष्पाणामग्रच्छदा दलाग्राणि तेषां छायायाः कान्तेः साम्ये बिभ्रति तादृशा जाता इत्यत्राथो इति क्षणमिति च पठितं सर्वत्र सम्बध्यते, तदुत्तरं ये क्षणं मृणाललतिकानां लावण्यं सौन्दर्यं भजन्ति तादृशा जाता अथो ये क्षणं धाराम्बुविडम्बिनो जाता अथो ये क्षणं तारापहारास्तच्छ्रियो जाता तेऽमी सुधांशोः कराः स्फाटिको यो दण्डो यष्टिस्तडम्ब [द्भुव?]रमाकृतिविशेषं जयन्ति ते तादृशा जाताः क्रमशो वर्धमानप्रौढिभाजो जाता इत्यर्थः ॥ १० ॥

---

१ B.C. डइंगा. २ B.C. टुइ. ३ B. किलंता ४ A. B.विहलिदा. C.विहिडिता

अपि च । सद्यश्चन्दनपङ्कपिच्छिलमिव व्योमाङ्गणं कल्पयन्
पश्यैरावतकान्तदन्तमुसलच्छेदोपमेयाकृतिः ।
उद्गच्छत्यय मच्छमौक्तिकलताप्रालम्बलम्बैः करै-
र्मुग्धानां स्मरलेखवाचनकलाकेलिप्रदीपः शशी ॥११॥

विदूषकः। भो एसा कलकण्ठी णाम देवीए णग्गारिणी। तीए वअणादो पुण्णिमाचंदोदअं कप्पूरचंडणामधेयो मागधो अहिणंदेदि मिअंकुज्जोअलच्छिं । ता मह वि वड्ढदि तुंडकंडू । अहं पि वण्णिस्सं। ससिबोलआहिं ढलिओ जोण्हाखडिआरसो मलीकुणइ णक्खत्तक्खरमालं णहफलए तिमिरकज्जलिए ।* (क)

(क) भो एषा कलकण्ठी नाम देव्या नागरिणी । तस्या वचनात् पूर्णिमाचन्द्रोदये कर्पूरचन्द्रनामधेयो मागधोऽभिनन्दति मृगाङ्कोद्योतलक्ष्मीम् । तन्ममापि वर्धते तुण्डकण्डूः । अहमपि वर्णयिष्ये । शशिमधीपात्रात्स्यन्दितो ज्योत्स्नाखडिकारसो मलीकरोति नक्षत्राक्षरमालां नभःफलके तिमिरकज्जालिते ।

सद्य इति । अयं शश्युद्गच्छति त्वं पश्येति राजानं प्रति कर्पूरचन्दनामकस्य मागधस्योक्तिः । कीदृशः । व्योम्नो गगनस्याङ्गणं कर्म सद्यस्तत्कालं चन्दनपङ्केन पिच्छिलमिव विजिलमिव । स्यात् पिच्छिलं तु विजिलमित्यमरः । चिकट इति महाराष्ट्रभाषायाम् । कल्पयन्त्रचयन्नैरावतस्येन्द्रगजस्य कान्ता ये दन्तास्ते मुसलानीव तेषां ये छदाः खण्डानि तैरुपमीयते तादृश्याकृतिर्यस्य सः । अच्छानां मौक्तिकानां ये लता इव प्रालम्बाः प्रालम्बिकाः स्वर्गोन्मितकण्ठभूषास्तद्वद्दीर्घैः करैः किरणैरुपलक्षितः । ग्रैवेयकं कण्ठभूषा लम्बमानं ललन्तिका । स्वर्गैः प्रालम्बिकैरित्यमरः । प्रालम्बः स्यात्पयोधरे । त्रपुसे हारभेदे चेति हैमः । मुग्धानामत्यन्तसुन्दरीणां स्मरलेखस्य मदनसम्बन्धिनः सन्धिविग्रहसूचकपत्रस्य वाचनकलायां केलिप्रदीपः क्रीडादीपः ॥ ११ ॥

*विदू । एष कलकण्ठी नाम देव्या णग्गारिणी ? वाद्यवादनकर्त्री नगारिणीत्येव मध्यदेशभाषया प्रसिद्धा तस्या वचनात् पूर्णिमाचन्द्रोदये कर्पू-

---

१ C. पडिआरिणी. २ C. कंडूदि. ३ C. ससिबालो इह लिहओ. ४ D. मसीकुणइ. ५ C. तिमिरकज्जलीलिहिदे. B. °कज्जलिह.

Digitized by Google

राजा । सखेनाद्यापि शैशवोक्तेरतिरिच्यसे[1] ।

विदूषकः । किं विअ मक्कडो उवट्ठाणं करेंतो चुक्कदि । अहवा तरुणुत्तिहिं वण्णइस्सं ।* (क)

†अकंकणमकुंडलं दसदिसावहूमंडणं
अचंदणमकुंकुमं धरणिमंडलीभूसणं ।
असोसणममोहणं मअरलञ्छणस्सा[2]उहं
मिअङ्किरणावली णहतलम्मि पुंजिज्जइ ॥१२॥(ख)

राजा । (समन्तादवलोक्य मदनाकूतमभिनीय) भगवन्यामिनीनाथ कस्तवायं विरुद्धो विधिः ।

(क) किमिव मर्कट उपस्थानं कुर्वन् विस्मरति। अथवा तरुणोक्तिभिर्वर्णयिष्ये ।

(ख) अकङ्कणमकुण्डलं दशदिशावधूमण्डनं
अकुङ्कुमचन्दनं धरणिमण्डलीभूषणम् ।
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगाङ्किरणावली नभस्तले पुञ्ज्यते ॥ १२ ॥

रचन्दनामधेयो मागधोऽभिनन्दयति मृगाङ्कद्योतलक्ष्मीं तन्ममापि वर्धते तुण्डकंडूरहमपि वर्णयिष्ये । शशिमषीपात्रात् स्यन्दितो ज्योत्स्नाखटिकारसो मषीकरोति नक्षत्राक्षरमालां नभःफलके तिमिरकज्जालिते । बोलकाहिं बोलकाद् बोलकें इति काष्ठमदादिनिर्मिते मषीकाष्ठ[पाष्ट?]फलके खटिकारसरूपया मष्या श्वेताक्षरमालां लिपिग्रहणावसरे लिखन्ति तदस्य सन्दर्भस्य वृथा? रूपकादिना वर्णनं कृतमिति तात्पर्यार्थः ।

*विदू । किमिव मर्कट उपस्थानं कुर्वन् चुक्कदि विस्मरति । अथवा तरुणोक्तिभिर्वर्णयिष्ये । †अकंकणमकुण्डलं दशदिशावधूमण्डनम् । अचन्दनमकुंकुमं धरणिमण्डलीभूषणम्।अशोषणममोहनं मकरलाञ्छनस्य मदनस्यायुंज्यते ? दासीक्रियते ।

---

१ D. अतिरिच्यते. २ B. drops वि. C. आ मक्कणो डो उवट्ठाणं. ३ D. स्सांउहं. ४ D. पुञ्जिज्जए. ५ B. C. drop कः

Digitized by Google

सूतिर्दुग्धसमुद्रतो भगवतः श्रीकौस्तुभौ सोदरौ
सौहार्दं कुमुदाकरेषु किरणाः पीयूषधाराकिरः ।
स्पर्धा ते वदनाम्बुजैर्मृगदृशां तत्स्थाणुचूडामणे
हंहो चन्द्र कथं नु सिञ्चसि मयि ज्वालामुचो रोचिषः ॥ १३ ॥

(चतुर्दिशमवलोक्य)

यन्त्रद्रावितकेतकोदरदलस्रोतःश्रियं बिभ्रती
येयं मौक्तिकदामगुम्फनविधेर्योग्यच्छविः प्रागभूत् ।
उत्सेच्या कलशीभिरञ्जलिपुटैर्ग्राह्या मृणालाङ्कुरैः
पातव्या च शशिन्यमुग्धविभवे सा चन्द्रिका वर्तते ॥ १४ ॥

(विभाव्य) वैमर्म्यमेव वा शशलक्ष्मणो मादृग्जनप्राणसंदेहहेतुः । वैशद्यमेव वा विषमं विषस्य । (सौभ्यर्थनम्)

सूतिरिति । हंहो स्थाणुचूडामणे चन्द्र भगवतो दुग्धसमुद्रतः क्षीरसमुद्रात्सूतिरुत्पत्तिःसोदरावेकोदरप्रसूतौ श्रीकौस्तुभौ श्रीश्च कौस्तुभश्च तौ कुमुदाकरेषु कुमुदानामाकरेषु समुदायेषु सौहार्दं किरणाःपीयूषस्यामृतस्य धाराःश्रेणीः किरन्ति तादृशा मृगदृशां वदनाम्बुजैर्मुखकमलैः सह ते तव स्पर्धा । एवं सति त्वं मयि विषये ज्वाला वह्निशिखा मुञ्चन्ति ता रोचिषो दीप्तयः कथं केन प्रकारेण सिंचसि क्षीरसमुद्रादीनां यथाकथञ्चिद्भवदीयानामतिशीतलत्वेनातिसन्तापकारिचंद्रिकाः कथमपि सिञ्चसीति भावः ॥ १३ ॥

यंत्रेति । येयं चन्द्रिका प्राग्बाल्यावस्थायां यन्त्रेण तैलेक्षुरसनिष्कासनार्थे सम्पादितदारुशिलादिनिर्मितोपकरणविशेषेण द्रावितानि (*दृतानि दूतानि?) यानि के(दू?) तकानां केतकीपुष्पाणामुदरदलानि मध्यवर्तिपर्णानि तेषां स्रोतसो रसप्रवाहस्य श्रियं शोभां बिभ्रती धारयन्ती सती मौक्तिकदामनां मुक्ताहाराणां गुम्फनविधेर्ग्रथनविधेर्योग्या सदृशी छविः कान्तिर्यस्याः सा तादृश्यभूत् । सा शशिनि चन्द्रेऽमुग्धविभवे प्रौढे सति कलशीभिरल्पैः कलशैरुत्सेक्योत्सेचनयोग्या तथाञ्जलिपुटैर्ग्राह्या ग्रहणयोग्या मृणालाङ्कुरैः पातव्या पातुं योग्या वर्तते । चकारो वर्तत इति क्रियायाः प्रत्येकमभिसम्बन्धार्थश्चन्द्रिकायामुत्सेक्यादिनां त्रयाणां विशेषणानां समुच्चयार्थो वा । साभ्यर्थनं सप्रार्थनमञ्जलिपुटं विधायेति यावत् ॥ १४ ॥

---

१ C. कुसुमाकरे च. २ D. Simply अपि च. ३ C. यं या B. यं यं. ४ C. अयमेव. ५ D. adds here चतुर्दिशमवलोक्य.

Digitized by Google

अयि पिबत चकोराः कृत्स्नमुन्नाम्य कण्ठं
क्रमकवलनचञ्चच्चञ्चवश्चन्द्रिकाम्भः ।
विरहविधुरितानां जीवितत्राणहेतो
र्भवति हरिणलक्ष्मा येन तेजोदरिद्रः ॥ १९ ॥

(पुरोऽवलोक्य) सैवेयं मृगाङ्कावली ।

विदूषकः । भो मिअंकावली ज्जेव एसा । ण हु एकचन्दस्स एत्तिओ कंतिवित्थारो । †(क)

राजा । ततः कदलीलतान्तरितावेव शृणुवस्तावदस्या विश्रम्भजल्पितानि । आतृप्ति पिबतां श्रवसी रसायनम् । (तथा कुरुतः)

(ततः प्रविशति मृगाङ्कावली विचक्षणा च)

मृगाङ्कावली । (अनुध्याननाटितकेन[2] चन्द्रं चन्दनकर्दमेत्यादि पठति)

राजा । (सखेदम्) अहो मदनमन्त्राक्षराणि सुभाषितवचनान्यस्याः ।

(क) भो मृगाङ्कावल्येवैषा । न खलु एकचन्द्रस्य एतावान् कान्तिविस्तारः ।

अयीति । अयीति कोमलामन्त्रणे चकोरा यूयं कृत्स्नं समग्रं कण्ठमुन्नाम्योर्ध्वं कृत्वा क्रमेण पौर्वापर्येण कवलने भक्षणे चञ्चन्त्यः प्रसरन्त्यः शोभायमाना वा चंचवो मुखाग्रभागा येषां ते तादृशाः सन्तो विरहेण विधुरितानां सर्वात्मना शून्यीभूतानां त्राणहेतोः । षष्ठी हेतुप्रयोगे । त्राणेन हेतुना त्राणार्थमिति यावत् । चान्द्रिका ज्योत्स्नैवाम्भः पानीयं क्रमं पिबत आचामत येन चन्द्रिकापानेन हरिणलक्ष्मा मृगाङ्को मलिनंभर? इति यावत् तेजसा दरिद्रो भवति वर्तमानसामीप्ये वर्तमानवद्वेति भवेदित्यर्थः ।

†विदू । भो मृगाङ्कावल्येव चन्द्रश्रेणिरेवैषा न खल्वेकचन्द्रस्यैतावान् कान्तिविस्तारः ।

मृगाङ्कावली । तदेवेति । द्वितीयाङ्कशेषे यदुक्तं निपथ्ये ' रइदाभेए तुहावत्था ' इत्युपक्रम्य ' चन्द्रं चंदनकर्दमेनेत्यादि ' तापोष्मःप्रस्तुतैव ' इत्यादि च श्लोकद्वयं पठतीत्यर्थः । क्वचित्पुस्तके 'चन्दनकर्दमेनेत्यादि पठति' इत्येव पाठः ।

---

१ C. नित्यमुन्नाम. २ D. तदेव पठति.

Digitized by Google

विदूषकः । अहं उण जाणे निसिदाओ हदमअणस्स हत्थ-भल्लीओ । †(क)

राजा । कण्ठे मौक्तिकमालिकाः स्तनतटे कार्पूरमच्छं रजः
सान्द्रं चन्दनमङ्गके वलयिताः पाणौ मृणालीलताः ।
तन्वी नक्तमियं चकास्ति तनुनी चीनांशुके बिभ्रती
शीतांशोरधिदेवतेव गलिता व्योमाग्रमारोहतः॥ १६॥

विदूषकः । भो सच्चकं ज्जेव्व । चंदाधिदेवता ज्जेव्व एसा गलिदा । जेदो लंछणच्छलेण मअलंछणस्स ईमीअ अइरपरि-च्चत्तं मिलाणमलिणं विअ मंडलमज्झं णिज्झाअदि * । (ख)

(क) अहं पुनर्जाने निशिता हतमदनस्य हस्तभल्यः ।

(ख) भोः सत्यकमेव । चन्द्राधिदेवतैवैषा गलिता । यतो लाञ्छनच्छलेन मृगलाञ्छनस्यानया अचिरपरित्यक्तं म्लानमलिन-मिव मण्डलमध्यं निर्ध्यायते ।

---

†विदू । अहं पुनर्जाने निशिता हतमदनस्य हस्तभल्लयः ।

कण्ठ इति । नक्तं रात्रावियं तन्वी चकास्ते शोभते कीदृशी कण्ठे मौक्तिकानां मालिका अल्पा माला बिभ्रती धारयन्ती । बिभ्रतीति सर्वान्ते पठितं सर्वत्र सम्बध्यते । स्तनयोस्तटे प्रान्तभागे कर्पूरस्येदं कार्पूरं रजः परागान् बिभ्रती । अङ्गके स्वार्थे कन् वयःसन्धिसत्त्वेन स्वल्पार्थे वा । सा-न्द्रं घनं चन्दनं बिभ्रती पाणौ हस्ते वलयिता वलयाकारा मृणालीलता बिभ्रती । तनुनी सूक्ष्मे चीनस्य चीननाम्ना पश्चिमदेशे प्रसिद्धस्य देशस्य संबन्धिना अंशुके वस्त्रे बिभ्रती । केव । व्योम्नोऽग्रं मध्यप्रदेशमारोहतः आरोहणं कुर्वतः शीतांशोश्चन्द्रमसो गलिता निपतिता अधिदेवतेव स्वात्म-देवता अधिष्ठात्री देवतेवेत्यर्थः ॥ १६ ॥

*विदू । भो सत्यकमेव । चन्द्राधिदेवतैवैषा गलिता ततो लाञ्छनच्छलेन मृगलाञ्छनस्यानया अचिरपरित्यक्तं म्लानमलिनमिव म्लानमत एव म-लिनमिवेत्यर्थः । मण्डलमध्यं निर्ध्यायते दृश्यते ।

---

१ C. हत्थत्थभल्लीआओ. २ D. तदी. ३ C. इअभिअं. ४ D. व. ५ D. वि-ज्जाअदी दीसदि.

Digitized by Google

राजा। सखे मांसलतां दधत्यपि चरित्रकोरबोते व्यतिरिच्यत एवास्याः स्वरसजन्मा पाण्डिमा। विभाव्यत एव वा शङ्खशुक्तियुक्तापि मुक्तावली। तथा हि

दरदलितहरिद्राग्रन्थिगौरे शरीरे
स्फुरति विरहजन्मा कोऽप्ययं पाण्डुभावः।
बलवति सति यस्मिन् सार्धमावर्त्य हेम्ना
रजतमिव मृगाक्ष्याः कल्पितान्यङ्गकानि ॥ १७ ॥

विदूषकः। पारअरसचुंबिअं व सुवण्णं से लावण्णं कमक्कंतगोरत्तणेण परिवग्गिदं पंडुभावेण * । (क)

मृगाङ्कावली। हंहो हिअअ णअणेहिं दिट्ठो तुमं उत्तमसित्ति अहो अच्चरिअं अच्चरिअं। अहवा मूले बउलल्लट्ठीए सुरागंडूससेओ कुसुमेसु मइरागंधुग्गारोत्ति । † (ख)

(क) पारदरसचुम्बितमिव सुवर्णमस्या लावण्यं क्रमाक्रान्तगौरत्वेन परिवारितं पाण्डुभावेन ।

(ख) हंहो हृदय नयनाभ्यां दृष्टःत्वमुत्ताम्यसीत्यहो आश्चर्यमाश्चर्यम् । अथवा मूले बकुलयष्ट्याः सुरागण्डूषसेकः कुसुमेषु मदिरागन्धोद्गार इति ।

कृता या हरिद्राग्रन्थिस्तद्वत् गौरः । गौरः पीतेऽरुणे सित इति कोषः दरदलितेत्यपि क्वचित्पाठः । यस्मिन् पाण्डुभावे वलति वृद्धे सति हेम्ना सुवर्णेन सार्धं रजतं रूप्यमावर्त्यामौ द्रवीभूतं कृत्वा मृगाक्ष्या अङ्गकानि कल्पितानीवेत्युत्प्रेक्षा ॥१७॥

* विदू । पारदरसचुम्बितमिव सुवर्णमस्या लावण्यं क्रमाक्रान्तगौरत्वेन परिवारितं पाण्डुभावेन ।

†मृगां । हंहो हृदय नयनाभ्यां दृष्टस्त्वमुत्ताम्यसीत्याश्चर्यमाश्चर्यम् अथवा मूले बकुलयष्ट्याः (बकुलमय्याः ?) सुरागण्डूषसेकः कुसुमेषु मदिरागन्धोद्गार इति ।

---

१ D. इव. २ C. कामक्कंत. ३ C. परिवण्णिदं. ४ D. drops one अच्चरिअं. ५ B. वलल्यट्ठीए. C. पविट्ठो केहरस्स. ६ C. गंधुग्गारोत्ति.

Digitized by Google

विदूषकः । किं कारणम् * । (क)

राजा । इदं हि कारणम् । रतसर्वस्वं हृदयमस्याः । अतो इयं स्वेनैव हृदयेन सह कलहायते ।

मृगां । अइ कप्पूरसलाआसिसिर विज्जाहरमल्ल । तुमंपि तवसित्ति कधं मे णिव्वुदि । चन्दमणी हुअवहं णीसंददित्ति को वा पडीआरो † । (ख)

राजा । नमो मह्यं मृगाङ्कबलीचतुरोपालम्भपात्रीकृताय ।

मृगां । सहि सामण्णकुसुमबाणो भविअ कधं एआरिसदसं जणं करेदि मअणो ता णूणं से विसकुसुममया बाणा ‡ । (ग)

राजा । साधिलरूपापि दहति हिमानी । कुसुममय्यपि स्वभावचण्डा मदनपञ्चशरी ।

(क) किं कारणम् ।

(ख) अयि कर्पूरशलाकाशिशिर विद्याधरमल्ल त्वमपि तपसीति कथं मे निर्वृतिः । चन्द्रमणिर्हुतवहं निस्यन्दत इति को वा प्रतीकारः ।

(ग) सखि सामान्यकुसुमबाणो भूत्वा कथमेतादृशदशं जनं करोति मदनः तन्नूनमस्य विषकुसुममया बाणाः ।

---

* विद् । किं कारणम् । किमः प्रश्नवाचकत्वेन राजानं प्रति कारणं पृच्छतीत्यर्थः ।

† मृगां । अयि कर्पूरशलाकाशिशिर विद्याधरमल्ल त्वमपि तापयसीति कथं मे निर्वृतिः । चन्द्रमणिर्हुतवहं निस्यन्दत इति को वा प्रतीकारः ।

‡ मृगां । सखि सामान्यकुसुमबाणो भूत्वा कथमेतादृशदशं जनं करोति मदनस्तद्नूनमस्य विषकुसुममया बाणाः ।

---

१ D. कारणान्तरसाम्यं २ B, D. drop अतः इदम् । ३ D. drops सह.
४ C. ° सम्मच्छाआसिसिर । ५ C. में हुअवहं । ६ D. drops पि ।

Digitized by Google

विदूषकः । भो वयस्स उण्हारिदुसक्करापुत्तलिअव्व[1] खणे खणे झिज्जमाणी[2] एसा कं ण दुक्खेदि । किं उण मिलाणा वि मरुअकन्दली सुगन्धा । विरहपरिक्खामा वि अइरमणिज्जा । किं अ कोरण्टकुसुममालाव्व मिलायमाणा वि सुट्ठु खलु रत्तत्तणं दंसेदि[3] ॥ (क)

मृगां । सहि । अहवा किं करीअदु दुच्छेज्जा पेमदुद्दोणी[4] । (सखेदम्) सहि णिरणुक्कोसो खु सो । विरलो वा परदुक्खदुक्खिदो जणो[5] । थोआ ण्हपंचमझङ्कारा मुक्ककुसुमुप्पीडविडम्बिणो[6] । (सप्रश्रयम्) अइ तिहुअणेक्कधाणुक्क वम्मह मिअंकचूडामणिपरिक्खिदतिक्खत्तणेहिं सरेहिं महिलाअणं विणिहंतो ण लज्जसि[7] । जाणामि जेत्तं तस्सिं पि जणे एमेअ आरभडीचंडो होसि[8] । (ख)

(क) भो वयस्य वर्षाऋतुशर्करापुत्तलिकेव क्षणे क्षणे क्षीयमाणैषा कं न दुःखयति । किं पुनर्म्लानापि मरुवककन्दली सुगन्धा । विरहपरिक्षामाप्यतिरमणीया । कुरण्टककुसुममालेव म्लायमानापि सुष्ठु खलु रक्तत्वं दर्शयति ।

(ख) सखि अथवा किं क्रियतां दुश्छेद्या प्रेमदुर्द्रोणी । सखि निरनुक्रोशः खलु सः । विरलो वा परदुःखदुःखितो जनः । स्तोका नवपञ्चमझङ्कारा मुक्तकुसुमोत्पीडविडाम्बिनः । अयि त्रि-

---

* विदू । भो वयस्य वर्षाऋतुशर्करापुत्तलिकेव क्षणे क्षणे क्षीयमाणैषा कं न दुनोति । किं पुनर्म्लानापि मरुवककन्दली सुगन्धा विरहपरिक्षामाप्यतिरमणीया । कुरण्टककुसुममालेव म्लायमानापि सुष्ठु खलु रक्तत्वं दर्शयति ।

† मृगा । सखि । अथवा किं क्रियतां दुश्छेद्या प्रेमदुर्द्रोणी । द्रोणी काष्ठाम्बुवाहिनीत्यमरः । प्रेमैव दुष्टा विरहे निस्तारकारित्वेन सन्तापदायि-

---

१ B. वासारिदु. C. विआरेदु. २ C. drops ख्खा. ३ B. दुक्खेदि. D. हुवेति. ४ C. सुआधिक. ५ C. अ. ६ C. ण भमरा मुक्तकुसुमप्पीडविडम्बिणो. ७ B. परिक्खिप्त. D. चूडामणि परिक्खित्त. ८ B. विणहंतो. D. विनहन्तो. ९ B. जाई. C. drops जह.

Digitized by Google

राजा । सुतनु सुतरामारभटीचण्डः ।

विदूषकः । (उच्चैर्हसित्वा) अप्पगस्स वि आरभडित्ति महाहासो मे ।* (क)

राजा । किमिदमुच्चैर्हसितेन त्रासयसीमाम् ।

मृगां । सहि विअक्खणे जणसञ्चारो विअ । † (ख)

भुवनैकधानुष्क मन्मथ मृगाङ्कचूडामणिपरीक्षिततीक्ष्णत्वैः शरैर्महिलाजनं विनिघ्नन् न लज्जसे । जानामि यत् तस्मिन्नपि जने एवमेवारभटीचण्डो भवसि ।

(क) अनङ्गस्याप्यारभटीति महाहासो मे ।

(ख) सखि विचक्षणे जनसंचार इव ।

त्वेन च दुष्टत्वम्। द्रोणी एककाष्ठमयी नौका सुखसागरविहारोपायत्वेन च प्रेम्णो नौकया रूपणम्। सा प्रेमदुर्द्रोणी दुश्छेद्या छेत्तुमशक्या। द्रोणी 'डोंगी' इत्येव मध्यदेशे प्रसिद्धा । दुर्द्रोणी शृङ्गलेत्यपि केचित् । साखि निरनुक्रोशः खलु सः । स विद्याधरमल्लदेवो निरनुक्रोशो दयारहितः । कृपा दयानुकम्पा स्यादनुक्रोशोऽपीत्यमरः । विरलो वा परदुःखदुःखितो जनः स्तोकाः स्वल्पा नवपञ्चमझङ्कारा मुक्तकुसुमोत्पीडविडम्बिनः । पिकः कूजति पञ्चममित्यभिधानान्नवा नूतनाः कोकिलस्वराः पञ्चमरागविशेषझङ्कारा वा मुक्तः शीर्णो यः कुसुमोत्पीडः कुसुमशेखरस्तं विडम्बयन्ति तादृशास्तद्वद् दुःखदायिन इत्यर्थः । अयि त्रिभुवनैकधानुष्क मन्मथ मृगाङ्कचूडामणिप्रक्षिततीक्ष्णत्वैः शरैर्महिलाजनं विघृघ्नन् न लज्जसे । जानामि यदेतस्मिन्नपि जने एवमेवारभटीचण्डो भवसि । आरभटी आडम्बरं तत्र चण्डस्तद्वाहुल्यवान् अथवारभटी नामार्थवृत्तिविशेषः । उक्तं च । आरभटी पुनः । मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः । उपलक्षणे चेयं तृतीया तथा च तदुपलक्षितवृत्तिविशेषस्तेन चण्डो भवसीत्यर्थः ।

*विदू । अनङ्गस्याप्यरहितस्यापि आरभटीति महाहासो मे ।

मृगां । सखि विचक्षणे जनसंचार इव ।

---

१ B. सुतरां चारभटी. D. drops the whole episode. † D. drops (उच्चैर्हसित्वा). ३ C. adds यत्. ४ D. त्रासयसे माम्.

Digitized by Google

विदूषणा । तं कदलीगुल्मान्तरिदा जाणीमो किं णु एदंति ।
*(क) (तथा कुरुतः)
विदूषकः । एहि पविसह्म ।† (ख) (इति परिक्रामतः)
राजा । (सविलासोपालम्भमालोक्य नायिकायाः च)

मृणालस्तेनलक्ष्मीकृतं तया
तदीय एवैष वृतसपल्लवः ।
इदं च तस्याः कदलीदलांशुकं
(ग) स पत्रसंक्रांत इव स्मरज्वरः ॥ १८ ॥

तदनया तदुपभुक्तपरित्यक्तया शीतसामग्र्यात्मानं निर्वापयामि । (तथा करोत्युपविशति च । विदूषकोऽपि यथोचितमुपविशति)
राजा । (संतापमभिनीय) अहह । अपर्यालोचितमाचरितम्‡ । यतः

शीतांशुर्विषसोदरः फणभृतां लीलास्पदं चन्दनं
हाराः क्षारपयोभुवः प्रियसुहृत् पङ्केरुहं भास्वतः ।
इत्येषां किमिवास्तु वस्तु मदनज्वालाविघाताय यद्
बाह्याकारपरिभ्रमेण तु वयं तत्त्वात्ययो वञ्चिताः ॥ १९ ॥

(क) तत्कदलीगुल्मान्तरिते जानीवः किं न्वेतदिति ।
(ख) एहि प्रविशावः ।

---

*विदू । तत्कदलीगुल्मान्तरिते जानीवः किन्वेतदिति ।
†विदू । एहि प्रविशाव । इति ।
‡अपर्यालोचितमविचारितं न पर्यालोचितं विचारो यथा स्यादेवमिति वा ।
शीतांशुरिति । शीतांशुश्चन्द्रमा विषस्य सोदरः समानोदरो भ्राता चन्दनं मलयजं फणभृतां सर्पाणां लीलास्पदं लीलागृहं हारा मुक्तादामानि क्षारं पयो यस्य स क्षारपयाः लवणाम्भोधिस्तस्माद् भवन्ति तादृशाः । पङ्केरुहं कमलं भास्वत उष्णांशोः प्रियसुहृद् वर्तते तुल्येषां बाह्याकारस्य परिभ्रमेण बाह्यशीतलत्वभ्रान्त्येति पूर्वोक्तेन विषसोदरत्वादिना प्रकारेण यत् तत्त्वे स-

---

१ D. वसन्त. २ D. omits (संतापमभिनीय). ३ C. किमुक्तवान्.

Digitized by Google

विचक्षणा । सखि मृगाङ्कावलि फलितं मे दूतत्वेन महाराजोऽप्येतादृशमवस्थान्तरमुद्वहति । (ख)

राजा । (सस्पृहमभिवर्ण्य) ।

व्यजनमरुतः श्वासश्रेणीनिमापुपचिन्वते
मलयजरसो धारासारं क्षमाक्षिपति क्षिपुः ।
कुसुमशयनं कामक्लान्तां करोति सहस्रतां
द्विगुणगरिमा कामोन्माथः कथं नु विरंस्यति ॥ २० ॥

विदूषकः । अहो मुद्रासणाहो लेहो विअ । (ख)

राजा । न केवलं लेखः स्मरसंधिविग्रहसंबन्धश्च । तथाहि ।

पश्य

तालीदलं यदकठोरतरं यदत्र
मुद्रा स्तनाङ्कघनचन्दनपङ्कमूर्त्तिः ।

(क) सखि मृगाङ्कावलि फलितं मे दूतत्वेन । महाराजोऽप्येतादृशमवस्थान्तरमुद्वहति ।

(ख) अहो मुद्रासनार्हो लेख इव ।

न्तापजनकत्वं तत् त्यजन्ति ते तत्त्वतज्ञः सन्तो वञ्चिता वञ्चनां प्राप्ताः । एषा पूर्वोक्तानां शीतांशुप्रभृतीनां मध्ये किमिव वस्तु मदनज्वालाविघातायास्तु न किमपीत्यर्थः ॥ १९ ॥

*विच । सखि मृगाङ्कावलि फलितं मे दूतत्वेन । महाराजोऽपि एतादृशमवस्थान्तरमुद्वहति ।

व्यजनमरुत इति । यद् व्यजनमरुदादिकं कामोन्माथविरामाय सज्यते तेन तदीयानां श्वासश्रेण्यादीनामुपचयादिजनताद् द्विगुणोऽनेकगुणो गरिमा यस्य स कामस्य मदनस्योन्माथस्तत्सम्बन्धिनी पीडा कथं केन प्रकारेण विरंस्यति विरमं प्राप्स्यति न कथमपीति तात्पर्यार्थः ॥ २० ॥

विदू० । अहो मुद्रासनार्हो लेख इव ।

राजा । न केवलमिति । यदत्र यस्मिन् मयकरे तालीदलं सन्धिविग्रहसम्बन्धो कि

---

१ B. दूतत्वेन । D. दूतत्वेना । २ D. मयकर । ३ D. स्मरसंधि ।

[illegible]
कस्याश्चिदेष गलितस्तदनङ्गलेखः ॥ २१ ॥

विदूषकः। तीए ज्जेव एसो सण्णिधिपरिच्चाअकारणं भणिदव्वं। * (क)

राजा। (विदूषकं कर्णे विधृत्य) विदूरवसुधैव† रत्नशलाकाभूर्भवदुच्चोवृत्तिरेव रसनिष्पन्दभूमिः। तदुपरि नाम दर्शय।

विदूषकः। (तथा करोति)

राजा। (वाचयति) निष्कृपे वसोकमः।

विदूषकः। उम्मुद्दिअ दंसइस्सं। (तथा कृत्वा) भो अरअण रअणकरंडअं अणक्खरो लेहो। ‡ (ख)

(क) तस्या एवैष सन्निधिपरित्यागकारणं भणितव्यम्।

(ख) उन्मुद्र्य दर्शयिष्ये। भो अरत्ने रत्नकरण्डकमनक्षरो लेखः।

प्रहेत्यत्रादिपदपूरणेन संधिविग्रहयानासनद्वैधीभावसंश्रयरूपं कामषाड्गुण्यं लभ्यते तेन स्वावस्थानिवेदनपुरःसरं कामिलाभपर्यंतं सकलमत्र सूत्रितमित्यर्थः। तदेव विवृणोति तालीदलमिति।

अत्रेति। प्रत्येकमभिसम्बध्यते। यद्यस्माद्धेतोरत्र लेखेऽकठोरतरमतिशयेनाकठोरमकठोरतरं कोमलतरमित्यर्थस्यात्या दलं यत्र तेन शरीरस्यातिकोमलत्वं व्यज्यते यद्यत्र स्तनयोरङ्कश्चिह्नं यस्मिन्नेतादृशी यो घनश्चन्दनपङ्कः स एव मूर्तिः स्वरूपं यस्याः सा तादृशी मुद्रा। पत्रे हि प्रत्ययार्थं मुद्रा क्रियत इति। नवदेहस्य सर्वदा स्मरसन्तापवत्त्वं तदुपशमाय चन्दनलेपवत्त्वं स्तनपरिणाहश्च व्यज्यते यच्चात्र विसलतायास्तनवोऽल्पा ये तन्तवस्तेषामिदं णित्वात्समासान्ततनुपदस्यापि वृद्धिः। बन्धनं तेनसन्तापनिवृत्त्यर्थं मृणालसेवनं प्राणानां भुजाद्यवयवानां च विसतन्तुवत् सूक्ष्मत्वं च व्यज्यते। चकारः सर्वेषां समुच्चयार्थः। तदेषः कस्याश्चिद् गलितो निपतितोऽनङ्गलेखः॥ २१॥

* विदू। तस्या एवैष सन्निधिपरित्यागकारणं भणितव्यम्।

†विदूरवसुधैव। वैदूर्यमण्याकरभूमिरेव।

‡विदू। उन्मुद्र्य विगतमुद्रणं कृत्वा दर्शयिष्ये। भो अरत्ने रत्नकरण्डक-

---

१ B. D. °तान्तवं. २ C. उम्भिदिअ.

Digitized by Google

राजा । कामं करणगम्भीरः प्रयोगः कन्दलयति मानसम् । (विचिन्त्य) अथि तालियन्तसंपुटम् । (विमृश्य) तत्संधिबन्धमन्वेषय । किञ्चित्मन्त्रसमे कामतन्त्रमाभूषितं स्यात् ।

विदूषकः । (तथा कृत्वा अवलोक्य सहर्षम्) अहो दे बुद्धिविहवो । किं वा वण्णनं मिअलंछणस्स रोहिणी वल्लहेत्ति । *(क)

राजा । (सविस्मयं[5] आत्मगतं) †विधत्ते सोल्लेखं कतरदिह नाङ्कं तरुणिमा
तथापि प्रागल्भ्यं किमपि चतुरं लोचनयुगे ।
यदादत्ते दृश्यादखिलमपि भावव्यतिकरम्
(सविस्मयं विचिन्त्य)
पाणिप्रेङ्खणतो विशीर्णशिरसः स्वेदावलुप्तश्रिय
स्ता इत्याकृतितो मनाङ्ननसि नः किंचित्प्रतीतिं गताः ।

(क) अहो ते बुद्धिविभवः । किं वा वर्णनं मृगलाञ्छनस्य रोहिणीवल्लभ इति ।

मनक्षरो लेखः । कन्दलयति कन्दलवत्करोति कन्दलं अङ्कुरस्तद्युक्तं करोति । कन्दलन्तु नवाङ्कुर इति हैमः । कन्दोलयतीतिपाठेऽर्थो विचारणीयः ।

*विदू । अहो ते बुद्धिविभवः किंवा वर्णनं मृगलाञ्छनस्य रोहिणीवल्लभ इति ।

† विधत्त इत्यादि चरणत्रयं चतुर्थाङ्के चतुर्थपादपाठोत्तरं व्याख्यास्यते । पाणीति । लेखस्य पूर्वोक्तस्यानङ्कलेखस्याक्षराणां लिपीनां श्रेणयः पङ्क्तयः कर्तृभूताः स्वप्नेन चतुर्थचरणरहित्वादसंपूर्णेन वाक्येन चित्त इत्यादिपदसमुदायेन चकारादिशीर्णशिरस्त्वादिना च पक्ष्मलदृशोऽतिपक्ष्मयुक्तनयनाया व्याक्षेपं चित्तविक्षेपं कथयन्ति प्रकटयन्ति । कीदृश्यः । पाणेर्हस्तस्य प्रेङ्खणतः कम्पविशेषाद्विशीर्णानि सम्यगनिष्पन्नानि शिरांस्युपरितना रेखा यासां ताः स्वेदेनावलुप्ता श्रीः शोभातिशयो यासां ताः । नायकस्मरणेन कम्पस्वेदयोः सात्त्विकभावयोरुदयात् । मनागीदृशाकृतितः स्वरूपविशेषात्

---

१ C. संपूर्णी. २ D. बन्धवेषया. ३ D. ° पुत्रया. C. मन्त्रिनमात्मूषितं. ४ D. सूचितं ५ D. ° वलहस्सत्ति. ६ D. सविसंकुलं. C. विस्पष्टं. ७ C. स्वेदाम्बुलुप्त.

Digitized by Google

वैचित्र्यात्पुनरुक्तिलाञ्छनभृतः खण्डेन वाक्येन च
व्याक्षेपं कथयन्ति पद्मलदृशो लेखाक्षरश्रेणयः ॥ २२ ॥

विदूषकः । किं उवेक्खीअदि केलिकदलीकंदलीए करिशुण्डावेगो । ता एहि अणुसरह । * (क)

राजा । इदमुभयमनन्यगामि यन्मृगाङ्कानुवर्तनं रत्नाकरस्य मम हृदयानुवर्तनं च भवतः ।

विदूषकः । (अङ्गुल्या निर्दिशन्) इदो माधवीलदामण्डवं गदा जं दाणीं मअरद्धअपअसरणि व्व पअरिंछोली दीसदि ता णिहुअं अग्गदो भविअ णिरूवेह्म । † (ख) (तथा कुरुतः)

(क) किमुपेक्ष्यते केलिकदलीकन्दल्यां करिशुण्डावेगः । तदेह्यसनुसरावः ।

(ख) इतो माधवीलतामण्डपं गता यदिदानीं मकरध्वजपदसरणिरिव पदपङ्क्तिर्दृश्यते । तन्निभृतमग्रतो भूत्वा निरूपयावः ।

न इति विधत्त इत्यादय इति नोऽस्माकं नत्वन्येषां मनसि किंचिदसामञ्जस्येण प्रतीतिं निश्चयं गताः। वैचित्र्याद्विरहजन्यशून्यहृदयत्वात् पुनरुक्तिलाञ्छनं न तु वास्तवं पुनरुक्तत्वं तद्विभ्रति तादृश्यः । तरुणिमा इह मच्छरीरे कतरदङ्कं सोल्लेखमुत्कृष्टरेखासहितं न विधत्ते अपि तु सर्वमेव विधत्त इत्यनेनैव सर्वशरीरस्य सौंदर्यविशेषाभिमानेन यत्पुनरपि तथापि लोचनयुगे किमप्यनिर्वाच्यं चातुर्यमित्यभिहितं तेन पौनरुक्त्यमिव प्रतीयते तत्र तेषां शब्दानां पुनरनुपादानान्न शब्दपौनरुक्त्यं सर्वाङ्गमध्ये चक्षुषोरप्युपनिपतितार्थपौनरुक्त्यसंभावनायामपि सर्वाङ्गं सौन्दर्याभिधानेन लोचनयुगे वा अनिर्वाच्यचातुर्याभिधानेन कतरदित्यादेरेव वाक्यार्थत्वादपि तु सर्वमेव विधत्त इत्यस्य तु तात्पर्यार्थस्येन च नार्थपौनरुक्त्यमपीत्याशयेन पुनरुक्तिभृत इत्युक्तमिति प्रतिभाति ॥ २२ ॥

* विद्व । किमुपेक्ष्यते केलिकदलीकन्दल्यां क्रीडाकन्दल्यङ्के करिशुण्डावेगः । तदेहि अनुसरावः ।

† विद्व । इतो माधवीलतामण्डपं गता यदिदानीं मकरध्वजपदसरणिरिव पदपङ्क्तिर्दृश्यते तन्निभृतमग्रतो भूत्वा निरूपयावः ।

---

१ D वैचित्र्यात्पुनरुक्ति. २ B,C लाञ्छनं. ३ D पुनरुक्तत्वं. ४ B, रीछोली.

Digitized by Google

मृगाङ्कावली । (रुदित्वा सविषादमात्मगतम् । संस्कृतमाश्रित्य)

प्रियविरहमहोष्मामुर्मुरामङ्गलेखा-
मपि हतकहिमांशो मा स्पृश क्रीडयाऽपि ।
इह हि तव लुठन्तः क्लेशपीडां भजन्ते
दरजरठमृणालीकाण्डमुग्धा मयूखाः ॥ २३ ॥

(इति द्विस्त्रिरभिधाय रोदिति)

राजा । (विदूषकं प्रति) कारय चक्षुषी पारणाम् ।

अन्तस्तारं तरलतरलाः स्तोकमुत्पीडभाजः
पक्ष्माग्रेषु ग्रथितपृषतः कीर्णधाराः क्रमेण ।
चित्तावङ्कं निजगरिमतः सम्यगासूत्रयन्तो
निर्यान्त्यस्याः कुवलयदृशो बाष्पवारां प्रवाहाः ॥ २४ ॥

प्रियविरहेति । अपि हतकाहिमांशो हतं प्रत्ततं कं शिरोयस्य तादृशेति संबोधनं दुःखातिशयेन मुण्डीकाटे इतिमध्यदेशप्रसिद्धगालिदानपुरस्सरमिति केचित् । हतकेत्याक्षेपे । आक्षेपे हतकःस्मृत इति हलायुधः । हतं दूरीकृतं कं सुखं येनेति वा हतक दग्धेत्यादि निर्विण्णस्य दुःखदायिनं प्रति संबुद्धौ लौकिकोक्तिरिति सांप्रदायिकाः । प्रियविरहस्य महोष्मा स एवासमंतात् मुर्मुरः कारिषाग्निर्यस्याः सा तामंगलेखां क्रीडया कौतुकेनापि मा स्पृश हि यतः इह मदंगे लुठन्तः संबन्ध प्राप्नुवन्तः ईषद्जरठमृणालीकांडवन्मुग्धाः सुन्दराः तव मयूखाः किरणाः क्लेशस्य दाहस्य पीडां भजन्ते सेवन्ते। वर्तमानसामीप्ये वर्तमानवद्वेति भजिष्यन्तीत्यर्थः ॥ २३ ॥

अंतस्तारमिति । अस्याः कुवलयदृशो बाष्पवारां बाष्पोदकानां प्रवाहाः निर्यान्ति निर्गच्छन्ति । कीदृशाः क्रमेणेति सर्वत्र संबध्यते । अंतस्तारं तारा अक्षिकनीनिका तस्यां अंत इत्यंतस्तारं तरलतरलाः अतिशयेन तरलाः

---

१ D. मुर्मुरः. २ D. जरठः. ३ C. चक्षुषीमत्रम् । ४ C. कर्णधाराः ।

अपि च ।

मुक्त्वानङ्गः कुसुमविशिखान् पञ्च कुण्ठीकृतास्त्रान्
मन्ये मुग्धां प्रहरति हठात्पत्रिणा वारुणेन ।
वारां पूरः कथमपरथा स्फारनेत्रप्रणाली-
वक्त्रोद्वान्तस्त्रिवलिविपिने सारणीसाम्यमेति ॥ २५ ॥

(विदूषकं हस्ते गृहीत्वोपसृत्य सानुरागप्रश्रयम्)

यस्य कृते वहति जनो मृदितमृणालोपमानि गात्राणि ।
तस्य कृते यदि सोऽपिहि तदखण्डितशासनो मदनः ॥ २६ ॥
तदयं समदुःखसुखो जनस्त्वां विरचिताञ्जलिः प्रसादयति ।

ततः स्तोकं स्वल्पं उत्पीडं पिंडीभावं भजन्ति तादृशाः । ततः पक्ष्माग्रेषु प्राथिताः पृषतोऽम्बुकणा येषां ते ततः कर्णधाराः धाराक्रमेण निपतन्तः । ततः निजगरिमतः स्वगुरुत्वातिशयेन चित्तस्य तदयस्य आतङ्कं भयं भंग-संभावनाजन्यां शंकां सम्यक् तारिक्कतया आसूचयन्तः सूचयन्तः । यद्वा चित्तस्य आतंकं संतापं निजगरिमतो निजबृथुलतया सम्यक् सूचयन्त इत्यर्थः । आतंको रोगसंतापशंकासु मुरजध्वनाविति विश्वः । बाष्पा हि नयनान्तरुत्पद्य क्रमेण पिंडीभावा पक्ष्माग्रकणिकाभावा धाराविकीर्णक्रमेण निपतन्तो तदयस्य स्मरज्वरनिस्सहतया स्वगौरवेणापि भंगसंभावनासूता-पेक (?) सूचयन्तः प्रसरन्ति इति संक्षेपार्थः ॥२४॥

मुक्त्वेति । अनंगो मदनः पंचकुसुमविशिखान् पुष्पमयान् बाणान् कुंठी-कृतास्त्रान्सतो मुक्त्वा त्यक्त्वा मुग्धां वारुणेन वरुणदैवत्येन पत्रिणा वारु-णास्त्रेणेत्यर्थः । हठात् बलात्कारेण प्रहरति विध्यतीत्यहं मन्ये । अपरथा वारुणास्त्र प्रयोगाभावे स्फारे विस्तीर्णे ये नेत्रे ते एव प्रणाल्यौ जलनिर्गम-मार्गौ तयोर्वक्त्रान्मुखात् उद्वान्त उत्कृष्टं वमनं बहिर्निःसरणं प्राप्ते वारां ज-लानां पूरः प्रवाहः त्रिवलिविपिने त्रिवलिरूपायामटव्यां कामुकहस्तसंचारा-ध्वभावेन विस्तीर्णत्वेन च त्रिवलीनां विपिनत्वेन रूपेण सारणीसाम्यं कथमेति प्राप्नोति ॥ २५ ॥

यस्येति । हि यतो मदनोद्वेगोः । वक्ष्यमाणवहनक्रियाद्वयेऽपि मदनस्य हेतुत्वं योज्यं अत एव सर्वान्ते हीत्यस्य निर्देशः । अन्यथा पादपूरणमात्रार्थ-त्वे मदनस्याखंडितशासनत्वोपसंहारो अनुपपन्नः स्यात् । जनो मल्लक्षणो लो-कः यस्य कृते यदर्थं यस्येत्यत्र जनस्येति विशेषणं पूरणीयं अन्यथा यस्या

---

१ D. अखण्ड. २ D. प्रसारयति.

Digitized by Google

मृगाङ्कावली । (स्वगतम् सहर्षं ससाध्वसं च तत्प्रतिलोक्य ।) किं एस अणब्भो वरिसो, असिप्पिसंपुडेभवा मोत्तिअउप्पत्ति । कंचणलट्ठिअ व्व सहआरिभूदा रीदि व्व कणअत्तण मुवगदा जस्स दंसणमहद्धिदा तणु मे पलिभादि । (अपवार्य विचक्षणां प्रति) एसो सो सहि राआ विज्जाहरमल्लो जो सिरीसरस्सइणं वल्लहो मअणसुन्दरीए अ । जस्स वल्लहा सिरीसरस्सई मअणसुन्दरी अ । * (क)

विचक्षणा । आं ।

राजा । विचक्षणे नन्वेवं वक्तव्यं भवति । यो मृगाङ्कावलीवल्लभो यस्य मृगाङ्कावली वल्लभेति । (तां प्रत्यञ्जलिं बद्ध्वा)

(क) किमेषोऽनभ्रो वर्षः । अशुक्तिसंपटभवा मौक्तिकोत्पत्तिः । काञ्चनयष्टिरिव सहकारीभूता रीतिरिव कनकत्वमुपगता यस्य हीनमहार्घिता तनुर्मे प्रतिभाति । एष स सखि राजा विद्याधरमल्लो यः श्रीसरस्वत्योर्वल्लभो मदनसुन्दर्याश्च । यस्य वल्लभा श्रीः सरस्वती मदनसुन्दरी च ।

इति स्त्रीलिंगं अपेक्षितं सामान्यं नपुंसकमित्यनेन नपुंसकत्वे च उत्तरार्धेसोऽपि इति तत्पदेन पूर्वोपात्तयत्शब्दपरामृष्टस्य परामर्शात् नपुंसकलिंगताया उचितत्वेन पुल्लिंगता अनुपपन्ना स्यात् । गात्राणि शरीराणि मृदितैः परिभुक्तया म्लान तामासादितैर्मृणालैरुपमीयन्ते तानि तादृशानि वहति सोऽपि जनः त्वल्लक्षणः तस्य कृते अपिशब्दात् तथा विधान्यंगकानि वहतीत्यस्यानुषंगः तत्तदामदनः अखंडितं अव्युच्छिन्न शासनं यस्य तादृशः ॥ २६ ॥

*मृगां । किमेषोऽनभ्रो वर्षः वर्षणं वर्षः । अशुक्तिसंपुटागमा वा मौक्तिकोत्पत्तिः कांचनयष्टिरिव सहकारिभूता सुवर्णयष्टिरिव सहायीभूतेत्यर्थः । कांचनो वृक्षविशेषः तस्य यष्टिः सहकार आम्रस्तद्भावमापन्नेति वा । रीति

---

१ C. अणावरिसो. २ D. संपुडागमावा. B. संपुटामावा. ३ मोत्तिओप्पत्ति. ४ C. महद्धिदत्तणम्. D. महग्घदा. B. महाधिदातण. ५ D. सुंदरी अ. ६ D. adds राजा. ७ D. क्षणेन त्वेवम्.

Digitized by Google

तरङ्गय दृशोऽङ्गने पततु चित्रमिन्दीवरं
स्फुटीकुरु रदच्छदं व्रजतु विद्रुमः श्वेतताम् ।
क्षणं वपुरपावृणु स्पृशतु काञ्चनं कालिमा
प्युदञ्चय मुखं मनाग्भवतु च द्विचन्द्रं नभः ॥ २७ ॥

मृगाङ्कावली । (स्वगतम्) भअवदि मिअंकमंडणे जामिणि सदंजामा होहि *। (क)

राजा । सखे न हारलताविरहमर्हत्येषा । न चित्रशिखण्डिदाम विना चकास्त्युदीची । (इति कण्ठादवतार्य नायिकाकण्ठे हारं विधत्ते)

(क) भगवति मृगाङ्कमण्डने यामिनि शतयामा भव ।

रिव पित्तलमिव । रीतिः स्त्रियामारकूटो न स्त्रियामित्यमरः । कनकत्वमुपगता । यस्य दर्शनमहार्घिता तनुर्मे प्रातभाति एष सखि राजा विद्याधरमल्लो यः श्रीसरस्वत्योर्वल्लभो मदनसुन्दरी च यस्य वल्लभा श्रीः सरस्वती मदनसुन्दरी च । आमेवमेवेत्यर्थः ।

तरङ्गयेति । हे अङ्गने दृशो दृष्टीस्तरङ्गय तरङ्गानिव रचय कटाक्षत्वेन सम्पादयेत्यर्थः । ऐन्दीवरमिन्दीवरसम्बन्धि चित्रं पतत्वधोगच्छतु तिरस्कृतं भवत्वित्यर्थः । रदच्छदमोष्ठं स्फुटीकुरु प्रकटीकुरु विद्रुमः प्रवालः श्वेततां व्रजतु प्राप्नोतु वपुः शरीरं क्षणमपावृतं प्रावरणरहितं कुरु उद्घाटयेत्यर्थः । कालिमा श्यामत्वं कर्तृ काञ्चनं सुवर्णं कर्मीभूतं स्पृशतु सम्बध्नातु मुखं वदनं मनागीषत् उदञ्चय लज्जावनतं ऊर्ध्वं कुरु नभ आकाशं द्वौ चन्द्रौ यस्मिंस्तादृशं भवतु । चकारः सर्वेषां समुच्चयार्थः । त्वदङ्गानां उपमानीभूतेभ्योऽपि नीलेन्दीवरादिभ्योऽतिशयितत्वेन सर्वाणि पराजितानि भवन्त्विति तात्पर्यार्थः । अत्र कालिमोदञ्चयेत्यत्र प्रगृह्यादिनिमित्ताभावेऽपि स्वेच्छया सन्ध्यकरणेन विसन्धित्वं स्पष्ट एव वाक्यदोषः स च कालिमेत्यस्याग्रे आःपदस्य सम्भावितत्वेन परिहरणीयः । क्वचित्पुस्तके कालिकामुदञ्चयेति पाठस्तत्र काञ्चनं कर्तृ कालिकां श्यामीभावं स्पृशत्विति व्याख्येयम् ॥२७॥

* मृगा । भगवति मृगाङ्कमण्डने यामिनि शतयामा भव । चित्रशिखण्डिदाम सप्तर्षिमण्डलम् ।

---

१ B. C. ऐन्दीवरम् . २ D. व्युदञ्चय. B. उदञ्चय. ३ C. मिअंकाभरणे. ४ C. सयंजामा. ५ D. adds चित्रशिखंडिदाम सप्तर्षिमण्डलम् .

Digitized by Google

विदूषकः । उचिदसमागमो एस कं ण रञ्जेदि जं दाणीं णित्तलमोत्ताहलमालालंकरणो सुन्दरीअणो वंकुत्तिविभूसणो अ सुकइवाणीबन्धो * । (क)

(नेपथ्ये) छालिज्जंतु लदामंडवपहुदीणि विलासट्ठाणाइं । दिज्जंतु खलकिआदुआराइं । णिवट्टंतु अग्गलाओ । चिट्ठंतु जहाणिअट्ठाणं बाहिरदो जामलिआ सोविदल्ला । एसा वारविलासिणीजणगहिदहत्थदीविउज्जोअजणिदादिवसव्व देवी सिद्धणरेंदादिण्णोसधसंठिदमंजिट्ठत्थबअसहस्सालंकिदं माहविलदामंडवं दट्ठुमाअच्छदि † । (ख)

(क) उचितसमागम एष कं न रञ्जयति यदिदानीं निस्तलमुक्ताफलमालालंकरणः सुन्दरीजनो वक्रोक्तिविभूषणश्च सुकविवाणीबन्धः ।

(ख) मुच्यन्तां लतामंडपप्रभृतीनि विलासस्थानानि । दीयन्तां पक्षद्वाराणि । निपतन्त्वर्गलाः । तिष्ठन्तु यथानिजस्थानं बहिःप्रदेशे यामिकाः सौविदल्लाः।एषा वारविलासिनीजनगृहीतहस्तदीपिकोद्योतजनितदिवसेव देवी सिद्धनरेन्द्रदत्तौषधसंस्थितमाञ्जिष्ठस्तबकसहस्रालंकृतं माधवीलतामण्डपं द्रष्टुमागता ।

---

*वृद् । उचितसमागम एष कं न रंजयति । यदिदानीं निस्तलानि।स्वरूपाधारयोरतलमिति विश्वः । तथाचाधररहितानि वर्तुलानि यानि मुक्ताफलानि तेषां या माला ग्रथिता: सजस्तदलङ्करणः सुन्दरीजनो वक्रोक्तिभूषणश्च सुकविवाणीबन्धः ।

†नेपथ्ये । छालिज्जन्तु मुच्यन्तां लतामण्डपप्रभृतीनि विलासस्थानानि । दीयन्तां पक्षद्वाराणीत्यर्थः । खलकिआदुवाराइं खलकिआ 'खिडकी' इति देशी पक्षद्वाराणीत्यर्थः । निपतन्त्वर्गलास्तिष्ठन्तु यथानिजस्थानं बाहिरदो बहिःप्रदेशे यामलिआ यामिकाः सौविदल्लाः स्वाधिकृताः कञ्चुकिन्यः । एषा वारविलासिनीजनगृहीतहस्तदीपिकोद्योतजनितादिवसेव देवी सिद्ध-

---

१C. णिवट्टद. २C. पग्गलाओ. ३C. जधट्ठाणम्. ४C. सजिअसोविदल्ला. ५C. आकिदसंचारो. B. विवसअ. ६C. सुट्ठिद. ७B. मज्जित्थ. ८D. adds नि.

विचक्षणा। (सत्रासम्) भट्टा विसज्जीअदु पिअसही *। (क)

राजा। अभ्यर्थये हृदयं यदि प्रार्थनाभङ्गं न करोति।

विदूषकः। वअस्स तुरिदं विसज्जीअदु। अण्णधा पारावद-सउंदव्व पञ्जरणिरुद्धा चिट्ठिस्सामो †। (ख) (इति यथायथं परिक्रम्य निष्क्रान्ताः सर्वे)

॥ इति तृतीयोऽङ्कः ॥

(क) भर्तः विसृज्यतां प्रियसखी।

(ख) वयस्य त्वरितं विसृज्यताम्। अन्यथा पारावतशकुन्ता इव पञ्जरनिरुद्धाः स्थास्यामः।

नरेन्द्रो निषधवैद्यो गारुडिक इति प्रसिद्धः। नरेन्द्रो वार्तिके राज्ञि विषवैद्येऽपि कथ्यत इति विश्वः। तेन दत्तौषधसंस्थितमाञ्जिष्ठस्तबकसहस्रालङ्कृतं माधवीलतामण्डपं द्रष्टुमागतेति।

* विच। भट्टा विसर्ज्यतां प्रियसखी।

†विदू। वयस्य त्वरितं विसर्ज्यतामन्यथा पारावतशकुन्ता इव पञ्जरानिरुद्धाः स्थास्यामः।

इति श्रीवेंकटरंगनाथदीक्षितसूनोर्नारायणस्य कृतौ विद्धशालभञ्जिकाविवरणे तृतीयोऽङ्कः।

---

१ C. सहीम्. १ D. ते दयाम्. २ D. करोषि.

Digitized by Google

॥ अथ चतुर्थोऽङ्कः ॥

(नेपथ्ये) सुप्रभातं देवस्य कर्पूरवर्षस्य । संप्रति हि

व्रजत्यपरवारिधिं रजतपिण्डपाण्डुः शशी
नमन्ति जलबुद्बुदप्रतिमपक्ष्मयस्तारकाः ।
कुरण्टकविपाण्डुरं दधति धाम दीपाङ्कुरा
श्चकोरनयनारुणा भवति दिक् च सौत्रामणी ॥ १ ॥

(ततः प्रविशति[3] विबुद्धो विदूषकः सुप्ता च ब्राह्मणी)

विदूषकः । भो पुत्ताणं मादे उट्ठेहि संज्झं वंदिदुं[4] । एहि अतिक्कंता रअणी । सुण णरेंदवंदिणो कप्पूरखंडस्स पभादभोआवलिं । (विमृश्य) कधं देवीए गरिट्ठगोट्ठीजणिदजागरणकिलंतसुत्ता ब्रह्मणी अज्जवि णिद्दं ण मुंचेदि । तदो पडिवालेमि जदो ण सुहसुत्तो पडिबोधिदव्वात्ति बह्मणा मंतअंति* । (क)

(ब्राह्मणी उत्स्वप्नायते)

(क) भो पुत्राणां मातरुत्तिष्ठ संध्यां वन्दितुम् । एहि अतिक्रान्ता रजनी । शृणु नरेन्द्रवन्दिनः कर्पूरखण्डस्य प्रभातभोगावलिम् । कथं देव्या गरिष्ठगोष्ठीजनितजागरणक्लान्तसुप्ता ब्राह्मणी अद्यापि निद्रां न मुञ्चति । ततः प्रतिपालयामि यतो न सुखसुप्तः प्रतिबोधितव्य इति ब्राह्मणा मन्त्रयन्ते ।

व्रजतीति। रजतस्य रूप्यस्य पिण्डवत् पाण्डुः पाण्डुरवर्णः शशी अपरः पश्चिमो यो वारिधिस्तं प्रति व्रजति गच्छति । जलबुद्बुदानां या द्युतिस्तस्याः सपक्ष्मयः समानपक्ष्मयस्तत्तुल्या इति यावत्। पाठान्तरे जलबुद्बुदप्रतिमा तत्तुल्या पाक्ष्मर्यासां तास्तारका नक्षत्राणि नमन्ति प्रह्वीभवन्ति [प] तनोन्मुखानि भवन्ति। सौत्रामणी सुत्रामणो महेन्द्रस्येयं सौत्रामणी पूर्वा दिक् चकोरनयने इव अरुणा भवति । सुत्रामा गोत्रभिद् वज्रीत्यमरः ॥ १ ॥

*विदू। भो पुत्राणां मातः उत्तिष्ठ उत्तिष्ठ संध्यां वन्दितुं देहि अतिक्रान्ता रजनी शृणु नरेन्द्रवन्दिनः कर्पूरचन्दस्य प्रभातभोगावलीम्। कथं देव्या गरि-

---

१ B. प्रतिस. २ B. सौत्रामिणी. ३ D. प्रविशतः. ४ B. वंदितुं देहि. ५ C. -कलिदा.

Digitized by Google

ब्राह्मणी।* विण्णत्तो विअक्खणामुहेण देवीए भट्टा जधा ओल्लागदस्स मिअंकवम्मस्स पिअबहिणी मिअंकावली णाम सिणेहेण भादुअं दट्ठुमाअदा । संदिट्ठं च मे मादुलचंदवम्मसिरिणा मादुलाणीए हारलदाए अ जधा एसा दे बहिणी मिअंकावली देव्वण्णएहि कहिदचक्कवत्तिघरिणीभावा एसा तए उविदं वरं लंभइदव्वेत्ति । तदो देवी देवं विण्णवेदि । ण तुह्माहिंतो अण्णो वरो एदाए जोग्गोत्ति जदो पोम्मराअमणी एआवालिं अलंकरेदि । ता परिणेदु अज्जउत्तो । अत्तणो सिरी अण्णहत्थगंआ कादव्वा ण होदि । ण एदं आसंकिदव्वं किंत्ति देवी अत्तणो सावत्तेणेण पअट्टदि । जदो महाउलप्पसूदाणं भत्तुणो पिअं पिअं ण हु अत्तणो पिअं पिअंत्ति । किं च पुणो परिणाविदो एव्व अज्जउत्तो मए । तं जधा । मअधाहिवस्स सुदं अणंगलेहं मालवणरेंदस्सं दुहिअरं रअणावलीं पिअदंसणं अ पंचालणाहस्सं तणअं विलासवदीं अवंतीसरसुदं केलिवदीं जालंधरेसकुमारिअं लीलावदीं

ष्टगोष्ठीजनितजागरणक्लान्तमुसा ब्राह्मणी अद्यापि निद्रां न मुञ्चति । ततः प्रतिपादयामि समयप्रतीक्षां करोमीत्यर्थः । यतो न सुखसुप्तः प्रतिबोधयितव्य इति ब्राह्मणा मन्त्रयन्ति । भोगावली बन्दिपाठ इति हारावलीकोषः ।

*ब्राह्मणी । विज्ञप्तो विचक्षणामुखेन देव्या भट्टा यथा औल्लागदस्स औलरूपेण बन्धकत्वेनागतस्य मृगाङ्कवर्मणः प्रियभगिनी मृगाङ्कावली नाम स्नेहेन भ्रातरं द्रष्टुमागता । सन्दिष्टं च मे मातुलचन्द्रवर्मश्रिया मातुलान्या च हारलतया यथा एषा ते भगिनी मृगाङ्कावली दैवज्ञैः कथितचक्रवर्तिगृहिणीभावा तदेषा त्वयोचितवरं लम्भयितव्येति । ततो देवं देवी विज्ञापयति न युष्मत्तोऽन्यो वर एतस्या योग्य इति यतः पद्मरागमणिरेकावलीमलङ्करोति । तत्परिणयत्वार्यपुत्रः । आत्मनः श्रीरन्यहस्तं ? कर्तव्या न भवति । नैतदा ।

---

१ B. मादुलपत्न°. २ D. drops अ. ३ D. देवय्यिणहि. ४ C. D. कहिदं. ५ C. तुए. ६ D. दिदं वरं. ७ C. लंभइदव्वा. ८ C. drops देवं. ९ D. राआवलीं. B. एक्कावलीं. १० B. अण्णहत्थअं. ११ A. C. D. किं तं. १२ B. सावत्तणए. १३ B. मुदं. १४ C. मालवणरिंदधिअं. १५ D. णाहत्तणअं. १६ C. ससुदं.

Digitized by Google

केरलराअपुत्ति पत्तलेहंत्ति[1] । ता अज्ज दुदीअप्पहरे विआहलग्गोत्ति उणो उणो भणिदेण महाराएण तहत्ति पडिण्णादं[2] । ता मेहलावुत्तांतं पडिकादुं अलीअविआहेण विलम्बिअदु भट्टा । कुविदस्स मे भादुअस्स विआहमहो उत्तरं हुविस्सदि[3] । (क)

विदूषकः । (विहस्य) देवो धम्मो वा जाणिस्सदि जो एत्थ विडंबइदव्वो[4] । (विचिन्त्य) ता चिरं पाइदव्वा जुण्णमज्जारी[5]

(क) विज्ञप्तो विचक्षणामुखेन देव्या भर्ता यथा ओल्लागतस्य मृगाङ्कवर्मणः प्रियभगिनी मृगाङ्कावली नाम स्नेहेन भ्रातरं द्रष्टुमागता । संदिष्टं च मे मातुलचन्द्रवर्मश्रिया मातुलान्या हारलतया च यथा एषा ते भगिनी मृगाङ्कावली दैवज्ञैः कथितचक्रवर्तिगृहिणीभावा एषा त्वयोचितं वरं लम्भयितव्येति । ततो देवी देवं विज्ञापयति । न युष्मत्तोऽन्यो वर एतस्या योग्य इति यतः पद्मरागमणी एकावलीमलंकरोति । तत्परिणयत्वार्यपुत्रः । आत्मनः श्रीरन्यहस्तगता कर्तव्या न भवति । नैतदाशङ्कितव्यं किमिति देवी आत्मनः सापत्नेन प्रवर्तते । यतो महाकुलप्रसूतानां भर्तुः प्रियं प्रियं न खल्वात्मनः प्रियं प्रियमिति । किं च पुनः परिणायित एवार्यपुत्रो मया । तद्यथा । मगधाधिपस्य सुतामनङ्गलेखां मालवनरेन्द्रस्य दुहितरं रत्नावलीं प्रियदर्शनां च पञ्चालनाथस्य तनयां विलासवतीमवन्तीश्वरसुतां केलिमतीं जालन्धरेशकुमारिकां लीलावतीं केरलराजपुत्रीं पत्रलेखामिति । तदद्य द्वितीयप्रहरे विवाहलग्नमिति पुनः पुनर्भणितेन महाराजेन तथेति प्रतिज्ञातम् । तन्मेखलावृत्तान्तं प्रतिकर्तुमलीकविवाहेन विडम्ब्यतां भर्ता । कुपितस्य मे भ्रातुर्विवाहमह उत्तरं भविष्यति ।

---

१ C. D. देवीओ एव्व परिणीय दिण्णवंतीओ. २ C. लग्गंति. ३ B.D. पलिवण्णं. ४ D. has only अलीअविवाहमहुत्सवो उत्तरो हुविस्सदि. ५ C. भादुणो अण्णविआहमहूसवो. ६ D. विडंबिदव्वो. ७ D. पाअइदवा. ८ C. तिण्हामज्जारी.

Digitized by Google

कंजिअं दुद्धंति । कुवलअमालाए उण महाविलंबणा जं महिला महिलाए परिणीदा । (ऊर्ध्वमवलोक्य) महदी वेला वट्टदि । विउद्धा वेमि बह्मणीं । बह्मणि उट्ठेहि उट्ठेहि । देवी तुमं वाहरादि । (क)

ब्राह्मणी । (विबोधनाटितकेनोत्थाय) अइ पच्चूसं वट्टदि । (तं विलोक्य) हंहो मिअतिण्हिआजामादुअ तुमं परमेसरपस्स-वट्टी होहि । अहं उण देवीं अणुसरिस्सं । (ख) (इति परिक्रम्य निष्क्रान्तौ)

। प्रवेशकः ।

(ततः प्रविशति राजा विदूषकश्च)

राजा । (मदनातपयोः पीडामभिनीय) सखे संप्रति शैशवादपक्रामति ग्रीष्मसमयः ।

रजनिचरमयोमिष्वादिशन्ती रतेच्छां
किमपि कठिनयन्ती नारिकेलीफलाम्भः ।
अपि परिणमयित्री राजरम्भाफलानां
दिनपरिणतिभोग्या वर्तते ग्रीष्मलक्ष्मीः ॥ २ ॥

अपि च

(क) देवो धर्मो वा ज्ञास्यति योऽत्र विडम्बयितव्यः । तच्चिरं पाययितव्या जीर्णमार्जारी काञ्जिकं दुग्धमिति । कुवलयमालायाः पुनर्महाविडम्बना यन्महिला महिलया परिणीता । महती वेला वर्तते । विबोधयामि ब्राह्मणीम् । ब्राह्मणि उत्तिष्ठोत्तिष्ठ । देवी त्वां व्याहरति ।

(ख) अये प्रत्यूषं वर्तते । हंहो मृगतृष्णिकाजामातस्त्वं परमेश्वरपार्श्ववर्ती भव । अहं पुनर्देवीमनुसरिष्यामि ।

---

१ C. D. महाविलंबणाए महिलाए परिणीदा. २ B. विउद्धामेमि. ३ B. drops one उट्ठेहि. ४ B. पासपरिवत्ती. ५ B. adds हि. ६ D. अयि. ७ C. योग्या.

Digitized by Google

यदादत्ते दृश्यादखिलमपि भावव्यतिकरं ।
मनोवृत्तिर्द्रष्टुं मुखरयति दृश्यं प्रति जनम् ॥ ८ ॥

किञ्च ।

स्वकण्ठकाण्डात्सुदृशावतार्य
स्वप्नेऽर्पितो यो मम कन्धरायाम् ।
पुनर्मया तत्कुचसीम्नि मुक्तो
हारः स च प्राप्तमत्र जातः ॥ ९ ॥

विदूषकः । (स्मरणमभिनीय) भो किं वि रहस्सं पुच्छीअसि । (क)

राजा । कथ्यते ।

विदूषकः । मिअंकावलीकुवलअमालाणं केत्तिअं अंतरं। (ख)

राजा । आस्ताम् । परकलत्रं हि सा वर्तते ।

विदूषकः । णं पत्थिवव्ववहारे अणभिण्णोहं । जाणवदो उण सालभज्जं अद्धभज्जंत्ति भणादि । ता कधेसु केत्तिअं अंतरं मिअंकावलीकुवलअमालाणं । (ग)

राजा । यावदन्तरं मृगाङ्कावलीकुवलयमालयोः ।

(क) भोः किमपि रहस्यं पृच्छ्यसे ।

(ख) मृगाङ्कावलीकुवलमालयोः कियदन्तरम् ।

(ग) ननु पार्थिवव्यवहारे अनभिज्ञोऽहम् । जानपदः पुनः श्यालभार्यामर्धभार्येति भणति । तत्कथय कियदन्तरं मृगाङ्कावलीकुवलयमालयोः ।

---

१ C. सुकण्ठ. २ D. सुदृशां ३ C. स्तनार्पितो. ४ D. adds पिअवअस्स. ५ D. अदभज्जसि. ६ C. D. add त्ति.

Digitized by Google

विदूषकः । तं एव्व पुणो भणंतेण किं भणिदं होदि । (क)

राजा । तर्हि दृष्टान्तान्तरेण कथ्यते । यावदन्तरं घनसारागरुसारयोः ।

विदूषकः । सुट्ठुदरं ण जाणीअदि । (ख)

राजा । ज्ञाप्यते ।

लाटी चम्पकपिञ्जरैरवयवैर्दूर्वानिभैः कुन्तली
पूर्वा रत्नमयीं बिभर्ति रचनामन्या तु मुक्तामयीम् ।
इत्थं द्वे अपि ते विलाससदने देवस्य चेतोभुवः
प्राच्याः किं तु नितान्तनिर्जितजगल्लावण्यपण्यं वपुः॥२०॥

सखे किं पुनरनुपपन्नमेवेदं यदुत देवी मां परिणाययिष्यतीति ।

विदूषकः । कुदो दिट्ठे अणुवपण्णं णाम । (पुरो दर्शयन्) संबंधिणीचेटीओ आअच्छंतीओ दीसंति । (ग)

राजा । का पुनस्ते संबन्धिनी ।

विदूषकः । देवी ।

राजा । (विहस्य) तदेहि चित्रशालिकामधितिष्ठावः । (तथा तिष्ठतः)

[ततः प्रविशन्ति नेपथ्ये पेटिकाहस्ताश्चेट्यः । सर्वाः परिक्रामितकेन]

एका । हला तरंगिए कहिं उण महाराओ पेक्खिदव्वो । (घ)

(क) तदेव पुनर्भणता किं भणितं भवति ।

(ख) सुष्ठुतरं न ज्ञायते ।

(ग) कुतो दृष्टेऽनुपपन्नं नाम । संबन्धिनीचेट्य आगच्छन्त्यो दृश्यन्ते ।

(घ) हला तरङ्गिके कुत्र पुनर्महाराजः प्रेक्षितव्यः ।

---

१ D. कुन्तले. २ B. रत्नममी. ३ B. मुक्तामयी. ४ C. drops इति. ५ C. adds अ.

द्वितीया । सहि कुरंगिए जाहे आसण्णविआहकोदूहलपप्फुरिदो जणो दीसदि । (क)

अन्या । अयि विअक्खणे किं विअ तरंगिआए मंतिदं । जो सहस्साणं महिसीणं पाणिग्गही तस्स कित्तिओ विअ कोदूहलहल्लफुल्लो । (ख)

अपरा । पिअसहि विअक्खणे किं णु क्खु अणभिण्णासि कंदप्पचरिदाणं । णवकोदूहली कामिजणो । (ग)

तरङ्गिका । (पुरोऽवलोक्य) एस भट्टा पंडुरपरिक्खामंगो पहादपुण्णिमाचंदो विअ सणिच्चराणुगदो अज्जचाराअण विईओ चित्तसालिआदुवाहेसे दीसदि । (सर्वा उपसृत्य) जेदु जेदु भट्टा । देवी विण्णवेदि । आसण्णं लग्गं ता इमं णेवत्थं । अलंकरिअ अहिट्ठीअदु विआहचउत्तरिआ । (घ)

राजा । यदादिशति देवी ।

(क) सखि कुरङ्गिके यत्रासन्नविवाहकौतूहलप्रस्फुरितो जनो दृश्यते ।

(ख) अयि विचक्षणे किमिव तरङ्गिकया मन्त्रितम् । यः सहस्राणां महिषीणां पाणिग्राही तस्य कियानिव कौतूहलसंभ्रमः ।

(ग) प्रियसखि विचक्षणे किं नु खल्वनभिज्ञासि कन्दर्पचरितानाम् । नवकौतूहली कामिजनः ।

(घ) एष भर्ता पाण्डुरपरिक्षामाङ्गः प्रभातपूर्णिमाचन्द्र इव शनैश्चरानुगत आर्यचारायणद्वितीयश्चित्रशालिकाद्वारोद्देशे दृश्यते । जयतु जयतु भर्ता । देवी विज्ञापयति । आसन्नं लग्नं तदिदं नेपथ्यम् । अलंकृत्याधिष्ठीयतां विवाहचत्वरिका ।

---

१ B. किरको. २ B. फुकलो. ३ B. जं दाणिं णवकोदूहली. ४ B. परिक्खामो. ५ D. द्विदीओ. ६ B. drops दुवा. ७ B. adds another भट्टा. ८ C. अहिट्ठिदु. ९ C. चउक्किअं. १० B. adds तधाह देवी ज्ञाते.

Digitized by Google

विदूषकः। (आत्मानं निर्वर्ण्य) भोदीओ। संबंधिअस्स जण्णवासभोज्जे किमुत्तरं। (क)

चेट्यः। इदं दास्सामो। (ख)

विदूषकः। किं विअ तं। (ग)

चेट्यः। जं कंकेलितरुणो दोहलअं जं अ भअवन् तिलोअणो सीसे समुव्वहइ। (घ)

विदूषकः। (दण्डकाष्ठमुद्यम्य) आः दासीओ महाराअपिअवअस्सं पिंगलिआवम्हणीवल्लहं ससूत्ताणं पढिदद्धपादअं चारायणं महाबम्हणं अधिक्खिवध ता इमिणा तुम्हारिसचेडीजणचित्तवुत्तिकुडिलेण दंडकट्ठेण भुजंगजणजुगुत्सणिज्जाइं वअणाइं वो करिस्सं। (ङ)

तरं। मरिसदु मरिसदु अज्जो। संबंधिणीओत्ति तुए सह देवीविलासिणीआ वक्केरं करेति। (च)

(क) भवत्यः। संबन्धिनो जन्यवासभोज्ये किमुत्तरम्।

(ख) इदं दास्यामः।

(ग) किमिव तत्।

(घ) यत्कङ्केलितरोर्दोहदं यच्च भगवान् त्रिलोचनः शीर्षे समुद्वहति।

(ङ) आः दास्यः महाराजप्रियवयस्यं पिङ्गलिकाब्राह्मणीवल्लभं स्वसूत्राणां पठितार्धपादं चारायणं महाब्राह्मणमधिक्षिपथ। तदनेन युष्मादृशचेटीजनचित्तवृत्तिकुटिलेन दण्डकाष्ठेन भुजङ्गजनजुगुप्स्यमानानि वदनानि वः करिष्ये।

(च) मर्षतु मर्षतु आर्यः। संबन्धिन्य इति त्वया सह देवीविलासिन्य उपहासं कुर्वन्ति।

---

१ D. जणस्स C. जणवास °. २ C. इस्सामो B. दइस्सामो. ३ C. drops तं. ४ C. drops अ. ५ C. बम्हवल्लहं. ६ B. सिसुत्तण. D. ससत्ताणं. ७ B. पठिदसिद्धपादिअं. ८ D. drops चाराअणं. ९ B. चित्तावीति. १० D. जुगुत्सिआइं. ११ D. drops वो. १२ C. उवहासं.

Digitized by Google

अन्या। अलं वैक्लेरेण दुव्वासो अज्जचाराअणो। (क)

तरं। सुवासो हुविस्सादि संपदं एव्व। ता विवाहमहूसवोचिदं करेह। सुलक्खणे हारलट्ठि कलकंठि वसंतलदे मंगलिए कामकेलि मिअंकलेहे बउलावलि परहुदिए विअक्खणे कप्पलदे पहुणो रसविअक्खणस्स कंकणबंधणेण विरएध विआहदिक्खणं। (ख)

(सर्वाः समुपसृत्य रक्तवासःकुङ्कुमकङ्कणकुसुमादिकमुपनयन्ति)

राजा। (नाट्येन परिधत्ते)

विदूषकः। (तदवशिष्टेन समालम्भनादिनात्मानं मण्डयति)

विचक्षणा। भोदिओ किं विलंबेध। आरंभरमणिज्जाइं पअरणाइं होंति। साहेअध गाएध णच्चध अ। (ग)

विदूषकः। भो एदाणं मज्झे अहं वि गाइस्सं णच्चिस्सं अ। (घ)

राजा। यदभिरुचितं भवते।

(विदूषकेण सह सर्वा गायन्ति नृत्यन्ति च)

(नेपथ्ये)। भो विअक्खणामुहीओ किं विलंबेध। आणेध महाराअं चउत्तेरिअं। सपरिवारा देवी संपत्ता ज्जेव्व। (ङ)

(क) अलमुपहासेन दुर्वासा आर्यचारायणः।

(ख) सुवासा भविष्यति साम्प्रतमेवातद्विवाहोचितं कुर्मः। सुलक्षणे हारयष्टि कलकण्ठि वसन्तलते मङ्गलिके कामकेलि मृगाङ्कलेखे बकुलावलि परभृतिके विचक्षणे कल्पलते प्रभो रसविचक्षणस्य कङ्कणबन्धनेन विरचयत विवाहदीक्षणम्।

(ग) भवत्यः किं विलम्बयथ। आरम्भरमणीयानि प्रकरणानि भवन्ति। साधयत गायत नृत्यत च।

(घ) भो एतासां मध्ये अहमपि गास्यामि नर्तिष्यामि च।

(ङ) भो विचक्षणामुख्यः किं विलम्बयथ। आनयत महाराजं चत्वरिकाम्। सपरिवारा देवी संप्राप्तैव।

---

१ C. डवहासेण. २ C. drops अज्ज. ३ B. adds (विहस्य). ४ B. साएध. D. ता एध. ५ C. चउक्किअं.

Digitized by Google

तरं । इदो इदो महाराओ । (क) (सर्वे परिक्रामन्ति)
(ततः प्रविशति देवी बधूवेषा मृगाङ्कावली कुवलयमाला च)
देवी । (अपवार्य) वत्से कुवलअमाले पेक्ख अत्तणो भत्तुणो सुसिद्धं माहिलावेसं । (ख)
(कुवलयमाला अवनतमुखी हसति)
राजा । (स्वगतम्)
दिवस इवास्मि सतापश्चन्द्रमुखीत्वेन रात्रिवच्चैषा ।
इदमपि चान्तरराचितं रक्तांशुकमावयोः संध्या ॥ ११ ॥
देवी । अज्जउत्त उग्घालीअदु मुहं से । उदेदु भवणगब्भे चंदो । (ग)
राजा । (उपविश्य तथा कृत्वा स्वगतम्)
नयनच्छलेन सुतनोर्वदनजिते शशिनि कुलपतौ क्रोधात् ।
नासानालनिबद्धं स्फुटितमिवेन्दीवरं द्वेधा ॥ १२ ॥
देवी । वत्से मिअंकावलि कुण तारादंसणं वित्थारअ कुवलअसंत्थरं । (घ)
मृगां । (लज्जावशादितस्ततश्चक्षुषी निधाय चिरमूर्ध्वमवलोकयति)
राजा । (स्वगतम्)
भवनभुवि सृजन्तस्तारहारावतारान्
दिशि दिशि विकिरन्तः केतकानां कुटुम्बम् ।

(क) इत इतो महाराजः ।
(ख) वत्से कुवलयमाले प्रेक्षस्वात्मनो भर्तुः सुसिद्धं महिलावेषम् ।
(ग) आर्यपुत्र उद्घाट्यतां मुखमस्याः । उदेतु भवनगर्भे चन्द्रः ।
(घ) वत्से मृगाङ्कावलि कुरु तारादर्शनं विस्तारय कुवलयसंस्तरम् ।

---

१ C. drops पेक्ख. २ B. सुसिणिद्धं. ३ B. सेन्दुवदनेन. ४ B. सें उदेदं. ५ B. कुलविभौ. ६ B. adds विलोक्य.

Digitized by Google

वियति च रचयन्तश्चन्द्रिकां दुग्धसुधां
प्रतिनयननिपाताः सुभ्रुवो विभ्रमन्ति ॥ १३ ॥

विदूषकः।(जनान्तिकेन) एसा सा कुवलअमाला तुमं तिरिच्छेहिं दिट्ठिच्छडाकडक्खेहिं पिवादेव्व। (क)

राजा। एवमेतत्।

प्रणालीदीर्घस्य प्रतिपदमपाङ्गस्य सुहृदः
कटाक्षव्याक्षेपाः शिशुशफरफालप्रतिभुवः।
सुवानाः सर्वस्वं कुसुमधनुषोऽस्मान्प्रति सखे
नवं नेत्राद्वैतं कुवलयदृशः संनिदधति ॥ १४ ॥

किं पुनः परकलत्रमेषा[1]।

विदूषकः। णेहगदीए तुह ज्जेव एसा। (ख)

देवी। (जनान्तिकेन कुवलयमालां प्रति) पेच्छ अत्तणो भत्तारं अज्जउत्तेण परिणिज्जमाणं। (प्रकाशम्) अज्जउत्त संपदं भामरीओ दिज्जंदु हुदवहम्मि होमिज्जंतु लाआ। (ग)

राजा। (परिणीयोपविशति)

प्रतीहारी।(प्रविश्य) देव देवीमादुलस्स चन्दवम्मस्स पहाणदूदेण सह अज्ज भाउराअणो दुवारे चिट्ठदि। (घ)

(क) एषा सा कुवलयमाला त्वां तिर्यग्भिर्दृष्टिच्छटाकटाक्षैः पिबतीव।

(ख) स्नेहगत्या तवैवैषा।

(ग) पश्यात्मनो भर्तारमार्यपुत्रेण परिणीयमानम्। आर्यपुत्र सांप्रतं भ्रामर्यो दीयंतां हुतवहे हूयन्तां लाजाः।

(घ) देव देवीमातुलस्य चन्द्रवर्मणः प्रधानदूतेन सहार्यभागुरायणो द्वारे तिष्ठति।

---

१ D. drops. सा. २ D. drops तुमं. ३ C. ° कलत्रं मेषा.

Digitized by Google

राजा। (देवीमुखमवलोकयति)

देवी। अविलंबिदं पवेसेहि। (क)

प्रतीहारी। तहत्ति। (ख) (निष्क्रान्ता)

(ततः प्रविशति भागुरायणो दूतश्च)

उभौ। जयतु जयतु त्रिलिंगाधिपो देवः।

भागुरायणः। इतो लाटाधिपतेर्दूतः।

राजा। उपविश। निवेद्यतामपि कुशलं चन्द्रवर्मणः।

दूतः। देवानुग्रहेण।

देवी। कुशलं मे मातुलाणीए हारलदाए। (ग)

दूतः। अथ किम्।

देवी। अवि सुमरेदि मं गुरूजणो। (घ)

दूतः। अन्तरात्मापि विस्मर्यते। (देवीं प्रति) मातुलपुत्रजन्मना दिष्ट्या वर्धसे। (सर्वे हर्षं नाटयन्ति) संदिष्टं चास्मत्स्वामिना

निःसूनुना प्राक्पारिकल्पिताभून्मया मृगाङ्कावलिरेव पुत्रः।
पुत्रावकल्पच्छलतश्च सेयमानायिता वः सचिवोत्तमेन ॥१५॥

जातः संप्रति मे कुलैकतिलकः पुत्रस्तदेषा त्वया
भव्या कांतिमती कलासु कुशला केलिप्रिया नीतिभूः।
दैवज्ञोदितचक्रवर्तिगृहिणीभावा मृगाङ्कावली
देया कस्यचिदिन्दुसुन्दरयशःपूतस्य पृथ्वीपतेः ॥१६॥

(क) अविलंम्बितं प्रवेशय।

(ख) तथेति।

(ग) कुशलं मे मातुलान्या हारलतायाः।

(घ) अपि स्मराति मां गुरुजनः।

---

१ B. देव्या मुखं. २ B. जयति जयति. ३ C. कलिङ्गाधिपः. ४ C. drops उपविश. D. उपविशय. ५ C. अपि. ६ C. पुत्री.

Digitized by Google

भागुरायणः। (स्वगतम्) फलितं नो नीतिपादपलतया धिया ।

विदूषकः।(हस्तमुद्यम्य) भो दिण्णा परिणीदा अ एसा। किं ण पेक्खसि पओठे दररत्तसूत्तकंकणं पिअवअस्सस्स मीअंकावल्लीए अ मंडिदं किदं[2] वरइत्तिअं । (क) (सर्वे विस्मयन्ते)

देवी । (जनान्तिकेन) पेक्ख देव्वेदुल्ललिदाइं । जं मए केलिकिलित्तणेण अलीअं पडिकप्पिदं तं सच्चत्तणेण परिणदं । (विचिन्त्य) भोदु एव्वं दाव । (प्रकाशम्) अज्ज मादुलसंदेसमंतरेण वि मए परिणाविदा एव्व एसा । (ख)

दूतः । देवि भवादृशीनां बुद्धयो यदृच्छयापि प्रवृत्ताः कार्यमनुरुन्धानाः परिणमन्ति ।

विदूषकः। (जनान्तिकेन)भो[4] देवी[5] एसा पच्छात्तावे पडिदा ।(ग)

राजा। तथैव । अनुगुणं हि दैवं सर्वस्मै स्वस्ति करोति ।

देवी । (जनान्तिकेन) हलाँ अह्मे कज्जवाहिरिदीएँ भामिदाओ एदाणं उण साणुबंधाणं एस पबंधो । (घ)

(क) भो दत्ता परिणीता चैषा । किं न प्रेक्षसे प्रकोष्ठे दररक्तसूत्रकङ्कणं प्रियवयस्यस्य मृगांकावल्याश्च मण्डितं कृतं वरयितृकम् ।

(ख) प्रेक्षस्व दैवदुर्ललितानि । यन्मया केलिक्रीडितत्वेनालीकं परिकल्पितं तत्सत्यत्वेन परिणतम् । भवत्वेवं तावत् । आर्य मातुलसंदेशमन्तरेणापि मया परिणायितैवैषा ।

(ग) भो देव्येषा पश्चात्तापे पतिता ।

(घ) हला वयं कार्यवाहिरीत्या भ्रान्ता एतयोः पुनः सानुबन्धयोरेष प्रबन्धः ।

---

१ C. भुत्ता. २ B, C. add च. ३ C. drops देव्व. ४ C. D. drop भो. ५ B. देवीए पच्चलंका पडिदा. ६ C. drops हला. ७ B. D. रित्तीओ.

Digitized by Google

मेखला। जधा एव्व देवीए महाणुभावत्तणं अंगीकिदं तह एव्व णिव्वाहीअदु। किं गदे सलिले सेतुबंधेण किं गदे विआहे णक्खत्तपरिक्खाए। (क)

विदूषकः। भो अमच्चचूडामणे अहिणवचाणक्को भवं। भाउ-राअण एसा वि कुवलअमाला पिअवअस्सस्स एव्व। जदो महामु-णीणो वि एंव्वं मंतअंति।

भज्जा दासो अ पुत्तो अ णिद्धणा सअला वि ते।
जं ते समधिअच्छंति जस्स ते तस्स तं धणं॥ १७॥ (ख)

दूतः। अहो स्मृतिवैशारद्यं महाराजनर्मसचिवस्य चाराय-णस्य।

भागु। यथाह चारायणः। किं पुनरनेनैव कङ्कणेन देवि परिणापयैनामपि।

देवी। जहा समत्थेदि महामच्चो। (ग)

विदूषकः। (कुवलयमालायाः हस्तं गृहीत्वा राजहस्ते विनिवेश्य)(घ)

(क) यथैव देव्या महानुभावत्वमङ्गीकृतं तथैव निर्वाह्यताम्। किं गते सलिले सेतुबन्धेन किं गते विवाहे नक्षत्रपरीक्षया।

(ख) भो अमात्यचूडामणे अभिनवचाणक्यो भवान्। भा-गुरायण एषापि कुवलयमाला प्रियवयस्यस्यैव। यतो महामुनयोऽप्ये-वं मन्त्रयन्ते।

भार्या दासश्च पुत्रश्च निर्धनाः सकला अपि।
यं ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥

(ग) यथा समर्थयते महामात्यः।

(घ) भो जानपदेन श्यालभार्या अर्धभार्येत्युच्यते। भव-तः पुनः सकलभार्या संवृत्ता।

---

१ D. पि भव्वं. २ B. ° मालाहस्तं.

Digitized by Google

भो जाणवदेण सालभञ्जा अद्धभञ्जात्ति उच्चदि । भवदो उण सअलभञ्जा संवुत्ता । (सर्वे हसन्ति)

देवी । (सविलक्षं स्मयते)

विदूषकः । (चेटीः प्रति) भोदीओ गाएध णच्चध अहं पि गाइस्सं णच्चिस्सं जदो विआहसंपुडो वुत्तोत्ति । (क) (तथा कुर्वन्ति)

मृगां । (अपवार्य सहर्षम्) एहि कुवलअमाले परिरंभस्सु मं । कलत्तं भविअ सवत्ती संवुत्तासि । (ख)

भागु । (दक्षिणाक्षिस्पन्दं सूचयित्वा जनान्तिकेन) न जाने किं पुनरन्यदपि हर्षकारणम् ।

प्रतीहारी । (प्रविश्य) देव सिरिवत्साहिहसेणावदिणो आअदो कुरंगओ लेहहत्थओ दुआरे चिट्ठइ । (ग)

भागु । प्रवेशय तम् ।

प्रती । (निष्क्रान्ता)

(ततः प्रविशति कुरङ्गकः)

कुरङ्गकः । (प्रणम्य) जेदु जेदु भट्टा । (घ) (लेखं प्रक्षिपति)

भागु । (गृहीत्वा वाचयति)

स्वस्ति श्रीमन्नृपुर्यां तुहिनकरसुतावीचिवाचालितायां
देवं कर्पूरवर्षं विनयनताशिराः सर्वसेनाधिनाथः ।

(क) भवत्यो गायत नृत्यत अहमपि गास्यामि नर्तिष्यामि यतो विवाहसंपुटो वृत्त इति ।

(ख) एहि कुवलयमाले परिरभस्व माम् । कलत्रं भूत्वा सपत्नी संवृत्तासि ।

(ग) देव श्रीवत्साभिधसेनापतेरागतः कुरङ्गको लेखहस्तो द्वारे तिष्ठति ।

(घ) जयतु जयतु भर्ता ।

---

१ C. जाणवदो and mentions in a marginal note जणवदे. B. जाणवदे. २ C. drops णच्चिस्सं. ३ B. वस्साहिसेण D. वस्साहिहेअसेणा °. ४ B. प्रवेश्यताम्.

Digitized by Google

श्रीवत्सो वत्सलत्वान्मुरलजनवधूलोचनैरर्च्यमाने
पादद्वन्द्वारविन्दे क्षणमभिरचयत्यञ्जलिं मूर्ध्नि भक्त्या ॥१८॥

श्रेयोऽन्यत्कार्यं च लिख्यते । करचुलितिलकस्य पार्थिवस्य तव प्रतापेन महामन्त्रिभागुरायणस्य मतिवैशद्येन मादृशानां च पदातिलवानामादेशनिर्वहणेन प्राचीप्रतीच्युदीचीदिग्विभागे सर्व एव राजानश्चण्डवृत्तयो दण्डोपनताः । स्थिताः केवलमवाचीक्षितिपतयो दृश्यन्ते स्म । तत्रापि विनिवेद्यते । तत्कुर्ल्यापत्दतराज्यः कुन्तलाधिपतिर्वीरपालो देवं शरणमागतः। देवादेशाच्च तं पुरस्कृत्य वयं पयोष्णीतीरे[2] समावासिताः । तदा च

कार्णाटो युद्धतन्त्रे चतुरतरमतिः सिंहलः सिंहकर्मा
पाण्ड्यश्चण्डासियष्टिर्मुरलपरिवृढः कार्मुकप्रौढवाहः ।
आन्ध्रो नीरन्ध्रसारः समरभुवि पुरः कुन्तलः कुन्तशाली
किंचान्यैत्कौङ्कणाद्या अपि नरपतयः संश्रिताः सङ्गरवृत्तिम् ॥१९॥

अत्रान्तरे तैः सहास्मदीयानामपि बलानां समरसंमर्दो वृत्तः ।

राजा । समरकर्मणि निसर्गोद्भटा एव कार्णाटाः ।

भागु । (वाचयति) तत्र

प्रेयान्मे दन्तिदन्तप्रवसदसुरयं वल्लभो मे विपक्षः
कुन्तप्रोतोऽपि योऽयं सरति मम रुचिस्ताण्डवीयत्कबन्धः ।
अत्रास्मत्प्रेम बद्धभ्रुकुटि मुखमिदं यस्य लूनेऽपि कण्ठे
युद्धे देवाङ्गनानामिति वरवरणे न श्रुताः केन वाचः ॥२०॥

किं बहुलिखितेन तान्विजित्यास्माभिः स्वराज्ये वीरपालोऽभिषिक्तः । शेषं कुरङ्गकमुखादेवावगन्तव्यम् ।

कुरङ्गकः । भट्टा पडहस्स विअ मे मुहं अत्थि ण उण वाणी ।(क)

(क) भर्तः पटहस्येव मे मुखमस्ति न पुनर्वाणी ।

---

२ B. °पहत. D.पहत. ३ B. तीरपरिसरे. ४ C. कर्ण टो. ४ B. C.चतुरबलमतिः. ५ D. सुरः. ६ C. कुन्तलाधीशिता यः. D. कुन्तलेशः. ७ D °म्ये ८ B. संघवृत्तिः. ९ B. adds महान्. १० D. adds च. ११ C. omits भट्ट.

Digitized by Google

राजा । लेखमुखा एव लेखवाहा भवन्ति ।

भागु । तदधुना

आगङ्गापातपूतप्लुतपुलिनतटात्पूर्वतस्ताम्रपर्णी-
पूर्णादादाक्षिणात्यात्तुहिनकरसुतावल्लभादाप्रतीचः ।
नृत्यच्चण्डीशचूडाच्युतविबुधनदीनन्दितात्तावदेव
क्षीराम्भोधेरुदीचः करचुलितिलको वर्तते चक्रवर्ती ॥ २१ ॥

(राजानं प्रत्यञ्जलिं बद्ध्वा) किं ते भूयः प्रियमुपकरोमि ।

राजा । अतःपरमपि प्रियमस्ति ।

देवी कोपकषायितानुगमिता लब्धा मृगाङ्कावली
प्रागूढापि ममाद्य कुन्तलपतेः पुत्री कलत्रीकृता ।
युष्मन्नीतिवशेन तस्य च महासेनापतेर्विक्रमैः
संजाता मम चक्रवर्तिपदवी किं नाम यत्प्रार्थ्यते ॥ २२ ॥

तथापीदमस्तु ।

वामाङ्गं पृथुलस्तनस्तबकितं यावद्भवानीपते
र्लक्ष्मीकण्ठहठग्रहव्यसनिता यावच्च दोष्णां हरेः ।
यावच्च प्रतिमाप्रसारणविधौ व्यग्रौ करौ ब्रह्मणः
स्थेयासुः श्रुतिशुक्तिलेह्यमधुरास्तावत्सतां सूक्तयः ॥ २३ ॥

[इति निष्क्रान्ताः सर्वे]

॥ इति चतुर्थोऽङ्कः ॥

समाप्तेयं नाटिका ।

---

१ B. रावदेवः. २ D. महत्सेना. ३ B. प्रार्थये.

Digitized by Google

NOTES.

P. 1—कुलगुरु: etc.—The commentary quotes a verse from K.M. and gives the peculiar sense of वाममार्गोपदेशकर्ता (the teacher of impure ritual called वाममार्ग, of the S'áktas) to the word कुलगुरु. But here this word is evidently used in its ordinary sense of 'a hereditary preceptor.'

P. 2.—अपि कुसुमपृषत्कै: etc.—Construe अपि with पृषत्कै : or देवदेवस्य. In the first case the sense is : The conqueror of the god of gods (*viz.* S'iva) even with arrows made of (such a tender material as) flowers. In the second case : The conqueror of even (such a great god as) S'iva with his flower-arrows. सुरतलीला etc. =The sole manager in the play of amorous sports. As the सूत्रधार is the sole manager in a नाटिका, so the god of love is the sole exciter in amorous sports.

P. 3—The 2nd verse is mentioned in the K. P. as an instance of the व्याघातालंकार.

P. 4—समाधाय.=Concentrating his mind. V.3.—The other reading नियोजितांगदजरत्सर्पाय means: (For गोनास) the old serpent which was fastened as a bracelet (round the arm of S'iva). The reading adopted in the text means : Who used medicinal powder (as an antidote against गोनास). भीता च भीता च.—Glad at having obtained S'iva for her husband and frightened by the revolting things such as serpents, goblins etc. about his person. The commentator's explanation of भीता does not appear good. This verse is quoted in the Sar. K.

P. 6—प्रणयप्ररूढ etc.=Afraid, through timidity, of breaking his attachment grown strong through love.

P. 7—प्रगल्भा is thus defined :—

स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका ॥

वस्तूपक्षेप:=A song which shadows forth the plot of the drama. तदभिनये.—This is वैषयिकी सप्तमी=तदभिनयविषयक:. प्रसीकृत्य etc.=Named Harsdasa (a devotee of S'iva) by his fellow-students on account of his external appearance.

Digitized by Google

P. 8—किमपर etc.—Construe: अमुष्य गुणैः अपरैः गणितैः किम्. Trans.—What more will he gain by his merits being sung by others.

P. 9—सुधास्यन्दिनीः=dropping nectar. सुधास्कन्दिनीः, the other reading, means : attacking i. e. surpassing necter.

P. 10—प्रज्ञाप्रकर्षः etc.=Superior intelligence overtops all. V. 8.—मलिनं is used here as a noun. संस्कारशौचेन etc.=Improves others by its purifying influence. V. 9 —मन्त्रिणः कथितं=Told to the minister. पुत्रावकल्पच्छलतः=By making a design possible in the case of a son. निरुपधि etc.=Possessing a faultless eye of politics.

P.11-किं तीए विणा विसूरदित्ति.=What is wanting to the king without her.अत्रास्ति etc.=There is some motive in this which will be perceived when the end is gained. प्रत्यूषमुख.=Early dawn. झंकारा ण etc.=In whom the sweet पञ्चम notes did not remain long impressed. The other reading झंकारेण-या : सुस्थिताः etc. means : Who remained long blunted (to the influence of love) i. e. did not yield in spite of the sweet पञ्चम notes.

P. 12—महल्लअ.—The Maráthi Student will recognise his महाल here. प्रभातभोगावली.=Metrical stanzas to be repeated in the morning; perhaps our भुपाळी. 'नमः स्तुतिव्रतस्तस्य मन्थो भोगावली भवेत्' Hem. Abhi. S'I. 795. उज्जयिनीभुजङ्ग.=The paramour (the king) of Ougein. उद्दसमधुच्छत्र.=The bee-hive from which the honey is emptied. बालबिडाल etc.—The eastern direction has been pervaded with the light resembling the lustre of the eyes of young cats. *cf.* English 'gray dawn.'

P. 13—कवयितृषु etc.=Setting at work (lit. putting in) the quality of imagination in poets. *cf.* Mágha XI. गहनमपरारात्रप्रासबुद्धिप्रसादाः । कवय इव महीपाश्चिन्तयन्त्यर्थजातम् ॥ and also Raghu XVII., 1., पश्चिमाद्यामिनीयामात् प्रसादमिव चेतना । मातस्त्य स्तूर्यनादः.=The matin trumpet-sound. तन्मन्ये मन्त्रिमन्त्र etc.—That the king has got up so very early is, I think, nothing but the effect of the minister's plan.

P.14—साङ्गभङ्ग.=With twistings of his body. तद्वक्त्रं यदि etc.=If that face were in existence, the mention of the moon would be sealed (at an end). The idea is common with poets. *Cf.* M. V. C. Act VI. मुखं यदि किमिन्दुना etc. हारितं कुवलयैः=The wager would be lost by the blue lotuses. पुलकाङ्कवल्लुविमुक्तः etc.=The method of

Digitized by Google

creation of Brahmà is certainly averse to creating similar things (averse to repetition). The Sar. K. quotes this verse and reads तथेत्स्मितं का सुधा for हा हेम सा चेष्टितिः ; ताम्रोदिरो धिङ्मधु for तथेत्स्मितं का सुधा ; and वस्तुविरसः for वस्तुविमुखः.

P. 15—परिणामोत्पीडित etc.—Easy to break on account of its ripeness. सुहृत्संचारित etc. *Cf.* S'akuntalá Act iii. स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति. चुलकोत्सेकयं.=Of dimensions to be measured by the cavity of hand. ज्योत्स्नासपत्नं महः=Brilliance, the rival of the moon. The Sar. K. quotes this verse and reads चुलुको for चुलको, and प्रसन्नं for सपत्नं.

P. 16—नखनिस्तुषीकृत etc.=Which purified the lustre even of the autumnal moon with their nails. मन्मथं मन्मथं कृतवती.=She made God of love torment me much. One मन्मथं as the commentator takes it, means मां मथ्नातीति तादृशं. तावदेषोऽपरो गण्डस्योपरि etc. *Cf.* S'akuntalá Act ii. Speech of Vidùshaka. यावत्तद्गतं etc.= Just as I am thinking of some expedient in her case. चेतःफलके= on the canvass of mind. विकल्पवर्तिकया.=By the pencil of thoughts. स्मरचित्रगता=Painted (चित्रगता) by the God of lover तद्वन्दी etc.=I have become her captive or her panegyrist.

P. 17—षाण्मासिक=Six months old i. e. newly produced and therefore very lustrous. Ràjas'ekhara is very fond of using this adjective. *Cf.* K. M. J. 2. 3. केरलस्त्रीविहसित etc.=As white as the smile of Keralî women. सद्यो दत्तचन्द्रोदयश्रीः=Which at once spread brilliance like that of the moon-rise. यज्ञोपवीतं परामृश्य.—Touching his sacred thread by way of giving weight to what he says.

P. 18—मांसलैर्दृष्टिपातैः=By her big side-glances. The reading मां गतैः appears better ; it means 'directed towards me.' तरलहार etc.=तरला या हारलता तया नितम्बस्य यत् संवाहनं तेन स्खलनं तस्माद्वेगेन तरङ्गितानि अङ्गानि यस्याः सा—Whose body trembled excessively on account of the obstruction to her hasty gait caused by the striking of her rocking necklace against her hips. धृतमानतन्तुः= Becoming jealous. सौविदल्लाः=Attendants on the harem. Mahes'vara in his commentary on Amaracos'a explains this word thus: सुष्ठु विदं विद्वांसं अपि लांति वशं कुर्वन्ति सुविदल्लास्तासां इमे रक्षकाः सौविदल्लाः। अदलितकन्दोट्टा etc.=How long will a lotus-pond remain witho[illegible] having its lotus-buds opened. The Vidúshaka

Digitized by Google

means to say that the queen would not have become proof against his attempts at conciliation had he made any.

P. 19—सत्यकं त्वया कृतं etc.=You have made true (the adage) that a lady seeing an actor decorated shaved her own husband who was near her. He means to say that the king seeing the lady in his dream forgot to please the queen. The reading मुक्तोति=मुक्त इति is preferable. *V.* 20. This is an instance of the निदर्शनालंकार. The Sar. K. has the first line thus :—क्व पेयं ज्योत्स्नाम्भो वदत विषवल्लीसरणिभिः and reads पारीमेयो for पारो मेयो. C. also reads पारीमेयो which also appears to be the reading of the commentary.

P. 20—स्वप्नः किमेष etc.=Is this a dream or nothing but reality or is it some different perception composed of both (स्वप्न and संविद्)? The reading दानं means : The placing of a pearl-necklace round the neck. मदनाकूतं=Feeling (sensation) of love. D. reads मदनानुकूलं. एष स त्वं etc.=You now invite the whole town for dinner with balls obtained only in dream. The Vidûshaka says. That requesting the God of love to show the lady who does no exist but was seen only in a dream is like inviting somebody to feast on an imaginary banquet. वरं तत्कालो etc.=A female partridge present at the time is better than a pea-hen at a day's interval. *Cf.* Eng. 'A bird in the hand is worth two in the bush'. This is said with reference to the queen. The king ought to have conciliated the queen instead of letting his thoughts be occupied with an imaginary lady.

P. 21—मध्येऽङ्कुरं.—Avyayîbhâva compound. *Cf.* मध्येसमुद्रं. वाञ्छामात्रपरिग्रहः=Wants only will (of the cuckoo) to be produced. किंच त्रीणि etc.=And also if the bow of the God of love, long since laid aside, be (again) made manageable by practise, it will, in two or three days conquer the three worlds. शिखोद्गम etc.=The first knots from which the points would shoot up. These knots are plucked by the female friends of love-sick women to spare them the future pain at the sight of the flowering मञ्जरीः निभृतं=secretly,—because the sight of even the knots would put them in mind of the approaching spring.

P. 22—*V.* 25. The commentator seems to have read किञ्चिद् द्विवृन्तायते. विवृन्तायते=Appears to have no stem. अन्यैव काचिल्लिपिः=Quite another appearance (i. e. splendour).

Digitized by Google

P. 23—निर्जितमज्जिष्ठा etc.—The commentator's explanation of the compound is crooked and not clear. The compound may be solved thus.—निर्जितमज्जिष्ठानि आधूसरितानि मनोहराणि च वाङ्मेषु-ईषदावर्तित etc.=As beautifully white as the slightly stirred milk.

P. 26—*V.* 31 is quoted in the Das'arúpa and the third line is read thus चकोरैः कवलिताम्. The Sar. K. quotes this verse and like the Das'arúpa places the last two lines first. The Alamkára-Chandrikà on Kuvalayànanda mentions समाबद्धग्रासैः and नवलवलिपाकप्रणयिनीम् as other readings. The Sar. K. reads ग्रासैः for ग्रासैः; अनुसृतां for अनुसृतः; and नवलवलि for लवलिफल.

P. 27—कधं लुक्कदंसणिआहिं etc.=What! does the moon play with us at hide-and-seek? शरकाण्डानां *Cf.* Màlav. Act ii. शरकाण्डपाण्डुगण्डस्थलेयमाभाति. करिकलभदन्तछेदेषु *Cf.* Màl.M. अभिनवकरिदन्तच्छेदपाण्डुः कपोलः.

P. 28—ललिअफलिहगब्भभवण etc.=Direct your sight towards the workmanship displayed in the pictures on the walls of inner-apartments built of beautiful marble. टप्परकण्णो=करालकर्णः

P. 29—णाहं लिहिदुं जाणिदो.=I was not meant to be represented here. ह्यमपूर्वैव etc.=Is she quite new (unparalleled) to us, and not to the God of love?

P. 30—उव्वहणागदं is unintelligible; one of the Mss. reads उव्वहणागदं=उद्वहनागतं which may mean 'brought here to be ransomed'. ओल्लागदं is preferable.

P. 31—एकधारः Drawn at a stretch (having one continuous line).

P. 32—क्रमपरिणत etc. The author seems to have had a knowledge of perspective. The first two lines may be translated thus.—With the several limbs appearing solid by the shading, gradually growing deeper and deeper, she, though painted in miniature, appears to have (life-like) full form. सात्त्विकानां.—The सात्त्विका: are thus given in the Das'arúpa :—

यौवने सत्त्वजाः स्त्रीणामलङ्कारास्तु विंशतिः।
भावो हावश्च हेला च त्रयस्तत्र शरीरजाः॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।
औदार्यं धैर्यमित्येते सप्त भावा अयत्नजाः॥
लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।

Digitized by Google

मोदृग्विधं कुतूहलितं चित्तवोधो लभेत तथा ।
विहतं चेति विशेषा इह भावाः स्वभावजाः ॥

चतुर etc.=Her state of mind as being skilful, gentle and innocent. इदमेव रूपरत्नम् etc.=Let us do honour first to this excellent beauty only.

P. 33–*V.* 39.–The first two lines may be thus translated :— It is not possible that some one else might have had such a dream. In whose mind could have shone such an orderly painting of beauty shaped by fancy ?

P. 34—The statue is the विचकिल creeper and the pearl-necklace the कोरकनिकुरुम्बः, मृगांकप्रतिबिम्ब etc.-Up to this time the Vidúshaka saw only the likeness of Mrigánkàvalì, but now he saw the original and therefore says delightfully that he was deceived by the reflections of the moon (in this case, the pictures of Mrigànkávalì).

P. 35—सञ्जीवनौषधिः and विशल्यकरणौषधिः are the names of medicines ; first restores life and the second heals up the wounds. मध्यं दरिद्राति = The waist is poor i. e. slender.

P. 36—अलब्धलक्ष्यं = Not fixed on anything *i. e.* vacant.

P. 37—सूक्तियुक्ता =Full of deep meaning. रभसोत्तम्भितहस्तः = with his hands raised up with delight.

P. 38—व्यापारमन्तरेण etc.=The pearl-shell,even though held in hand, does not let out its pearls unless some effort be made to break it, much less, therefore, will Mrigânkàvalî (who is quite a stranger to us) be got without some attempt. C. reads भीत्यास्फोटं.—आस्फोटनं=trembling, shaking. C. reads. भूयं तर्हि मालती etc.= You will, in that case, have produced chaff-fire by means of Màlàtî-flowers. As it is impossible to produce fire from Málàti-flowers so it is impossible to strike effectively (aim a blow with effect) on the reflected-image (which was thought a goblin by Vidúshaka).

P. 39—*V.* 43.—शष्पस्तम्ब etc.=And the pea-cock fixes his head in the midst of his tail through a liking for a clump of grass (to shade him). रस=Liking ; strong desire for.

P. 40—*V.* 44.—When the women entered the pond the Volume of the water increased and thus the level rose ; but the water finding its way in the hollow of the naval of the women again sank in level.

Digitized by Google

ACT II.

P. 42—C. reads आसंका for आसंघो. आसंका appears better.

P. 43—कधं विअ जीअंतादो etc.=How will gold be obtained from the chameleon while he lives unless he himself offers it. So Kurangikà means to say that she cannot know the secret unless Tarangikà becomes so good as to tell it herself to her. Kurangikà thus indirectly presses her friend to admit her into the secret.

P. 44—C. reads आदंसिदो for अदंसिदो. and आढत्तो for आरद्धो.

P. 45—पञ्चशर is intended to be a contrast to अक्षयसायक. Mahes'vara in his commentary on Amarakosha thus gives the names of the five arrows: अरविन्दमशोकं च चूतं च नवमल्लिका। नीलोत्पलं च पंचैते पंचबाणस्य सायकाः॥विडलत्कदम्ब etc.=My body has assumed an appearance clearly resembling the opening bud of Kadamba. The king means to say that the रोमाञ्च were the feathers of the arrows of love sunk deep in his body and which therefore caused his body to appear like an opening bud of Kadamba.

P. 47—मं परिणाइस्सदि. The accusative मं does not appear grammatically correct. सर्सिगो etc.—The student will easily see that these are the names of things that do not exist at all.

P. 48—देवीसंदिट्ठं.=The message of the queen. अवणेसु रत्तसुअं etc. On this see Sanskàra-Kaustubha :—

पटमुत्तरतोऽपसारयेयुस्ततः कन्यावरौ परस्परं शिरसोरक्षतप्रक्षेपं परस्परेक्षणं च कुर्याताम् etc. and also Mahes'abhatta-Krita Prayoga. अंतःपटं उदगपसार्य वधूवराभ्यां परस्परं निरीक्षणं परस्परस्मिन्नंजलिस्थतंडुलजिरकावकिरणं etc. and on ध्रुवमरुन्धतीं च As'valáyana Grihya Sútra 1-7-22. ध्रुवमरुन्धतीं सप्त ऋषीनिति दृष्ट्वा वाचं विसृजेत. जीवपत्नीं प्रजां विन्देयेति।

P. 49—भामरिओ etc.=Quickly fan the fire, so that handfuls of Làjás will be thrown in the fire thus blazing or (kindled to a blaze).

P. 50—अम्बरमाला उण etc.=The bride अम्बरमाला is really a sky-garland (i. e. not existent). There does not exist a garland of flowers sprung in sky.

Digitized by Google

P. 51—सिद्धौषधैः = By drugs prepared by magical power. मियवयस्यमावर्जयितुं = To conciliate our dear friend Vidûshaka. देवतादुदीअस्स.— The queen suspects the intrigue ofthe king and thus purposely sends Kurangikâ with the king to watch his actions. देवता is मृगांकावली. देवताद्वितीय etc.=The king who will be alone with Mrigánkâvalí there (who will meet her there). The expression तुह्मारिसजण etc. is common not only with the Vidushakâ of Kâlidâsa, but also with the Vidúshaka of the Mrik.

P. 52—न पुराणप्रजा etc.—*Cf.* Vikramorvas'i Act I. वेदाभ्यासजडःकथं नु etc. तामिव वयोऽवस्थां construe वयस्तामिव अवस्थामलंकुरुते. अभिनवाकल्प etc.=With her mind absorbed in thoughrs of new toilet, dress etc. C. Reads छेकातिसंक्रान्तयः for छेकोक्ति etc.

P. 54—किमधुना etc.=Does not the spring cause trees to put forth flowers? As flowering is natural to the Spring so this way of acting is natural to you.

P. 55—The reading चेलंचलं (चेलाञ्चलं) of C. seems better than चोलाञ्चलं. The meaning, then, would be: In which the ends of her upper garment were moving by the turnings of her hasty foot-steps (while taking the rounds in playing at ball).

P. 58—हृदयचोरं=Attracting the heart. क्रीडाकौतुकमिश्रभावं adj. to आननं. = With a feeling (of desire for the king) mixed with the enjoyment of sport. ताम्रं—Red on account of the exercise. भृंगाग्रग्रहetc.=Rivalling the leaves of Ketaka whose ends are drawn by bees; i.e. her eyes were like केतक leaves with beesat their ends. The eys were black at the end and hence compared to भृंगाग्रग्रहकृष्टकेतकदल. करतलन्यस्त etc.=Placing one of her hands on the palm of the other with the ball between them.

P. 59—मूर्छतु = वर्धताम्.—Let it increase. पेम्मदुद्दोणी etc.= Let the reservoir of love be broken (and love let loose from it).

P. 60—हरिश्चन्द्रपुरी.—In later legends Harischandra is represented as insidiously induced by Nârada to relate his actions with unbecoming pride; whereupon he was degraded from Svarga, one stage at each sentence, still stopping in time and doing homage to the gods he was fixed with his capital in mid-air. His æerial city is popularly believed to be still visible in the skies at particular times. The city is called सौभ.

Digitized by Google

P. 61—**पोगंडआ इव** etc.=How long shall we stand with knees erect like a paralysed person ? A person paralysed in his knee has not the power of folding or bending it.

P. 62—**सिहाबंधं** etc.=Exorcise (the ghost) by tying up the hair-knot.—**भो एवं क्खु पंडिदा** etc.=Oh, this is the case here. Learned persons with false thoughts(vain discussions)not going to the bottom,like monkeys,do not get the fruit but catch only leaves. Fools, on the other hand, coming down to the bottom,like masters of *Panasa* groves, get the fruit. What Vidúsaka means to say is this—I asked you to tell me what was said by the person beyond the wall. You told me that a certain lady was pressed by her friend to tell her the secret of her love. Again the words **सहीओ किं एत्थ** were heard. Then you pointed my attention to these. So all this has happened like this. You are learned and I am a fool ; but you do not know the real purport of the words but give false guesses ; while I, who am a fool, know what is meant by these words here. **पल्लवग्गाहिण:** as applied to **पण्डिता:** means—superficial, not sound. The word **विस्मृतफला** is emphatic.

P. 63—**सामान्यजनवचनं**.=These words are not with respect to any common man but it is *you* who are talked of here.

P. 64—**सिक्किहिसि** etc.=How long will you nourish (i. e. pull on with) this paleness of your tender body which resembles gold covered over with liquid mercury. Her natural complexion was that of gold and her present paleness was compared to mercury. **कहं णु तए** etc.—construe **केलिपंकेरुहग्ग-कड्ढिअहार-णीसासा तए कहं णु तरलिज्जंति. तरलिज्जंति**=Are set in motion, heaved.

P. 67—**निर्यद्वासर** etc.=The orb of the sun, grieving for the departing life of the day,and holding,therefore, a red garment by his rays a little hot, sinks to the setting mountain i. e. sets. The orb of the sun is said as if ready to take **संन्यास** through grief for the departing life of the day and so holds by its rays (hands), not hot as before, red garments for that purpose. The commentator's meaning does not suit well.

ACT III.

P. 69—**अशिशिरकर** etc.=Mixed with (touched by) hot rays (of the sun).

P. 70—**चिन्तितोपनता**=Standing before as soon as thought f.

Digitized by Google

P. 71—माहिलाछगुप्पणए जइ etc. If you were not seen by us owing to (your being engaged in) politics with regard to women, is it from the very same cause that we are not seen by you even with your eyes? Sulakshaná means to say that it might have been that Vichakshaná being engaged in some intrigue about women she could not be seen, but then how can that (i.e. her being engaged in etc.)be the reason in the present case to Sulakshaná's being not seen even when she was standing before the eyes of Vichakshaná.

(22) By the clouds with the rain-bow, blue like a leaf of a blue lotus, resting on high, bent low by water, put in motion by gentle breezes, and (therefore) slowly moving (to and fro), the heart is taken away, as it were, of the wives of travellers, distressed on account of separation from them.

(23) The forest-ground, with its heat removed by means of a fresh shower of water, appears, as if, joyous on all sides by means of the *Kadamba* trees that have put forth flowers ; it seems to dance, as it were, by means of the trees whose branches are set in motion by the wind ; and it bears a smile, as it were, (on its face) by means of the prickles of the *Ketakis*.

(24) This season full of clouds (*i. e.* this rainy season) prepares, like a lover, an ear-ornament for women with full-blown and fresh *Kadamba*

१ दललीलैः. २ उद्भूतैः. ३ स्तोकनम्रैः. ४ विशेषा. ५ तोयनम्रैः. ६ तद्वियोगक्षतानाम्. ७ जाति. ८ सूतिभिः. ९ निषेकात्. १० शान्ततापः; क्षाततापः. ११ कुसुमितवनपुष्पैः; कुसुमितनवपुष्पैः. १२ जालकैश्च.

Digitized by Google

दधति पृथुकुचाग्रैरून्नतैर्हारयष्टिं
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकादुद्गतां रोमराजीं
ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः ॥ २५ ॥
नवजलकणसङ्गाच्छीततामादधानः
कुसुमभरनतानां लासकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभिः
परिहरति नभस्वान्प्रोषितानां मनांसि ॥ २६ ॥
जलधरविनतानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।

---

flowers, as also a garland of *Bakula*-flowers to be placed on their head, along with (intertwined with) *Mâlatí* flowers, full-blown forest flowers, and the *Yúthikâ* buds.

(25) Women bear a pearl-necklace (by) on the prominent nipples of their large breasts ; very light white silken garments on their large rounded hips ; and a row of hair standing on their ends through the sprinkling of the particles of fresh water, on their central part (*i. e.* the part round the naval). having beautiful folds.

(26) The wind possessing coolness on account of its contact with fresh water-particles, shaking to and fro the trees bent down under the weight of flowers, and possessed of sweet odour by means of the pollen of the *Ketakís*, takes away the hearts of the (lovers) absent (from their home).

(27) The clouds surcharged with water gladden, as it were, the Vindhya mountain heated by the exces-

---

१ कुचयुगाग्रैः; वरकुचाग्रैः. २ रुचिरतर. ३ लव. ४ उन्नताम्. ५ राजिम्. ६ त्रिवलिवलिविभङ्गैः; ललितवलिविभागैः; त्रिवलिवलित (ललित) शोभाम्; त्रिवलिजनितशोभैः. ७ मध्यदेशे. ८ तु. ९ सेकात्. १० लालसः; नाशकः; नायकः. ११ सुरभि. १२ व्यवहरति; अपहरति. १३ योषितानाम्. १४ जलभरनमितानाम्.

Digitized by Google

अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥ २७ ॥
बहुगुणरमणीयः कामिनीचित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एष प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥२८॥

तृतीयः सर्गः ।

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या ।
आपक्वशालिरुचिरानतगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रूपरम्या ॥ १ ॥

---

sively unbearable flames of the fire (heat) of summer with showers of water, thinking "he is a support on high for us (when) bent down with the burden of water."

(28) May this rainy season grant thy various desires—the season which is charming by means of its various excellences, which attracts the heart of young women, which is an unchangeable (undissembling) friend of trees, their branches (or, large trees, small trees) and the creepers, and which is the very life of living beings.

---

(1) The *Sharad* (autumn) has approached, who is, like a new bride, charming on account of her beauty, who has the *Kâsha* flower for her garment and the fresh-blown lotus for her beautiful face, who is (most) pleasing on account of the noise of intoxicated swans (serving) for the noise of anklets, and who has the stick of *Shâli* for her beautiful, bending body.

---

१ इति बहुगुणरम्यः. २ योषिताम्; कामिनाम्. ३ एषाम्. ४ प्राणिनः. ५ प्राणहेतुः. ६ रुत. ७ ललिता. ८ तनु. ९ हारिरूपा; रम्यरूपा.

Digitized by Google

काशैर्मही शिशिरदीधितिना प्रदोषा
हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ ॥

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपंक्तिहाराः ।
नद्यो विशालपुलिनोरुनितम्बबिम्बाः
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥

व्योम क्वचिद्रजतशङ्खमृणालगौरै-
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयद्भिः ।
संलक्ष्यते पवनवेगचलैः पयोदै-
राजेव चामरशतैरुपवीज्यमानः ॥ ४ ॥

---

(2) The earth is made white by the *Kásha* flowers the nights by the cool-rayed (moon); the waters of rivers by the swans; the lakes by the *Kumuda* lotuses; the forest-skirts by the *Saptachhada* (lit. seven-leaved) trees bent down by the freight of flowers; and the groves by the *Málatí* flowers.

(3) In this season, the rivers, like intoxicated women, having for their round waist-bands the bounding, beautiful *Sapharí* fish, with necklaces of the rows of white birds seated on their margins, and with the broad hips of the extensive sandy banks, move slowly.

(4) With waterless clouds white as silver, conch-shell or a lotus-stalk, flying in hundred parts on account of their lightness, and set in motion by the force of wind, the sky, in some parts, appears like a king being fanned by hundreds of *Chamars*.

---

१ वल्ग. २ भक्ति. ३ पुलिनान्त. ४ देशा. ५ वीताम्बुभिः; मुक्ताम्बुभिः. ६ उत्प्रेक्षते; उत्प्रेक्ष्यते. ७ चामरवरैः. ८ आपे वीज्यमानः; आभिवीज्यमानः.

Digitized by Google

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परचितारुणता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागाः
प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥ ५ ॥
मन्दानिलाकुलितचारुविशालशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेक
श्चित्तं विदारयति कस्य न कोविदारः ॥ ६ ॥
तारागणप्रवरभूषणमुद्वहन्ती
मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयाति नुदिनं प्रमदेव बाला ॥ ७ ॥

(5) The sky having the color of the collection of powdered collyrium; the ground rendered reddish (lit. with redness formed on it) by the *Bandhûka* flowers; the fields with the grounds covered over with ripe *Kalama* corn; in what youthful person's mind do all these not produce longing of love?

(6) Whose mind does the *Kovidâra* tree not torment, (the tree) whose beautiful and extensive branches are disordered by gentle breezes, the ends of whose leaves are tender on account of the clusters of newly appearing flowers, and the flow of whose flower-juice is drunk by intoxicated bees.

(7) The night wearing a number of ornaments in the form of the clusters of stars, having for her face the moon freed from the covering of clouds, and wearing a white silken garment in the form of moonlight, is day by

१ रजसारुणितां; बन्धूकपुष्पनिकरै रुचिरा २ चारुकलमा; चारुकमला; पक्वकलमाचित. ३ भूरिभागा; भूमिभागैः ४ उत्कण्ठयन्ति. ५ चारुमनोज्ञ; चारुतरम्; सर्वमनोज्ञं ६ प्रचुर; प्रवालकोमलपल्लवाग्रः ७ मत्तद्विरेफ. ८ मेघोपरोध. ९ वसना.

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसचयाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ॥ ८ ॥
नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरसीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां
चन्द्रो दहत्यतितरां तनुमङ्गनानाम् ॥ ९ ॥
आकम्पयन्फलभरानतशालिजालो-
नानर्तयंस्तरुवरान्कुसुमावनम्रान् ।

---

day growing, as a young woman wearing a number of ornaments (bright) like the clusters of stars, having a face resembling the moon that is freed from the covering of clouds, and wearing (dressed in) a silken garment (bright) like the moonlight, grows up (to womanhood) day by day.

(8) The rivers tinged with red by the pollen of lotuses, with the series of waves in them forced asunder by the mouths of *Kàrandava* birds and the grounds on the banks covered with the groups of the *Kàdamba* and *Sarasa* birds, give delight to the hearts of men by means of the cries of swans all around.

(9) The moon, who is the festival of the eyes, whose line of rays is attractive to the heart, who is greatly delightful and who showers down water in cool particles, violently burns the body of women who are wounded by the envenomed shaft of separation from their husbands.

(10) The wind, shaking the clusters of *Shâli* bent

---

१ कारण्डवैरभिविघट्टित; कारण्डवाहवविघट्टित २ कुलाकुल. ३ सरोरुहरजोरुणिताश्च नद्यः; परां कमलरेणुवृतास्तटिन्यः; मनोज्ञकमलारुणिताश्च नद्यः. ४ गौरः. ५ प्रह्लादयन् शिशिरशीकरवारिवर्षैः. ६ अनुदिनम्; रुजत्यनुदिनम्. ७ जालम्; जालानि. ८ तरुवनान्; कुरुबकान्.

Digitized by Google

उत्फुल्लपङ्कजवनां नलिनीं विधुन्व-
न्यूनां मनश्चलयति प्रसभं नभस्वान् ॥ १० ॥
सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छप्रफुल्लकमलोत्पलभूषितानि ।
मन्दप्रभातपवनोद्धतवीचिमाला-
न्युत्कण्ठयन्ति सहसा हृदयं सरांसि ॥ ११ ॥
नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥ १२ ॥
नृत्यप्रयोगरहिताञ्छिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।

down by the load of grain (corn), causing to dance (move gracefully to and fro) the *Kurabaka* trees hanging down by means of flowers, shaking the lotus-pond full of full-blown lotuses, excessively agitates the mind of youths.

(11) The clear lakes adorned by the couples of inebriated swans, decked with clean and blown lotuses (white and blue), and having a series of ripples produced by gentle morning breeze, forcibly excite longing.

(12) In these days, the rain-bow (lit. the bow of *Indra*, the destroyer of *Bala*) is lost (not seen) in the bellies of clouds; the lightning, the banner of the sky, does not flask; the cranes do not shake the sky by the wind of (raised by) their wings; nor do the peacocks look at the sky with uplifted necks.

(13) The God of Love having abandoned the peacocks who are devoid of their frolicking dance goes

१ प्रोत्फुल्ल; प्रोत्फुल्लपंकजवतीम्. २ स्खलयति; मदयति. ३ स्वच्छानि चारु; स्वच्छानि फुल्ल. ४ मन्दं प्रभात; मन्दप्रचार; मन्दप्रवाह. ५ पनवोद्धत. ६ उत्कम्पयन्ति. ७ प्रसभं हृदयम्; हृदयं सहसा. ८ जलदोदकेषु. ९ नापि. १० चोन्नतमुखा; नोद्गतमुखा; नोद्धतमुखा. ११ प्रतीतान्.

Digitized by Google

मुक्त्वा कदम्बकुटजार्जुनसर्जनीपा-
न्सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥ १३ ॥
शेफालिकाकुसुमरागमनोहराणि
स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥ १४ ॥
कह्लारपद्मकुमुदानि मुहुर्विधुन्वन्
स्तत्संगमादधिकशीतलतामुपेतः ।
उत्कण्ठयत्यतितरां पवनः प्रभाते
पत्रान्तलग्नतुहिनानि हरंस्तरूणाम् ॥ १५ ॥

---

to the sweet-singing swans ; the splendour of the shooting forth of blossoms deserting the *Kadamba*, *Kutaja*, *Arjuna*, *Sarja* and *Nipa* trees has adhered to the *Saptachhada* trees.

(14) The pleasure-gardens, lovely on account of the redness of the flowers of *Shephâlikâ* plant, resounded by the multitude of birds sitting at ease, and having lotuses of the eyes of female deer seated on the borders, inspire the minds of men with longing.

(15) The wind in the morning repeatedly shaking the waterlilies and the (white and blue) lotuses and possessed of more coolness owing to their contact, and taking away the particles of dew adhering to the ends of leaves, creates excessive longing.

---

१ त्यक्त्वा. २ नीपवृक्षान्. ३ उद्गतश्रीः. ४ गन्धे. ५ शाखास्थित; कच्छस्थित; सुस्थस्थित. स्वच्छस्थित. ६ गण. ७ प्रतिवादितानि. ८ युनाम्. ९ कुसुमानि. १० मुदा. ११ उपेत्य. १२ सोत्कां करोति वनितां; सोत्कां करोति वनिताः; सोत्कं करोति हृदयम्. १३ तुहिनाम्बुविधूयमानः--विधुनवेन; °नि वनद्रुमाणाम्.

रुं पनशालिनिचयावृतभूतलानि
स्वस्थस्थितप्रचुरगोकुलशोभितानि ।
हंसैः ससारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति नृणां प्रमोदम् ॥ १६ ॥
हंसैर्जिता सुललिता गतिरङ्गनाना-
मम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदकलैर्नयनानि विलोकितानि
भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरंगैः ॥ १७ ॥
श्यामा लताः कुसमभारनतप्रवालाः
स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिं ।
दन्तावभासविशदस्मितचन्द्रकान्ति
कङ्केलिपुष्परुचिरा नवमालिका च ॥ १८ ॥

(16) The frontier-lines with grounds covered with the heaps of ripe *Shâli*, beautified by the herd of cattle seated at ease, and resounded by the swans and the groups of *Sârasa* birds give rise to the delight of men.

(17) The exceedingly graceful gait of women is excelled by the swans; the loveliness of (their) moon-like faces by blown up lotuses, (their) looks charming through intoxication by the blue lotuses; and the graceful play of (their) brows by the slight waves.

(18) The green creepers with their leaves bent down by the weight of flowers surpass the beauty of the arms of women with ornaments on them, as also the *Nava-Mâlikâ* creeper charming on account of the *Kankeli (Ashoka)* flower does (surpasses) the luster of the moon in the shape of (their) smiles bright with the lustre of their teeth.

१ सुस्थ; सुष्ठु. २ च सारस. ३ जनप्रमोदम्. ४ चलानि. ५ विलोचनानि. ६ सारिताम्. ७ भृत; बहु. ८ दन्ते विभास; दन्तावसक्त. ९ वक्त्रकांतिम्; वक्त्रकांतिम्. १० बन्धूक; साशोक. ११ रचित्र. १२ कवमालती च; नवमालतीव; नवमालिकेव.

केशान्निजान्तघननीलविकुञ्चिताग्रा-
नापूरयन्ति वनिता नवमालतीभिः।
कर्णेषु च प्रवरकाञ्चनकुण्डलेषु
नीलोत्पलानि विविधानि निवेशयन्ति ॥ १९ ॥
हारैः सचन्दनरसैः स्तनमण्डलानि
श्रोणीतटं सुविपुलं रसनाकलापैः।
पादाम्बुजानि कलनूपुरशोभनैश्च
नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति ॥ २० ॥
स्फुटकुमुदचितानां राजहंससेवितानां
मरकतमणिभासा वारिणा भूषितानाम्।
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रतारावकीर्णम् ॥ २१ ॥

---

(19) (Young) women set their excessively thick, blue and top-curled hair with fresh jasmine-flowers and place various kinds of blue lotuses on their ears wearing best of golden ear-rings.

(20) In these days, women with their minds full of joy decorate their rounded breasts with necklaces besmeared with sandle-juice, their large hips with the circles of girdles, and (their) lotus-like feet with the best sounding anklets.

(21) The sky free from clouds and scattered over by the moon and the stars bears the exceedingly charming splendour of the reservoirs of water, which are full of blown lotuses, which are occupied by the *Râjahamsa* birds and adorned with water having the brilliance of emerald stone.

---

१ निकुञ्चि. २ प्रचुर; प्रबल; प्रचल. ३ कुड्मलेषु. ४ रुचिराणि; विकचानि. ५ निवेशयन्ते. ६ पादाम्बुजम्. ७ वर; कनकनूपुर; कनकनिर्मितनूपुरैश्च. ८ प्रसन्नमनसः प्रविभूषयन्ति. ९ आश्रितानाम्. १० आपूरितानाम्.

Digitized by Google

शरादे[1] कुसुमसङ्गाद्वायवो[2] वान्ति[3] शीता
विगतजलदवृन्दा दिग्विभागा[4] मनोज्ञाः ।
विगतकलुषमम्भः शालि[5]पक्का[6] धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥ २२ ॥
दिवसकरमयूखै[7]र्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भ[8]तेऽद्य ।
कुमुदमपि गते[9]ऽस्तं लीयते चन्द्र[10]बिम्बे
हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥ २३ ॥
असितनयनलक्ष्मी[11] लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंस[12]स्वनेषु ।
अधररुचिरशोमां बन्धुजीवे प्रिया[13]णां
पथिकजन इदानीं रोदिति भ्रान्त[14]चित्तः ॥ २४ ॥

(22) In the autumn, the winds, owing to their contact with flowers blow cool ; the (several) quarters being freed from the clusters of clouds appear lovely ; the water becomes free from turbidity ; the ground has ripe corn on it ; and the sky has the moon with clear rays and is variegated by the stars.

(23) In these days, the day-lotus, having the charm of the face of a noble lady, being made to blow by the rays of the sun opens widely in the morning ; while, the disk of the moon having set, the night-lotus is closed like the smile of ladies when their husbands are on a journey.

(24) Having observed the beauty of the black eyes of their beloveds in the lotuses, the jingling golden waistband in the sounds of inebriated swans, and the beautiful lustre of lower-lip in the *Bandhujiva* flower, the travellers now being bewildered in mind weep.

१ सुरभि. २ कुमुद. ३ तोयात्. ४ यांति. ५ विशद; व्यपगतजलवृन्दा दिव्यरूपाश्च मेघाः. ६ शुष्कपङ्का; श्यानपङ्का. ७ शोभते. ८ कुमुदमुपगतश्रीर्लांपिते. ९ म्लायते १० चन्द्रबिम्बम्. ११ कान्तिम्. १३ हंसी. १४ प्रियाणाः. १५ भ्रान्तचेताः.

Digitized by Google

स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं
कामं च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥ २५ ॥

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना ।
कुमुदरुचिरहासा कामिनीवोन्मदेयं
प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम् ॥ २६ ॥

---

(25) The pleasant loveliness of the approach of autumn having left the splendour of the moon in the faces of women, the charming sounds of swans in (their) anklets set with jewels, and the lustre of the *Bandhùka* flowers in (their) attractive lower lips, goes away somewhere (disappears).

(26) May this *Sharad* season, having for her mouth the blown lotus and for her eyes the full blown blue lotuses, wearing a white garment of the expanded, fresh *Kàsha* flower, and having pleasant smile in the *Kumuda* lotuses, afford the highest bliss to your mind like a highly intoxicated young woman.

---

१ निधाय; विधाय. २ लक्ष्मीः. काम्यं तु; हास्ये विशुद्धवदने कुमुदाकरश्रीम्; हास्ये विशुद्धवदने कुमुदाकरश्रीः. ४ पुष्प. ५ विकसितनवकाशासंकुलालम्बिवस्त्रा; कुसुमितनवकाशाव्याकुलालम्बिवासाः; कुसुमिततरुशाखाव्याकुलालम्बिवासा. ६ कान्तिः; जनितरुचिरहासा; जनितरुचिरकान्तिः. ७ चोन्मदेयम्; चोन्मदाद्य. ८ उपदिशतु;परिदिशतु.९ चेतसाम्; चेतासि. १० उग्राम्.

Digitized by Google

चतुर्थः सर्गः।

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतः प्रिये ॥ १ ॥
मनोहरैः कुङ्कुमरागरक्तैस्तुषारकुन्देन्दुनिभैश्च हारैः।
विलासिनीनां स्तनशालिनीनां नालंक्रियन्ते स्तनमण्डलानि॥ २॥
न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि।
नितम्बबिम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥
काञ्चीगुणैः काञ्चनरत्नचित्रैर्नो भूषयन्ति प्रमदा नितम्बान्।
न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजैरन्यम्बुजकान्तिभाग्भिः ॥ ४ ॥

---

(1) The Winter season has set in, Oh beloved, which is pleasant on account of the new appearance of foliage and corn, in which the *Lodhra* trees burst into flowers, the *Shâli* (rice) ears become ripe, the lotuses are withered, and the dews fall.

(2) (Now) the bosoms of sportive women beautiful on account of their (rising) breasts are not decorated with pleasing garlands reddened with the dye of *Kunkuma* (saffron), and resembling the sprays, the *Kunda* flower and the mocn.

(3) No bracelets and armlets find place on (lit. go into contact with) the couples of arms of sportive women; no new silken garments on their hips; no thin cloth on their plump breasts.

(4) Young women do not adorn their hips with girdles variegated with gold and gems; nor their lotus-like feet, having the beauty of lotuses, with anklets possessing (or, producing) the notes of swans.

---

१ यव. २ पुष्प. ३ गतासुपद्मः; नवीनपद्मः ४ अयम्. ५ मनोरमैः. ६ चन्दनरागगौरैः; कुङ्कुमरागापिङ्गैः; कुङ्कुमरागपिञ्जरैः. ७ नवयौवनानाम्. ८ मलंक्रियन्ते. ९ रक्त. १० बिम्बैः. ११ न. १२ नितम्बम्. १३ पादाम्बुजालक्तकशोभितानि. १४ भान्ति.

Digitized by Google

गात्राणि कालीयकचर्चितानि सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥
रतिश्रमक्षामविपाण्डुवक्त्राः प्राप्तेऽपि हर्षाभ्युदये तरुण्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान्प्रपीड्यमानानधरानवेक्ष्य ॥ ६ ॥
पीनस्तनोरःस्थलभागशोभामासाद्य तत्पीडनजातखेदः ।
तृणाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकालः ॥ ७ ॥
प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥

(5) For the festival of sexual enjoyment women besmear their bodies with the *Kàliyaka* pigment, decorate their lotuslike faces with drawings of leaves, and fumigate their heads with the (smoke of) the black *Aguru*.

(6) Youthful women with their faces emaciated and pale through the languor of enjoyment, do not laugh loudly, even on occasions of mirth, observing their lower lips, wounded by (their lovers') pointed teeth, excessively ailing.

(7) The cold season having resorted to the beautiful (beauty of the) bosoms having plump breasts, and being afflicted in consequence of their crush-ing (by the lovers), cries (sheds tears), as it were, in the morning, with (in the shape of) the particles of dew, adhering to the ends of grass, falling down.

(8) The border-lines (of fields) abounding in plenteous shoots of *Shàli* (corn), rendered beautiful by the herds of female deer, and resounded by the charming *Crouncha* birds, excite the heart with longing.

१ नखाम्बजानि. २ भवन्ति. ३ क्लान्तविपाण्डुगण्डाः. ४ प्राप्ताश्च हर्षाभ्युदयम् ; प्राप्तातिहर्षाभ्युदये; संप्राप्तहर्षाभ्युदयाः. ५ नीचैः. ६ प्रभिन्नरागान्; अव्यक्तरागान्. ७ उरुस्थल. ८ भार. ९ लम्बैः. १० प्रसूति. ११ प्रचयैः. १२ विलासितानि.

Digitized by Google

प्रफुल्लनीलोत्पलशोभितानि [3]सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम् ॥९॥
पाकं व्रजन्ती हिमजातशीतैराधूयमाना सततं मरुद्भिः ।
प्रिये प्रियङ्गुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव॥१०॥
पुष्पासवामोदसुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्गव्यतिरिक्तशायी शेते जनः कामशरैरनुविद्धः ॥ ११ ॥
दन्तच्छदैः सव्रणदन्तचिह्नैः स्तनैश्च पार्श्वग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां रतोपभोगो नवयौवनानाम् ॥ १२ ॥

---

(9) The extremely cool tanks, decorated with full-blown blue lotuses, rendered beautiful by the maddened *Kádamba* birds, and having limpid waters, attract the hearts of men.

(10) The *Priyangu* creeper, Oh love, becoming gray (lit. coming to ripeness) by the cold caused by snow and constantly shaken by the winds, turns pale like a playful woman (when) separated from her dear one.

(11) With their mouths made fragrant by the odour of the wine of flowers, with bodies made scented by the breath-winds, persons (pairs of lovers) being struck by the shaft of the god of love sleep in close mutual embrace (lit. lie down with their limbs closely adhering to each other.)

(12) By the lower-lips (lit. that cover the teeth) possessing marks of wounds made by the teeth, and by the breasts having scratches made by the nails (lit. ends

---

१ प्रभूत. २ भूषितानि. ३ सहंसकादम्बविघट्टितानि; शरारिकादम्बविघट्टितानि; शरादिकादम्बविघट्टितानि. ४ प्रफुल्ल. ५ सशैवलानि. ६ यूनाम्. ७ पातशीतैः; शीतपातैः; सङ्गशीतैः. ८ रत्युत्सवामोद. ९ आमोदि. १० कृतान्तः. ११ व्यतिषिक्त; व्यतिसक्त; व्यतिसङ्ग; प्रतिभिन्नदेहः. १२ रसानुविद्धः. १३ दन्तविघातचिह्नैः. १४ पीनैः सुरताभिलाषैः. १५ रतोपयोगो.

Digitized by Google

काचिद्विभूषयति दर्पणसक्तहस्ता
बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमवकृष्य निरीक्षते च ॥ १३ ॥
अन्या प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्मा ।
शय्यान्तदेशललिताकुलकेशपाशा
निद्रां प्रयाति मृदुसूर्यकराभितप्ता ॥ १४ ॥
निर्माल्यदाम परिमुक्तमनोज्ञगन्धं
मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥ १५ ॥

of hands) is, in a cruel manner, indicated the enjoyment of women in the prime of youth.

(13) A certain woman standing in the young sun with a mirror in her hand (lit. with one hand occupied by the mirror) decorates her lotus-like face, and pulling her lower lip (to a length) observes that its moisture is sucked (lit. solely drunk) and that it is wounded with pointed teeth by her lover.

(14) A certain other (lady) with her body languid through the fatigue of excessive enjoyment, with her lotus-like eyes red on account of wakefulness at night, with the braid of hair dishevelled on account of its being tossed about on the sides of the bed, being heated by the soft rays of the sun, goes to sleep.

(15) Other youthful women, with the ends of hair as dark (or, blue) as a cloud, and with their persons

१ युक्त. २ बाला विलोलचिकुरं वदनारविन्दम्. ३ प्रियतमैश्च. ४ अपकृष्य; अनुकृष्य. ५ निरीक्ष्यतेऽन्या. ६ अन्याः. ७ भिन्न. ८ नक्त; नक्तम्; रात्रौ. ९ पद्माः; युग्माः. १० स्रस्तांस; शय्यान्तरेषु; स्कन्धाक्रदेश; आस्कन्धदेश. ११ ललित. १२ प्रयान्ति. १३ अभितप्ताः; दिननाथकराभितप्ता. १४ परिभूत; परिभुक्त. १५ गन्धान्. १६ °न्तात्. १७ पीनस्तनोल्लसितसुन्दरगात्रवल्लयः. १८ अबलाः.

Digitized by Google

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरचारुशोभा ।
रक्तांशुकं परिदधाति नवं नताङ्गी
व्यालम्बिनीललुलितालककुञ्चिताक्षी ॥ १६ ॥

अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्टयः ।
संपीड्यमानविपुलोरुपयोधरान्तां
अभ्यंजनं विदधाति प्रमदाः सुशोभाः ॥ १७ ॥

---

bent down by the weight of plump and swelling breasts, having removed from their heads garlands deprived of flowers and sweet scent, tie their hair into a braid.

(16) Another slender-limbed one, whose lips are painted charmingly (lit. on whose lips there are charming paintings arranged), whose eyes are contracted on account of her graceful, dark locks falling (on them) puts on a new red garment, full of joy (as she feels) on seeing herself enjoyed by her lover.

(17) Others perspiring in consequence of the exhaustion caused by the sports of enjoyment, with (their) slender bodies very much relaxed, with ailing large thighs and nips of breasts and (therefore) appearing very lovely, besmear their bodies with unguents.

---

१ प्रविभक्तम्. २ रागशोभा ; गण्डशोभा. ३ कूर्पासकम्. ४ नखक्षताङ्गी. ५ व्यालम्बिताङ्गुलिलता; व्यालम्बिनीविलुलिता. ६ स्वेदम्. ७ संदह्यमाण ; संदह्यमान. ८ पुलकोरु. ९ पयोधरान्तौ. १० प्रलञ्जनम् ; नेत्राञ्जनम्. ११ सुशोभम्.

Digitized by Google

बहुगुणरमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमः ।
विनिपतिततुषारः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तः कालः एषः सुखं वः ॥ १८ ॥

पञ्चमः सर्गः ।

प्ररूढशालीक्षुचयावृतक्षितिं क्वचित्स्थितक्रौञ्चनिनादराजितम् ।
प्रकामकामं प्रमदाजनप्रियं वरोरु कालं शिशिराह्वयं शृणु ॥ १ ॥
निरुद्धवातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति कालेऽत्र जनस्य सेव्यताम् ॥ २ ॥

(18) May this season in company with snow give you happiness ;—the season which is pleasant in various ways and which (therefore) is (most) enticing to women, in which the village-frontiers are covered with plenteous ripened *Shâli* (corn), in which snow falls, and which is extolled by the notes of *Crouncha* birds.

(1) Hear, Oh beautiful-thighed one, (the description of) the season, by name *Shishira*, in which the earth is covered with heaps of grown up *Shâlî* (stalks) and sugar-canes, which is rendered beautiful by the notes of *Crouncha* birds seated here and there, in which desire (passion) is excessive, and which is (therefore) favourite with young women.

(2) In this season, the interior of a hall with windows shut, fire, the rays of the sun, heavy garments,

१ इति बहुरमणीयो. २ सीमा. ३ सततमतिमनोज्ञः; सुरतगतिमनोज्ञः; विनिपतितमनोज्ञः. ४ क्रौञ्चमालापरीतः; क्रौञ्चनादोपनीतः. ५ उपदिशतु सुखं वः काल एषोऽतिरम्यः. ६ त्वेष कालम्. ७ प्रियम्. ८ प्ररुढशालीक्षुचयैर्मनोहरम् ; प्ररूढशालिप्रचयावृताक्षितिम् ; प्रवृद्धशालीक्षुचयावृताक्षितिम् . ९ क्वचित्स्थितम् ; सुस्थस्थि ; निद्रोत्थित ; क्षितिस्थित. १० शोभितम्. ११ काम ; प्रमोदहेतुं. १२ प्रेयेथ कालं. १३ अत्र.

Digitized by Google

न चन्दनं चन्द्रमरीचिशीतलं न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।
न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति साम्प्रतम् ॥३॥
तुषारसंघातनिपातशीतलाः शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणचारुभूषणा जनस्य सेव्या न भवन्ति रात्रयः ॥४॥
गृहीतताम्बूलविलेपनस्रजः पुष्पासवामोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥५॥
कृतापराधान्बहुशोऽपि तर्जितान्सवेपथून्साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन्सुरताभिलाषिणः स्त्रियोऽपराधान्समदा विसस्मरुः॥६॥

---

and youthful women ; (all these) become the objects of enjoyment of men.

(3) Now, neither sandle-pigment rendered cool by the moon-beams, nor the terrace of a mansion (rendered) bright by the autumnal moon, nor breezes become cool by deep-falling water-sprays, please the hearts of people.

(4) The nights cool on account of the falling of quantities of dew, and rendered still more cool by the splendour of the moon, and possessed of a beautiful decoration in the form of the pale cluster of stars, do not afford pleasure to men.

(5) Love-longing women taking (in their hands) *Tàmbùlas*, ointments and garlands, with their lotus-like mouths scented by the wine of flowers, enter the bed-chamber made fragrant by the smoke of the deep black *Aguru*.

(6) Women full of intoxication seeing their husbands full of tremor, refused as they often are because of their committing faults, with their sense lost in fear and longing for sexual pleasure, forget their faults.

---

१ सुन्दरम् . २ न चाम्बरं सान्द्रतुषारशीतलम्. ३ शीतला. ४ रोचिः; शोभाः. ५ शिशिरीकृता. ६ जिह्मभूषिताः ; चारुभूषिताः. ७ सुरासवा ; सुखासवा. ८ वासिताम् ; वासिता. ९ शय्याम् . १० उत्सुकस्त्रियः. ११ अभितर्जितान्; वितर्जितान् ; अधितर्जितान्; बहुधाभितर्जितान्. १२ मन्द. १३ शयने. १४ न सस्मरुः.

Digitized by Google

प्रकामकामैर्युवभिः सुनिर्दयं निशासु दीर्घास्वभिरममिताश्चिरम् ।
श्रमन्ति मन्दं श्रमखेदितोरसः क्षपावसाने नवयौवनाः स्त्रियः ॥७॥
मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयकभूषितोरसः ।
निवेशितान्तःकुसुमैः शिरोरुहैर्विभूषयन्तीव हिमागमं स्त्रियः ॥ ८ ॥
पयोधरैः कुङ्कुमरागपिञ्जरैःसुखोपसेव्यैर्नवयौवनोष्मभिः ।
विलासिनीनां परिपीडितोरसः स्वपन्ति शीतं परिभय कामिनः॥९॥
सुगन्धिनिश्वासविकम्पितोत्पलं मनोहरं कामरतिप्रबोधकम् ।
निशासु हृष्टाः सह कामिभिः स्त्रियः पिबन्ति मद्यं मदनीयमुत्तमम्
॥ १० ॥

---

(7) Women in the prime of youth, mercilessly enjoyed long in long nights by their passionate youthful lovers and (therefore) with their bosoms pained through fatigue, move about slowly at the close of night.

(8) Women with their breasts excessively pressed by the charming bodice, and with their bosoms adorned with colored silken cloth, adorn, as it were, the approach of frost by means of their hair interlaced with flowers.

(9) With their chests pressed with the breasts of their sportive wives, (breasts) become yellow on account of the color of saffron (applied to them) fit to be enjoyed with pleasure, and possessing the warmth of the prime of youth, lovers sleep (at ease) having overcome cold (thereby).

(10) Overjoyed women drink in company with their lovers, in night times, the best kind of wine caus-

---

१ सुरतेऽतिनिर्दयम्; युवभिः सुनिर्दयम्; सुरतैश्च; सुधवैः. २ दीर्घास्वभिभाविता भृशम्; गाढं दयितैश्चिरदृढम्; दीर्घास्वतिपीडिताः. ३ भवन्ति; धमन्ति; भ्रमन्त्यमन्थम्. ४ मन्द ५ स्वादतोरवः; मोदितोरसः; खोदितोरवः. ६ कूर्पासनिपीडित. ७ कौशेयविभूषितोरसः. कौशेयविभूषितोरवः. ८ यौवनोत्सवाः; यौवनोत्सवः; यौवनोन्नतैः; यौवनोद्धवैः. ९ विलासिनीभिः. १० भृशम्. ११ क्षपन्ति; क्षिपन्ति. १२ दृम्. विकल्पितोत्पलम्. १३ प्रबोधनम् १४ कृष्णासु च कामिनो जनाः.

Digitized by Google

अपगतमदरागा योषिदेका[1] प्रभाते
कृतनिबिडकुचाग्रा पत्युरालिङ्गनेन[2] ।
प्रियतमपरिभुक्तं वीक्षमाणा[3] स्वदेहं
व्रजति शयनवासाद्वासमन्यद्धसन्ती[4] ॥ ११ ॥
अगुरुसुरभिधूपामोदितं केशपाशं[5]
गलितकुसुममालं कुञ्चिताग्रं[6] वहन्ती ।
त्यजति गुरुनितम्बा निम्ननाभिः[7] सुमध्या[8]
उषसि शयनमन्या कामिनी चारुशोभा[9] ॥ १२ ॥
कनककमलकान्तैः सद्य एवाम्बुधौतैः[10]
श्रवणतटनिषक्तैः[11] पाटलोपान्तनेत्रैः ।

---

ing intoxication, the lotus in which is (slightly) shaken by their fragrant breath, which is attractive, and which excites the passion of love.

(11) A certain woman, with red color of intoxication gone, and with the nips of her breasts compressed in (by) the embrace of her husband, in the morning seeing her person enjoyed by her lover leaves her sleeping apartment and repairs to another, smiling.

(12) A certain other young lady of charming beauty, having big hips, of deep naval and a fine waist, and wearing a braid of hair scented by the fragrant incense of *Aguru*, (hair) with the garland of flowers dropped down and having curled tops, leaves her bed in the morning.

(13) In the morning, with faces just washed with

---

१ एव; एषाम्. २ कृतविनतकुचाग्रा; कुचनिबिडकुचा या; कृतविकृतकुचाग्रा. ३ वीक्ष्यमाणा. ४ गेहात्. ५ अन्यं हसन्ती; अन्यव्रजन्ती. ६ आमोदितान्; शोभितम्; कुसुमवासामोदितम्. ७ केशपाशान्. ८ मालान्. ९ तन्वती-कुञ्चिताग्रम्; धुन्वती कुञ्चिताग्रान्. १० निम्नमध्या वसाना-वसत्रा. ११ प्युषसि. १२ शयनवासः; शयनवासम्; शयनमध्या. १३ कामशोभा; कामशोभाम्; कामशोभम्. १४ चारुबिम्बाधरोष्ठैः; चारुताम्राधरोष्ठैः. १५ श्रवणतटनिषिक्तैः; स्मरदमृतनिषक्तैः. श्रवणतटनियुक्तैः.

Digitized by Google

वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमान्वितानां ददाति सौभाग्यमयं वसन्तः ॥ ३ ॥
कुसुम्भरागारुणितैर्दुकूलैर्निंतम्बबिम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरैरलंक्रियन्ते स्तनमण्डलानि ॥ ४ ॥
कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम् ।
पुष्पं च फुल्लं नवमल्लिकायाः प्रयाति कान्तिं प्रमदाजनानाम्॥५॥
स्तनेषु हाराः सितचन्दनार्द्रा भुजेषु सङ्गं वलयाङ्गदानि ।

---

(3) This vernal season gives a charm to the waters of tanks, to the waist-bands set with jewels, to the splendour of the moon, to young women, and to the mango-trees loaded with flowers.

(4) The hips of sportive women are (in these days) adorned with silk-garments made reddish by the color of *Sap-flower* and their breast-orbs with thin clothes made yellow with saffron color.

(5) The fresh *Karnikára* flower fit to be placed on the ears of young women, the *Ashoka* flower and the full-blown flower of the *Navamallikà* (deserving a place) on their brisk (waving) dark hair, gain in beauty (in their right places).

(6) (Pearl)-necklaces wet with white sandle-pigment, bracelets and armlets, and waist-bands, (these) come

---

१. कुसुमानतानाम्. २ तनोति. ३ सौरभ्यम्. ४ नितम्बिनीनाम्. ५ रक्तांशुकैः. ६ पिञ्जरैः. ७ स्तनेषु हाराः; केशेषु. ८ अशोकः. ९ शिखासु फुल्लाः; मुखासु पुष्पम्; शिखासु मालाः. १० नवमालिकाश्च; नवमल्लिकाश्च. ११ प्रयान्ति शोभाम्-संगम्. १२ प्रमदाजनस्य; वनिताजनस्य. १३ कुचेषु. १४ कम्बूवलयाङ्गदानि; चञ्चद्वलयाङ्गदानि; मुखेषु ताम्बूल-कर्पूरसुगन्धिवाताः.

Digitized by Google

प्रयान्त्यनङ्गातुरमानसानां नितम्बिनीनां जघनेषु काञ्च्यः ॥६॥
सपत्रलेखेषु विलासिनीनां वक्त्रेषु हेमाम्बुरुहोपमेषु ।
स्तनान्तरे मौक्तिकसङ्गरम्यः स्वेदागमो विस्तरतामुपैति ॥ ७ ॥
उच्छ्वासयन्त्यः श्लथबन्धनानि गात्राणि कंदर्पसमाकुलानि ।
समीपवर्तिष्वधुना प्रियेषु समुत्सुका एव भवन्ति नार्यः ॥८ ॥
तनूनि पाण्डूनि समन्थराणि मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्यसंभ्रमाणि ॥ ९ ॥
नेत्रेषु लोलो मदिरालसेषु गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनङ्गो बहुधा स्थितोऽयं॥१०॥

in contact (respectively) with the breasts, the arms, and the hinder parts of youthful women whose minds are hurt by the God of Love.

(7) The rising perspiration, charming from its contact with pearls in the space between the breasts, spreads on the faces of sportive women, having paintings of leaves on them and resembling golden lotuses.

(8) In this season, while giving rest to their bodies become loose in the joints and oppressed by love, women needs feel longing, their lovers being near.

(9) The God of Love renders the persons of young women thin, pale, full of sluggishness, inclined to repeated yawning, and full of confusion at the sight of beauty.

(10) Unsteady in the eyes languishing through wine, pale in the cheeks, hard in the breasts, sunk in the middle, and fat in the hips, the God of Love is, in this

१ निःशङ्क-निःसङ्गमनङ्गसौख्यम्. २ विलासिनीनाम्. ३ मुखेषु ४ रत्नान्तर; रत्यन्तरे; रतान्तरे. ५ सङ्गजातः; सङ्गतुल्यः; तुल्यरूपः. ६ स्वेदोद्गमः. ७ उल्लासयन्त्यः; ८ अपि कामुकेषु; अपि कामुकेषु; अपि नायकेषु. ९ घनानि. १० मदालसानि; सुकम्पितानि. ११ अमान्य. १२ रसात्सुकानि; रसोत्तराणि; असौ प्रोषितभर्तृकस्य. १३ लोलम; अलोलः. रसोत्तराणि. १० मदिसरसेषु. १५ कठिनस्तनेषु १६ नम्रः. १७ बहुशः.

Digitized by Google

अङ्गानि निद्रालसविभ्रमाणि वाक्यानि किञ्चिन्मदकालसानि।
भ्रूक्षेपजिह्मानि च वीक्षितानि चकार कामः प्रमदाजनानाम्॥ ११॥
प्रियङ्गुकालीयककुङ्कुमाक्तं स्तनेषु गौरेषु विलासिनीभिः।
आलिप्यते चन्दनमङ्गनाभिर्मदालसाभिर्मृगनाभियुक्तम्॥ १२॥
गुरूणि वासांसि विहाय तूर्णं तनूनि लाक्षारसरञ्जितानि।
सुगन्धिकालागुरुधूपितानि धत्ते जनः काममदालसाङ्गः॥ १३॥
पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः।
कूजद्विरेफोऽप्यथमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटु॥ १४॥

season (seen) sitting in (occupying) the (limbs of) women in various ways.

(11) The God of Love has made the limbs of young women slow in playful gestures on account of sleep, their words a little expressive of (amorous) desire through intoxication, and their looks sidelong (lit. crooked) on account of the contraction of the eye-brows.

(12) To (lit. on) their white breasts is applied sandle-pigment mixed with musk and with *Priyangu*, *Kálíyaka* and saffron by playful (young) women languid through intoxication.

(13) Leaving aside heavy garments at once, persons, with their limbs drooping through intoxication of love, wear light ones dyed with the juice of red lac and fumigated with fragrant black *Aguru*.

(14) The male-cuckoo intoxicated by the wine of the juice of mangoes kisses his beloved, exhilarated as he is by love; the humming bee too seated on a lotus

१ विह्वलानि; °लसितानि नित्यम. २ मदिरालसानि; मदसालसानि. ३ विलोचनानि. ४ करोति. ५ प्रमदोत्तमानाम्; प्रमदाजनस्य. ६ कुङ्कुमानि. ७ स्तनाङ्गरागेषु विसर्जितानि—विचर्चितानि. ८ आलिख्यते; आसेव्यते. ९ साम्प्रतम्. १० शिरांसि; नितान्त. ११ कामशरानुविद्धः; °लसङ्ग १२ चूतरसेन मत्तः प्रियामुखं चुम्बति सादरोऽयम्. १३ गुरूनि. १४ अधिकः प्रमत्तः. १५ क्षिप्रम्; प्रियः. १६ चाटूनि; क्षिप्रम्.

Digitized by Google

ताम्रप्रवालस्तबकावनम्रा सूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम् ॥ १५ ॥
आ मूलतो विद्रुमरागताम्रं सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् ॥ १६ ॥
मत्तद्विरेफपरिचुम्बितचारुपुष्पा-
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ १७ ॥
कान्तामुखद्युतिमुषामचिरोद्गतानां
शोभां परां कुरवकद्रुममञ्जरीणाम् ।

---

flatteringly does (accomplishes) whatever is desired by his love.

(15) The mango-trees bent low by the clusters of reddish young foliage, with their branches beautiful on account of their being full of blossoms, and shaken by the wind, make the mind of women exceedingly longing.

(16) The *Ashoka*-trees, full of foliage and bearing a cluster of flowers reddish like the color of corals from the (very) stalk, make the heart of persons in the prime of youth full of grief love-sickness) when seen (by them).

(17) The young *Atimukta* creepers, with their charming flowers kissed by intoxicated bees, and their soft bending foliage set in motion by gentle wind, when seen, suddenly excite the minds of lovers with longing.

(18) What person's heart that has (any) feeling is not wounded, Oh love, by a volley of the shafts of the

---

१ प्रवालनम्रास्तबकावतंसाः; प्रवालताम्र°. २ कान्ते; सान्द्राः. ३पवनाभिभूताः. ४ समुत्सुकम्; पर्युत्सुकत्वं–समुत्सुकत्वं मनसः. ५ ताम्राः. ६ सपल्लवम्. ७ चारु; चारुतर. ८ मनसश्च समुत्सुकत्वम् ९ चूता विमुक्तकलिकाः; चूताभिरामकलिकाः. १० कान्तामुखं द्युतिमनोहरमद्रुतानाम्; कान्तानन द्युतिजुषामपि चोद्गतानाम्; नानामुखद्युतिजुषामपि चोद्गतानाम्; कान्तामुखद्युतिनिभाम्.

Digitized by Google

दृष्ट्वा प्रिये सदृशपल्लव भवेन्न कस्य
कन्दर्पजागनिकरैर्व्यथितं हि चेतः ॥ १८ ॥
आदीप्तवन्हिसदृशैर्मरुतावधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमये हि समाचितेयं
रक्तांशुका नववधूरिव भाति भूमिः ॥ १९ ॥
किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं नु दग्धम् ।
यत्कोकिलः पुनरयं मधुरैर्वचोभि
र्युनां मनः सुवदनानिहितं निहन्ति ॥ २० ॥

God of Love at the sight of the excellent beauty of the newly shooting sprouts of the *Kurabaka* trees emulating (lit. stealing) the splendour of the face of (his) beloved ?

(19) In the vernal season the earth (or, forest-ground) covered over all at once with the groups of *Palâsha*-trees, on all sides, bent down with flowers, shaken by the wind and resembling (appearing as red as) blazing fire, appears like a newly-married young woman dressed in a red garment.

(20) Is not the mind of youths which is fixed (centred) in their beautiful-faced (beloveds) (already) broken by the *Kinshuka* trees having the lustre (redness) of the mouth of a parrot; is it not (already) burnt by the flowers of the *Karnikâra* trees, that this male-cuckoo with its sweet songs (lit. words) once more strikes at it?

---

१ हि पथिकस्य; प्रियतमारहितस्य पुंसः. २ पतनव्यथनम्; पतन-पवन-व्यथितम. ३ सपिशाचिजातैः; पवनावधूतैः. ४ कौर्णैः. ५ न समागतेयम्; समुपागते हि-च; वसन्तऋतुनाधिगता नितान्तम्. ६ रक्तांशुकैः. ७ च दग्धम्; न दग्धम्. ८ कृतं मनोज्ञम्; कृतं च दग्धम्; हतं मनोज्ञैः. ९ कोकिलाः. १० पुरुरवैः; पुनरमी. ११ सुवदने नियतं हरन्ति-दहन्ति.

Digitized by Google

पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥ २१ ॥
आकम्पयन्कुसुमिताः सहकारशाखा
विस्तारयन्परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन्नराणां
नीहारपातविगमात्सुभगो वसन्ते ॥ २२ ॥
कुन्दैः सविभ्रममवधूहसितावदातै
रुद्यद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागमलिनानि मनांसि युवनाम् ॥ २३ ॥

(21) Even the heart of virtuous ladies, full of bashfulness and modesty, is, in a moment, distressed (agitated by love) by male-cuckoos full of gladness and uttering sweet and indistinct notes and by the humming bees making sweet and indistinct sounds through intoxication.

(22) In the vernal season, the wind, pleasant in consequence of the disappearance of the falling of frost, shaking the flowery branches of the mango-trees and spreading through the quarters the notes of the cuckoos, blows in a manner to attract (lit. take away) the hearts of men.

(23) Beautiful pleasure-gardens, made resplendent with the *Kunda*-flowers as white as the smiles of women full of playful gestures, attract the heart *even* of a sage

१ फुल्लरसैः समुपात्तहर्षैः. २ विलोचनानि; वचांसि धीरम्; उन्मदकराणि वचांसि पुंसाम्. ३ पर्याकुले. ४ कुसुमितां सहकारशाखाम्. ५ परभृतोऽद्य. ६ वधूनाम्. ७ विमलैः. ८ वनेषु. ९ संशोभितानि. १० निरस्त. ११ प्रागेव रागचपलानि; प्रागेव रागमलिनानि. १२ पुंसाम्.

Digitized by Google

आलम्बेहेमरसना: स्तनसक्तहारा:
कंदर्पदर्पशिथिलीकृतगात्रयष्टय: ।
मासे मधौ मधुरकोकिलमत्तनादै
र्नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥ २४ ॥
नानामनोज्ञकुसुमद्रुमभूषितान्ता
न्हृष्टान्यपुष्टाननदाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलातलौघा
न्दृष्ट्वा जन: क्षितिभृतो मुदमेति सर्व: ॥२५ ॥
नेत्रं निमीलयति रोदिति याचते मोहं
घ्राणं करेण विरुणद्धि विरौति चोच्चै: ।

that is free from all) passions; while (as regards) the hearts of youthful men, soiled by passions, (they are subjected) even already.

(24) In the vernal month, women with golden girdles hanging (on their hips), and necklaces falling on (lit. attached to) the breasts and with their (slender) bodies made loose (languid) by the (overpowering) excess (sway) of the God of Love, take away perforce the heart of men by means of notes (songs) as sweet as those of cuckoos and bees.

(25) All persons feel joy at the sight of mountains whose sides are adorned with trees bearing beautiful flowers of various kinds, whose summits are filled with melodious notes of overjoyed cuckoos and whose numerous stony precipices are covered with a number of *shaileya* plants.

(26) A traveller whose mind is rendered melan-

१ प्रालम्बि; आलम्ब्य चन्दनरसान् ; आलब्धचन्दनरसा:. २ लग्न. ३ कोमल. ४ रात्रै:. ५ रामा:. ६ भूषितप्रान्; पुष्पितप्रान्; भूषिताङ्गान्; कुसुमोद्गमपुष्पितान्तान्. ७ संधिदेशान्; कुलशोभितसानुदेशान्. ८ जानु. ९ तलाम्तान्; तलांश्च; गृहान्तान्; गृहान्तान्. १० समुपैति सर्वान् ; मदमेति. ११ निमीलति विरोदिति. १२ याचते शोकम्; जातमोहम्. १३ प्राणान्; प्राणान् करेण च निहत्य.

Digitized by Google

कान्तावियोगपरिखेदितचित्तवृत्ति
र्दृष्ट्वाध्वगः कुसुमितान्सहकारवृक्षान् ॥ २६ ॥
समदमधुकराणां कोकिलानां च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मौनिनीनां
तुदति कुसुममासो मन्मथोद्दीपनाय ॥ २७ ॥
आम्रीमञ्जुलमञ्जरीवरशरः सत्किंशुकं यद्धनु
र्ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृतो यद्बन्दिनो लोकजि-
त्सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥ २८ ॥

---

choly (depressed) on account of separation from his beloved, on seeing the mango-trees full of blossoms, shuts his eyes, weeps, faints, holds his nose with his hand and cries aloud.

(27) The pleasant flowery month afflicts the mind of proud women, for the rousing of the God of Love, with the notes of cuckoos and the humming of maddened bees, with the blooming mango-trees and the beautiful *Karnikàra* trees, as if with so many arrows.

(28) May that bodiless God of Love, the conqueror of people, accompanied by the vernal season, pour down blessings on you—the God of Love, who has for his arrows the best of charming mango-blossoms, the excellent *Palàsha* flower for his bow, a cluster of bees for the bow-string, the bright-rayed moon for the spotless (bright) white parasol, the *Malaya* wind for the intoxicated elephant and the cuckoos for the bards.

---

१ परिदेवित. २ नरः; जनः; नगे. ३ कुसुमिताः सहकारशाखाः; कुसुमितान् सहसैव चूतान्. ४ रम्यैः. ५ कामिनीनाम्. ६ कुसुमप्रकाणो; कुसुमचापो. ७ मन्मथोद्वेजनाय; मन्मथोत्तेजनाभिः.

Digitized by Google

APPENDIX TO RITUSAMHA'RA.

The following verses are to be found in addition to those contained in the text given in the book :—

Canto II—after the 18th.

वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्रयन्ति ।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवंगाः ॥

Canto III—after the 22nd.

करकमलमनोज्ञाः कान्तसंसक्तहस्ता
वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः ।
चितकुसुमसुगन्धि प्राविशन्तीव वेश्म
प्रबलमदनहेतोस्त्यक्तसंगीतरागाः ॥
सुरतरसविलासात्सत्सखीभिः समेता
असमरसविनोदं सूचयन्त्यप्रकामम् ।
अनुपमुखरागा रात्रिमध्या विनोदं
शरदि तरुणकान्ताः सूचयन्ति प्रमोदात् ॥

Canto IV—after the 9th.

मार्गं समीक्ष्यातिनिरस्तनीरं प्रवासखिन्नं पतिमुद्वहन्त्यः ।
प्रवेक्ष्यमाणा हरिणेक्षणाक्ष्यः प्रबोधयन्तीव मनोरथानि ॥

Canto VI—after the 2nd.

ईषत्तुषारैः कृतशीतहर्म्यैः सुवासितं चारुशिरः सचम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले स्तनं सहारं कुसुमैर्मनोहरैः ॥

---

१ रचितकुसुमगन्धि. २ प्रायशो यान्त. ३ हेतौ मुक्तसंगोत्तरम्या. ४ विलासा सत्. ५ शर. ६ यान्त प्रकामम्. ७ अनुगतमुखराभिः. ८ श्रोणि-मध्ये. ९ प्रमोदान्.

Digitized by Google

Canto VI—after the 9th.

छायां जनः समधिकांक्षाते[1] पादपानां
मत्तैः[2] स चेत्पुनरयं किरणांश्च भानोः ।
कान्तां[3] सुगात्रमुपगूहति शीतलत्वा-
द्धर्म्येषु[4] याति च रतिं निशि शीतलेषु ॥

Do—after the 27th.

रुचिरकनककान्तिं मुञ्चतः पुष्पवृन्दं[5]
मृदुपवनविधूतान्पुष्पितांश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरसुविद्धो मोहमेति प्रवासी ॥

परभृतकलगीतैर्ह्लादिभिः सद्वचांसि
स्मितदशनमयूखं[6] कुन्दपुष्पप्रभाभिः ।
करकिशलयकान्ति पल्लवैर्विद्रुमाभै
रभिभवति वसन्तः कामिनीनामिदानीम् ॥

कनककमलकान्तैराननैः पाण्डुगण्डै
रुपनिहितसुहारैश्चन्दनार्द्रैः स्तनाग्रैः[7] ।
मदनजनितलीलासैः सालसैर्दृष्टिपातै
र्मुनिवरमपि[8] नार्यः कामयन्ते वसन्ते ॥

मधुसुरभिमुखाब्जं लोचने लोलतारे
नवकुरबकपूर्णः केशपाशो मनोज्ञः ।
अतिगुरु[9] कुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां ब्रूहि चारु[10] ॥

---

१ अभिवाञ्छति. २ नक्तं तथेच्छति पुनः किरणं सुधांशोः. ३ हर्म्यं प्रयाति शयितुं सुखशीतलं च. ४ कान्तां च गाढमुपगूहति शीतलत्वात्. ५ कान्तीन्. ६ पुष्पराशीन्. ७ °निघातैः. ८ मयूखान्. ९ उपहसति. १० उपरिनिहितहारैः. ११ स्तनान्तैः. १२ मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान्. १३ स्तनभरनतनार्यः कामयन्ति प्रशान्तान्. १४ लोध्रताम्रे. १५ गुरुतर. १६ मन्मथाय.

Digitized by Google